ગુજરાત રાજ્યના શિક્ષણવિભાગના પત્ર-ક્રમાંક
મશબ/1219/450/છ, તા.03/07/2019-થી મંજૂર

# ज्योतिषशास्त्रम् २

## मध्यमा १

## ( ધોરણ 11 )

**प्रतिज्ञापत्रम्**

भारतं मम देशः ।
सर्वे भारतीयाः मम भ्रातरः भगिन्यः च सन्ति ।
मम मानसे देशस्पृहा अस्ति । समृद्धिसहितं विविधतापरिपूर्णं
तस्य संस्कृतिगौरवम् अनुभवामि ।
अहं सदा तत्पात्रं भवितुं यत्नं करिष्यामि ।
अहं मम पितरौ आचार्यान् गुरुजनान् च प्रति आदरभावं धारयिष्यामि ।
प्रत्येकेन सह शिष्टव्यवहारं च करिष्यामि ।
अहं मम देशाय देशबान्धवेभ्यः च मम निष्ठाम् अर्पयामि ।
तेषां च कल्याणे समृद्धौ च एव मम सुखम् अस्ति ।

**मूल्य : ₹ 31.00**

**गुजरातराज्यशाळापाठ्यपुस्तकमंडळम्**
**'विद्यायनम्', सेक्टर 10-ए, गांधीनगरम्-382010**

© गुजरात राज्यशाला पाठ्यपुस्तक मण्डलम्, गांधीनगरम्
अस्य पाठ्यपुस्तकस्य सर्वेऽधिकाराः गुजरातराज्यपाठ्यपुस्तक मण्डलहस्तकाः सन्ति । अस्य पाठ्यपुस्तकस्य कश्चिदपि भागः केनापि रूपेण गुजरातराज्यपाठ्य-पुस्तकमण्डल-नियामकस्य लिखितानुमत्या विना प्रकाशयितुं न शक्येत ।

**विषयमार्गदर्शनम्**
डॉ. राजेन्द्रप्रसादः शुक्लः

**लेखनम्**
श्री पन्नालाल व्यासः (कन्वीनरः)
डॉ. नरसिंहः भोगायता
डॉ. फाल्गुनः मोढा
श्री पूर्वाङ्गः जोषी

**समीक्षणम्**
श्री शान्तिलाल जोषी
श्री रघुभाई जोषी
श्री प्रणवभाई राज्यगुरुः
श्री किशनकुमारः जानी
श्री दर्शनकुमारः भट्टः

**भाषाशुद्धिः**
डॉ. चिंतनकुमार दवे

**संयोजनम्**
डॉ. क्रिष्ना दवे
(विषय-संयोजकः - अंग्रेजी)

**निर्माणायोजनम्**
श्री हरेन शाह
(उपनियामकः - शैक्षणिकः)

**मुद्रणसंयोजनम्**
श्री हरेश एस. लीम्बाचीया
(उपनियामकः- उत्पादनम्)

## प्रस्तावना

प्राच्यगुरुकुलपरम्परानुसारम् अध्ययनं कुर्वतां-छात्राणां कृते प्राचीनार्वाचीनयोः अध्ययनाध्यापनयोः पद्धत्योः समन्वयं कृत्वा गुजरात राज्य-माध्यमिकोच्चतर माध्यमिक शिक्षणसमितिः (बोर्ड) द्वारा नूतना-अभ्यासक्रमसंरचना कृता अस्ति। गुजरातसर्वकारद्वारा प्रमाणिताः मानिताः च अभ्यासक्रमाः सन्ति।

गुजरातसर्वकारद्वारा प्राप्तमान्यतायाः **ज्योतिष-शास्त्रम् २ मध्यमा १ (धो२ण 11)** इति विषयस्य नूतनाभ्यासक्रमानुसारं सज्जीकृतमिदं पुस्तकं-प्रकाशनात् प्राक् विषयज्ञैः सर्वाङ्गीणतया-समीक्षितं संसूचितपरिवर्तनानुसारं हस्तलिखितेषु लेखेषु योग्यतया संशोधनानन्तरं प्रकाशितमस्ति।

प्रस्तुतं पाठ्यपुस्तकं कक्षानुसारम् उपयोगि परिशुद्धं च कर्तुं मण्डलद्वारा कृते प्रयत्नेऽपि न्यूनतापरिपूर्णार्थं विद्वद्भिः सूचिताः सूचनाः सादरं स्वीकरणीयाः एव।

**पी. भारती** (IAS)
नियामकः — कार्यवाहकः प्रमुखः
ता.06-07-2019 — गान्धीनगरम्

**प्रथमावृत्ति : 2019**

**प्रकाशक** : गुजरातराज्यशालापाठ्यपुस्तकमण्डलम्, 'विद्यायन', सेक्टर 10-ए, गान्धीनगरप्रातिनिध्येन पी.भारती, नियामकः

**मुद्रक** :

# मूलभूतकर्तव्यानि

**प्रत्येकं भारतीयनागरिकस्य कर्तव्यानि निम्नानुसारं स्युः। ***

( क ) संविधान प्रति प्रामाणिकत्वम् आदर्शत्वं संस्थानां राष्ट्रध्वजस्य राष्ट्रीयगीतस्य च आदरः।

( ख ) स्वातन्त्र्याय अम्मीयराष्ट्रियसत्याग्रहं प्रेरयताम् आदर्शानां हृदये प्रतिष्ठापनम् अनुसरणं च।

( ग ) भारतस्य सार्वभौमत्वस्य एकतायाः अखण्डिततायाश्च समर्थनं च।

( घ ) देशस्य रक्षणं राष्ट्रियसेवायै उद्घोषाणायां जातायां तदनुसरणञ्च।

( च) धार्मिक-भाषाकीय-प्रादेशिकेभ्यः धार्मिकेभ्यो वा भेदेभ्यः परं स्थित्वा, समस्तभारतीयेषु साम्मनस्यसमानबन्धत्वभावनायाः वृद्धिः, स्त्रीणां गौरवहानिकारकव्यवहारत्यागश्च।

( छ ) अस्माकं समन्वितसंस्कृतेः समृद्धदायस्य मूल्यं ज्ञात्वा तदवग्रहः।

( ज ) वनानां तडागानां नदीनाम् अन्यवन्यपशुपक्षिसहितं प्राकृतिकपर्यावरणरक्षणं तद्वर्धनं तथैव जीवमात्रं प्रति अनुकम्पाभावः।

( झ ) वैज्ञानकिमानसाय मानवतावादाय जिज्ञासायै भावनाभिगमाभिबोधः।

( ट ) सामान्यसम्पत्तिरक्षणं हिंसायाः त्यागश्च।

( ठ ) राष्ट्रं पुरुषार्थस्य सिद्धेश्च अधिकाधिकमुन्नतसोपानानि प्रति सततं प्रगतिशीलं स्यात्तदर्थं वैयक्तिकसामूहिकप्रवृत्तीनां समस्तक्षेत्रेषु श्रेष्ठत्वम् आसादयितुं प्रयत्नः।

(ड) मात्रा पित्रा अथवा अभिभावकेन षड्वर्षतः चतुर्दशवर्षं यावत् (६. तः १४) वयसे बालकाय अथवा पाल्याय शिक्षणलाभाः देयाः।

---

* भारतीयं संविधानम् : अधिनियमः 51-क

# अनुक्रमणिका


| | | |
|---|---|---|
| 1. | ज्योतिषशास्त्रप्रवेशः | 1 |
| 2. | लग्नादिसंज्ञाध्यायः | 16 |
| 3. | भावाध्यायः १ - ( प्रथमतः चतुर्थान्तं यावत् ) | 27 |
| 4. | भावाध्यायः २ - ( पञ्चमतः अष्टमभावपर्यन्तम् ) | 35 |
| 5. | भावाध्यायः ३ - ( नवमभावतः द्वादशभावान्तं यावत् ) | 44 |
| 6. | तन्वादिद्वादशभावस्थ-सूर्यचन्द्रयोः फलानि | 50 |
| 7. | तन्वादिद्वादशभावस्थ-भौमबुधयोः फलानि | 60 |
| 8. | तन्वादिद्वादशभावस्थ-गुरुशुक्रयोः फलानि | 70 |
| 9. | तन्वादिद्वादशभावस्थ-शनिराह्वोः फलानि | 80 |
| 10. | तन्वादिद्वादशभावस्थ-केतुग्रहफलानि | 90 |
| 11. | सूर्यादिग्रहाणां गोचरफलाध्यायः | 96 |
| 12. | लघुपाराशरीयः ०१ | 104 |
| 13. | लघुपाराशरीयः ०२ | 111 |
| 14. | विविधयोगाध्याय : ०१ | 117 |
| 15. | विविधयोगाध्याय : ०२ | 121 |


●

# १ ॥ ज्योतिषशास्त्रप्रवेशः ॥

**प्रस्तावना**

**ज्योतिषम् -**

**लक्षं तु चत्वारो वेदा लक्षं भारतमेव च ।**

**लक्षं व्याकरणं प्रोक्तं चतुर्लक्षं तु ज्योतिषम् ॥**

सुविस्तृतमिदं शास्त्रं वेदाङ्गत्वेन गृह्यते ।

''**प्रत्यक्षं ज्योतिषं शास्त्रं चन्द्रार्कौ यस्य साक्षिणौ**''

शास्त्रमिदं तु प्रत्यक्षं यत्र सूर्यादिग्रहाणाम् अश्विन्यादिनक्षत्राणां च गणनां कृत्वा फलनिष्पत्तिर्भवति । केचन दैवज्ञाः कथयन्ति **कालावबोधकं शास्त्रं ज्योतिषम्** इति, किन्तु ज्योतिषशास्त्रमाधारीकृत्य ज्योतिः शब्दस्य परिभाषास्ति यत्-

अपरिमिते गगमनण्डले यानि हि तेजोमयानि बिम्बानि दृश्यन्ते तानि सर्वाणि समष्ट्या ज्योतिः शब्देन उच्यन्ते ।

## ज्योतिशास्त्रस्य परिचयः

सामान्यतया ज्योतिषशास्त्रस्य पञ्चभागाः सन्ति । **१-सिद्धान्तः २- संहिता ३-होरा ४-केरलिः ५-शकुनम्** किन्तु तत्रापि प्रधानतया त्रयः भागाः स्वीकृताः । **१-सिद्धान्तः २- संहिता ३-होरा** । यथा वराहमिहिराचार्येण उक्तं यत् -

**ज्योतिः शास्त्रमनेकभेदविषयं स्कन्धत्रयाधिष्ठितं**

**तत्कात्स्न्र्योपनयस्य नाम मुनिभिः संकीर्त्यते संहिता ।**

**स्कन्धेऽस्मिन् गणितेनया ग्रहगतिस्तन्त्राभिधानस्त्वसौ ।**

**होरान्योऽङ्गविनियश्च कथितः स्कन्धस्तृतीयोऽपरः ॥**

**सिद्धान्तः** - सिद्धान्तस्यापरं नामास्ति गणितं यत्रयुगवर्षायनर्तुमासपक्षहोरामुहूर्तनाडीविनाडीप्राणत्रुटयःवर्तन्ते । यत्र च सौरचान्द्रादिमासानां विवेकस्तिष्ठेत् स सिद्धान्तपदवाच्यः ''**ज्योतिषीय-ग्रहगतियुत्यादिविचारको भागः सिद्धान्त**''।

**संहिता** - स्कन्धोऽयं भौतिकफलितज्योतिषपदेनाप्यभिधीयते । वस्तुतः सर्वेषामेव स्कन्धानां संक्षेपेण विवेचनाद्धि संहितायाः संहितात्वम् ।

अत्र हि सांवत्सरसूत्रं, ग्रहचारः, ग्रहयुतिः, वर्षफलं, श्रृङ्गाटकं, गर्भविवेकः, उल्काविवेकः, प्रतिवर्षकृत्यं लक्षणानि, वास्तुवृक्षम्, आयुर्वेदः, शकुनविचारः, तिथ्यादिफलं, ग्रहगोचरश्चेत्थादिविवेचनीयाः विषयाः सन्ति ।

**होरा :** होरास्कन्धो हि जातकसम्बद्धः । यथोक्तं पितामह-नारद-वसिष्ठ-काश्यपादिसुनिर्मितं ज्योतिः शास्त्रेक स्कन्धरूपं जन्मनानाविधफलादेशफलकं वेदचक्षूरूपं द्विजामध्ययनीयं सा होरा शब्दवाच्यमिति । आद्यन्तवर्णलोपात् होराशब्दः भवत्यहोरात्रात् ।

अत्र होरास्कन्धे राशिप्रभेदः, ग्रहयोनिः, आधारः, जन्ममूलानि नक्षत्रविवेकः, संवत्सरादिफलं, मासफलं, ग्रहस्थितिफलं, ग्रहदृष्टिफलम्, अरिष्टविचारः, आयुर्दायः, राजादियोगाश्च विवेच्यन्ते ।

## ज्योतिषशास्त्रोत्पत्तिः

ग्रहनक्षत्रजिज्ञासैव ज्योतिषशास्त्रस्याविर्भावे हेतुः ।

**वेदा हि यज्ञार्थमभिप्रवृत्ताः कालानुपूर्वा विहिताश्च यज्ञाः ।**

**तस्मादिदं कालविधानशास्त्रं यो ज्योतिषं वेद स वेद यज्ञान् ॥**

यज्ञार्थं वेदाः । यज्ञाः कालाश्रयेण सिद्ध्यन्ति । अतः ब्रह्मणा कालावबोधकं ज्योतिषशास्त्रं विनिर्माय नारदाय प्रावोचत्। नारदश्चास्य शास्त्रस्य महत्त्वमङ्गीकृत्य अस्मिन् लोके प्रवर्तयामास ।

## ज्योतिषशास्त्रस्य परम्परा

ज्योतिषशास्त्रस्य प्रधानरूपेण अष्टादशप्रवर्तकाः सन्ति ।

**सूर्यः पितामहो व्यासो वसिष्ठोऽत्रि पराशरः । कश्यपो नारदो गर्गो मरीचिर्मनुरङ्गिराः ।**

**रोमेशः पौलिशश्चैव च्यवनो यवनो भृगुः । शौनकोऽष्टादशश्चैते ज्योतिः शास्त्रप्रवर्तकाः ॥**

**भावार्थः-** सूर्यः, ब्रह्मा, व्यासः, वसिष्ठः, अत्रिःपराशरः,कश्यपः, नारदः, गर्गः, मरीचिः, मनुः, अङ्गिरा, रोमेशः, पौलिशः, च्यवनः, यवनः, भृगुः, शौनक इत्यादयः ज्योतिषशास्त्रस्य प्रवर्तकाः सन्ति ॥

## राशिज्ञानम्

**मेषो वृषोऽथ मिथुनः कर्कटः सिंहकन्यके ।**

**तुलाऽथ वृश्चिको धन्वी मकरः कुम्भमीनकौ ॥**

**अन्वयः-** अथ मेषःवृषभःमिथुनःकर्कःसिंहःकन्येःतुलाःवृश्चिकःधन्वीःमकरःकुंभःमीनः (राशयः सन्ति ।)

**व्याख्या-** **मेषः**-अजः **वृषः**-उक्षः **मिथुनः**-नृयुग्मः **कर्कः**-कुलिरः **सिंहः**-लेयः **कन्यके**-तरुणी **तुला**-वणिक् **वृश्चिकः**-अलिः **धन्वीः**-चापधारकः **मकरः**-नक्रः **कुंभ**-घटः **मीनः**-अन्त्यम्

**भावार्थः-** अत्र मेषादि-राशीनां नामानि दर्शितानि सन्ति । यथा मेषः, वृषभः, मिथुनः, कर्कः, सिंहः, कन्या, तुला, वृश्चिकः, धनुः, मकरः, कुंभः तथा मीनः इमानि राशीनामानि सन्ति ।

## मेषादिराशीनां पर्यायवाचिशब्दाः

**मेषाजविश्वक्रियतुम्बुराद्या वृषोक्षगौताबुरुगोकुलानि ।**

**द्वन्द्वं नृयुग्मं जुतुमं यमं च युगं तृतीयं मिथुनं वदन्ति ॥**

**अन्वयः-** आद्य मेष अज विश्व क्रिय तुम्बुर वृष उक्ष गौ ताबुरुः गोकुलं द्वन्द्वं नृयुग्मं जुतुमं यमं युगं तृतीयं मिथुनं वदन्ति ।

**व्याख्या-** **मेषः**-अजः विश्वः क्रियः तुम्बुरः **वृषः**-उक्षः गौ ताबुरु गोकुलः **मिथुनः**- द्वन्द्वः नृयुग्मं जुतुमः यमः युगः तृतीयः ।

**भावार्थः-** अत्र मेषादि राशीनां पर्यायवाचिनः शब्दाः प्रदत्ताः सन्ति । मेषराशेः अजः, विश्वः, क्रियः, तुम्बुर एवं वृषभराशेः उक्षः, गौः, ताबुरु, गोकुलः तथा मिथुनराशेः द्वन्द्वः, जुतुमः, यमः, युगः तृतीयः इत्यादीनि नामानि सन्ति ॥

**कुलीरककर्कोटककर्कटाख्याः कण्ठीरवः सिंहमृगेन्द्रलेयाः ।**

**पाथोनकन्यारमणीतरुण्यस्तौली वणिक्जूकतुलाघटाश्च ॥**

**अन्वयः-** कुलीरः, कर्कोटकः, कर्कटव, कण्ठीरवः, **सिंहः, कण्ठीरवः** मृगेन्द्रः, लेयाः, पाथोनः, कन्या, रमणी, तरुणी, तौली वणिक्, जूकः, घटः च आख्याः ।

**व्याख्या-** **कर्कः** - कुलीरः कर्कोटकः कर्कटः **सिंहः** - कण्ठीरवः मृगेन्द्रः लेयाः कन्याः पाथोनः रमणी तरुणी **तुला** - तौली वणिक् जूकः घटः च ।

**भावार्थः** अत्र कर्कादि-राशीनां पर्यायवाचिनः शब्दाः प्रदत्ताः सन्ति । कर्कस्य कुलीरः, कर्काटकः कर्कटः एवं सिंहराशेः कण्ठीरवः, मृगेन्द्रः, लेयः तथा कन्याराशेः पाथोनः, रमणी, तरुणी एवं तुलाराशेः तौली, वणिक्, जूक्ः, घटः इत्यादय पर्यायवाचिनः शब्दाः सन्ति ।

**अल्यष्टमं वृश्चिककौर्पिकीटाः धन्वी धनुश्चापशरासनानि ।**

**मृगो मृगास्या मकरश्च नक्रः कुम्भो घटस्तोयधराभिधानः ॥**

**अन्वयः-** अलिः, अष्टमं, वृश्चिकः, कौर्पिः, कीटाः, धन्वी, धनुः, चाप, शरासन इत्यादि मृगः, मृगास्यः, मकरः, नक्रः, कुम्भः, घटः, तोयं, धरा, (इत्यादयः) अभिधानः ।

**व्याख्या-** **वृश्चिकः**- अलिः, कौर्पिः, कीटः **धनुः**- धन्वी, चापः, शरासनश्च **मकरः**- मृगः, गास्यः, नक्रः, **कुम्भः**- घटः, तोयम्, धरा अभिधानम्-नाम

**भावार्थः** अत्र वृश्चिकादिराशीनां पर्यायवाचिनः शब्दाः प्रदत्ताः सन्ति । वृश्चिकराशेः अलिः, अष्टमं, कौर्पिः, कीटाः, धनुराशेः धन्वी, चापः, शरासनश्च । मकरराशेः मृगः, मृगास्यः, नक्रः एवं कुम्भराशेः घटः, तोयं, धरेति, पर्यायवाचिनः शब्दाः सन्ति ।

**मीनान्त्यमत्स्यपृथुरोमझषा वदन्ति**

**दस्त्रादिकर्क्षनवपादयुताः क्रियाद्याः ॥**

**चक्रस्थिता दिविचरा दिननाथसंख्याः**

**क्षेत्रर्क्षराशिभवनानि भसंज्ञितानि ॥**

**अन्वयः-** मीनः अन्त्यं मत्स्यः पृथुरोम झषः वदन्ति दस्त्रादिकः ऋक्षः नव नक्षत्रपादयुक्ताः क्रियाद्याः चक्रस्थिताः दिविचराः दिननाथसंख्याः क्षेत्रर्क्ष राशि भवनानि भसंज्ञकानि वदन्ति ।

**व्याख्या -** **मीनः**- अन्त्यः, मत्स्यः, पृथुरोमः, झष इत्यादि अपराणि नामानि सन्ति । **दस्त्रादिकः**-अश्विन्यादि **ऋक्षं**- नक्षत्रं **नवपादयुताः**- नवभागयुक्ताः **क्रियाद्याः**- मेषाद्याः **चक्रस्थिताः**- चक्ररूपेण स्थिताः **दिविचराः**- सूर्यादिग्रहाः **क्षेत्रर्क्षराशिः**-नक्षत्रमिलित्वा राशिभवनानि भवन्ति **भसंज्ञकानि** नक्षत्रसंज्ञकानि ।

**भावार्थः-** अस्मिन् श्लोके मीनराशेः अपराणि नामानि प्रदत्तानि सन्ति । यथा मीनः अन्त्यः, मत्स्यः, पृथुरोमा, झषेति। तथा च अश्विन्यादि नक्षत्राणां नवचरणानि मिलित्वा मेषादि राशयः भवन्ति । चक्रमध्ये नव-नवचरणानि मिलित्वा एकैकराशेः निर्माणं कुर्वन्ति ।

## नक्षत्रपादैः राशिविचारः

**अश्विनी भरणी कृत्तिका पादमेकं मेषः ॥ १ ॥**

**अन्वयः-** अश्विनी भरणी कृत्तिका पादम् एकं मेषः ।

**व्याख्या-** **अश्विनी**-दस्त्रः **भरणी**-यमः **कृत्तिका**-अग्निः **पादम्**-चरणम् **एकं**-एकं **मेषः**- क्रियः ।

**भावार्थः-** अश्विनीनक्षत्रस्य चत्वारि पादानि, भरणीनक्षत्रस्य चत्वारि पादानि तथा कृत्तिकानक्षत्रस्य एकं पादं मिलित्वा मेष राशिः भवति ।

**कृत्तिकायास्त्रयः पादा रोहिणी मृगशिरार्द्धं वृषभः ॥ २ ॥**

**अन्वयः-** **कृत्तिकायाः** त्रीणि पादानि रोहिणी मृगशिरा अर्द्धं वृषभः ।

**व्याख्या-** **कृत्तिकायाः**-कृत्तिकानक्षत्रस्य **त्रीणि**-अग्निः **पादाः** -चरणानि **रोहिणी**-ब्रह्मा **मृगशिरा**-मृगशीर्षः **अर्द्धं**-नक्षत्रस्य द्वौ पादौ **वृषभः**-गवि

**भावार्थः-** कृत्तिकानक्षत्रस्य त्रयः पादाः, रोहिणीनक्षत्रस्य चत्वारि पादानि तथा मृगशीर्षनक्षत्रस्य द्वौ पादौ मिलित्वा वृषभ राशिः भवति ।

**मृगशिरार्द्धमार्द्रा पुनर्वसुपादत्रयं मिथुनः ॥ ३ ॥**

**अन्वयः-** मृगशिरा अर्द्धम् आर्द्रा पुनर्वसु पादत्रयं मिथुनः ।

**व्याख्या-** **मृगशिरा**-मृगशीर्षः **अर्द्धम्**-द्वौ पादौ **आर्द्रा**-शिवः **पुनर्वसुः**-अदितिः **पादं**-चरणं **त्रयं**-त्रेतायुगं **मिथुनः**-द्वन्द्वः ।

**भावार्थः-** मृगशीर्षनक्षत्रस्य द्वौ पादौ, आर्द्रानक्षत्रस्य चत्वारि पादानि तथा पुनर्वसुनक्षत्रस्य त्रयः पादाः मिलित्वा मिथुन राशिः भवति ।

**पुनर्वसुपादमेकं पुष्यं माश्लेषान्तं कर्कः ॥ ४ ॥**

**अन्वयः-** पुनर्वसुपादम् एकं पुष्यम् आश्लेषान्तं कर्कः ।

**व्याख्या-** **पुनर्वसु**-पुनर्वसुनक्षत्रस्य **एकम्**- अन्तिमम् एकं पादं- चरणं पुष्यं-बृहस्पतिः **आश्लेषा**- सर्पः **अन्तं**-सम्पूर्णं **कर्कः**- कुलीरः ।

**भावार्थः-** पुनर्वसुनक्षत्रस्य अन्तिमम् एकं चरणम्, पुष्यनक्षत्रस्य चत्वारि चरणानि एवञ्च आश्लेषा नक्षत्रस्यापि चत्वारि चरणानि मिलित्वा कर्कराशिः भवतिः ।

**मघा च पूर्वाफाल्गुनी उत्तराफाल्गुनी पादमेकं सिंहः ॥ ५ ॥**

**अन्वयः-** मघा च पूर्वाफाल्गुनी उत्तराफाल्गुनी एकं पादं सिंहः ।

**व्याख्या-** **मघा**-पितृदेवः **च**-एवं **पूर्वाफाल्गुनी**-भगः **उत्तराफाल्गुनी**-अर्यमा **पादं**-चरणम् **एकम्**-आद्यं **सिंहः**-कण्ठीरवः।

**भावार्थः-** मघानक्षत्रस्य चत्वारि पादानि, पूर्वाफाल्गुनी-नक्षत्रस्य चत्वारि पादानि तथा उत्तराफाल्गुनी-नक्षत्रस्य एकं पादं सिंहराशिः भवति ।

**उत्तराफाल्गुन्यास्त्रयः पादा हस्तश्चित्रार्द्धं कन्या ॥ ६ ॥**

**अन्वयः-** उत्तराफाल्गुन्याः त्रयः पादाः हस्तःचित्रा अर्द्धं कन्या ।

**व्याख्या-** **उत्तराफाल्गुन्याः**- उत्तराफाल्गुनी-नक्षत्रस्य **त्रयः**- अग्निः **पादाः**-चरणानि **हस्त**-सूर्यः **चित्रा**-विश्वकर्मा **अर्द्धं**-द्वौ पादौ **कन्या**-तरुणी ।

**भावार्थः-** उत्तराफाल्गुनिनक्षत्रस्य त्रयः पादाः, हस्त नक्षत्रस्य चत्वारि पादानि तथा चित्रा नक्षत्रस्य द्वौ पादौ मिलित्वा सिंह राशिः भवतिः ।

**चित्रार्द्ध स्वाती विशाखापादत्रयं तुला ॥ ७ ॥**

**अन्वयः-** चित्रा अर्द्ध स्वाती विशाखा पादत्रयं तुला ।

**व्याख्या-** **चित्रा**-त्वष्ट्रानक्षत्रम् **अर्द्ध**-द्वौ पादौ **स्वाती**- वायुः **विशाखा**-इन्द्राग्निः **पादः**- चरणम् **त्रयं**-त्रेतायुगम् **तुला**-वणिक् ।

**भावार्थः-** चित्रानक्षत्रस्य द्वौ पादौ, स्वातीनक्षत्रस्य चत्वारि पादानि तथा विशाखानक्षत्रस्य त्रयः पादाः मिलित्वा तुलाराशिः भवति ।

**विशाखापादमेकमनुराधा ज्येष्ठान्तं वृश्चिकः ॥ ८ ॥**

**अन्वयः-** विशाखा पादम् एकम् अनुराधा ज्येष्ठान्तं वृश्चिकः ।

**व्याख्या-** **विशाखा**-विशाखा-नक्षत्रस्य **पादम्**-चरणम् **एकम्**-अन्तिमम् **अनुराधा**-मित्र **ज्येष्ठा**-इन्द्र **अन्तं**-सम्पूर्ण **वृश्चिकः**-अलिः ।

**भावार्थः-** विशाखा-नक्षत्रस्य एकं चरणम् अनुराधा-नक्षत्रस्य चत्वारि चरणानि तथा ज्येष्ठा-नक्षत्रस्य चत्वारि चरणानि मिलित्वा वृश्चिक-राशिः भवति ।

**मूलं च पूर्वाषाढोत्तराषाढा पादमेकं धनुः ॥ ९ ॥**

**अन्वयः-** मूलं च पूर्वाषाढा उत्तराषाढा पादम् एकं धनुः ।

**व्याख्या-** **मूलं**-निर्ऋतिः **पूर्वाषाढा**-जलम् **उत्तराषाढा**- विश्वेदेवा **पादम्**-चरणम् **एकम्**- आद्यम् **धनुः**-चापः ।

**भावार्थः-** मूल-नक्षत्रस्य चत्वारि पादानि, पूर्वाषाठा-नक्षत्रस्य चत्वारि पादानि तथा उत्तराषाठा-नक्षत्रस्य प्रथमं चरणं मिलित्वा धनुराशिः भवति ।

**उत्तरायास्त्रयः पादाः श्रवणं धनिष्ठार्द्ध मकरः ॥ १०॥**

**अन्वयः-** उत्तरायाः त्रयः पादाः श्रवणं धनिष्ठा अर्द्ध मकरः ।

**व्याख्या-** **उत्तरायाः** उत्तराषाढा-नक्षत्रस्य **त्रयः पादाः**-त्रीणि चरणानि **श्रवणं**-विष्णुम् **धनिष्ठा**-वसुः **अर्द्ध**-द्वौ पादौ **मकरः**-नक्रः ।

**भावार्थः-** उत्तराषाढा नक्षत्रस्य त्रयः पादाः, श्रवणनक्षत्रस्य चत्वारि पादानि तथा धनिष्ठा नक्षत्रस्य द्वौ पादौ मिलित्वा मकरराशिः भवति ।

**धनिष्ठार्द्धं शतभिषापूर्वाभाद्रपदा पादत्रयं कुम्भः ॥ ११॥**

**अन्वयः-** धनिष्ठाम् अर्द्धं शतभिषा पूर्वाभाद्रपदा पादत्रयं कुम्भः ।

**व्याख्या-** **धनिष्ठा**-धनिष्ठानक्षत्रस्य **अर्द्ध**-द्वौ पादौ **शतभिषा**- वरुणः **पूर्वाभद्रपदा**-अजचरणम् **पाद**-चरणम् **त्रयं**-त्रेतायुगम् **कुम्भः**- घटः ।

**भावार्थः-** धनिष्ठा-नक्षत्रस्य द्वौ पादौ, शतभिषा-नक्षत्रस्य चत्वारि पादानि तथा पूर्वाभाद्रपद-नक्षत्रस्य त्रयः पादाः मिलित्वा कुम्भराशिः भवति ।

**पूर्वाभाद्रपदा पादमेकमुत्तराभाद्रपदा रेवत्यन्तं मीनः ॥ १२॥**

**अन्वयः-** पूर्वाभाद्रापदा एकं पादम् उत्तराभाद्रपदा रेवती अन्तं मीनः ।

**व्याख्या-** **पूर्वाभाद्रापदा** - पूर्वाभद्रापदा-नक्षत्रस्य **एकं पादम्** - अन्तिमं चरणम् **उत्तराभाद्रपदा**-अहिर्बुध्न्यः **रेवत्यन्तं**-रेवती-नक्षत्रस्य अन्तिमचरणं यावत् **मीनः**-झषः ।

**भावार्थः-** पूर्वाभाद्रपदा-नक्षत्रस्य एकं चरणम्, उत्तराभाद्रपदा-नक्षत्रस्य चत्वारि चरणानि तथा रेवती नक्षत्रस्य चत्वारि चरणानि मिलित्वा मीनराशिः भवति ।

## नक्षत्र पादैः राशिज्ञानचक्रम्

| राशयः | मेषः | वृषभः | मिथुनः | कर्कः | सिंहः | कन्या | तुला | वृश्चिकः | धनुः | मकरः | कुम्भः | मीनः |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| नक्षत्रम् | अ. | कृ. | मृग. | पुन. | म. | उ.फा. | चित्रा | विशाखा | मूल | उ.षा. | धनि. | पू.भा. |
| पादः | ४ | ३ | २ | १ | ४ | ३ | २ | १ | ४ | ३ | २ | १ |
| नक्षत्रम् | भ. | रो. | आ | पु. | पु.फा. | हस्त | स्वाती | अनु. | पु.षा. | श्रवण | शत. | उ.भा. |
| पादः | ४ | ४ | ४ | ४ | ४ | ४ | ४ | ४ | ४ | ४ | ४ | ४ |
| नक्षत्रम् | कृ. | मृग. | पुन. | आ. | उ.फा. | चित्रा | विशाखा | ज्ये. | उ.षा. | धनिः | पु.भा. | रेवती |
| पादः | १ | २ | ३ | ४ | १ | २ | ३ | ४ | १ | २ | ३ | ४ |

## ॥ ग्रहाणाम् उच्चनीच-राशिविचारः ॥

**अजवृषभमृगाङ्गनाकुलीरा झषवणिजौ च दिवाकरादितुंङ्गाः ।**

**दशशिखिमनुयुक्तिथीन्द्रियांशैस्त्रिनवकविंशतिभिश्च तेऽस्तनीचाः ॥**

**अन्वयः-** अजः, वृषभः, मृगङ्गना, कुलीरा, झषः, वणिक् च दिवाकरादिः तुङ्गाः दश शिखि मनुयुक् तिथीः इन्द्रियांशैः त्रिनवकं विंशतिभिः च ते अस्तनीचाः ॥

**व्याख्या-** **अजः** मेषः **वृषभः** गवेन्द्रः **मृगः** मकरः **अङ्गना**- कन्या **कुलीरः** - कर्कः **झषः** मीनः **वणिक्** - तुला **दिवाकरादिः** - सूर्यादिग्रहाः **तुंङ्गाः** - उच्चैः स्थिताः **दश**-१० **शिखि**- ३ **मनुः** १४ **युक्** - संयुक्तः (२) (२८) **तिथि**- १५ **इन्द्रियांशैः**- ५ **त्रिनवकं**- २७ **विंशतिः**- २० **च**- एवं **ते**- ग्रहाः **अस्तनीचाः**- सप्तमस्थानगताः नीचाः भवन्ति ।

**भावार्थः-** अस्मिन् श्लोके क्रमशः ग्रहाणाम् उच्च-राशयः तथा ग्रहाणाम् अंशानि प्रदत्तानि सन्ति । यथा सूर्यः मेष-राशौ, चन्द्रः वृषभ-राशौ, भौमबुधशुक्रशनि क्रमशः मकर - कन्या - कर्क - मीन - तुलायाम् उच्चस्थाः भवन्ति । सूर्यादि ग्रहाणां क्रमशः अंशानि (१० ०३ २८ १५ ०५ २७ २० ) भवन्ति । उच्चस्थेषु ग्रहेषु सप्तमसंख्यां सम्मेल्य नीच-राशयः भवन्ति ।

## उच्चनीचग्रहचक्रम्

| ग्रहाः | सूर्यः | चन्द्रः | मङ्गलः | बुधः | गुरुः | शुक्रः | शनिः |
|---|---|---|---|---|---|---|---|
| उच्चः | 1 | 2 | 10 | 6 | 4 | 12 | 7 |
| अंशः | 10 | 3 | 28 | 15 | 5 | 27 | 20 |
| नीचः | 7 | 8 | 4 | 12 | 10 | 6 | 1 |
| अंशः | 10 | 3 | 28 | 15 | 5 | 27 | 20 |

## मेषादि-राशीनां वर्णाः

**रक्तः श्वेतः शुकतनुभिः पाटलो धूम्रपाण्डु-**
**श्चित्रः कृष्णः कनकसदृशः पिङ्गलः कर्बुरश्च ।**
**बभ्रुः स्वच्छः प्रथमभवनाद्येषु वर्णाः प्लवत्त्वं**
**स्वाम्याशाख्यं दिनकरयुताद् भाद् द्वितीयं च वेशिः ॥**

**अन्वयः-** रक्तः श्वेतः शुकतनुभिः पाटलः धूम्रपाण्डुः चित्रः कृष्णः कनकसदृशः पिङ्गलः कर्बुरः बभ्रुः स्वच्छश्च प्रथमभवनाद्येषु वर्णाः कथिताः । स्वाम्याशाख्यं प्लवत्त्वं दिनकरयुताद् भाद् द्वितीयं च वेशिः भवति ।

**व्याख्या-** **राशीनां वर्णानाह - मेषः** रक्तः **वृष**-श्वेतः **मिथुनः**- शुकतनुभिः हरितः क्रमशः **पाटलः**- ईषत्श्वेतरक्तः **धूम्रपाण्डु**-धूम्रवर्णः **चित्रः** अनेकवर्णयुक्तः **कृष्णः**- सितेतरः **कनकसदृशः**- पिशङ्गः **कर्बुरः**-शुक्लकपिलो मिश्रवर्णः **बभ्रुः**- कपिलः **स्वच्छः**- मत्स्यवर्णः **प्रथमभवनाद्येषु** - प्रथमः रक्त इत्यादिषु **वर्णाः**- रुचयः **स्वाम्याशाख्यं** - स्वामीदिशं **प्लवत्त्वं**- दिक्प्रवणत्यं यथा मेषराशिः दक्षिणप्लव इत्यादिकं **दिनकरः**- सूर्यः **युताद्**-युक्तात् **भाद्** - द्वितीयं च **वेशिः** वेशिसंज्ञः भवति ।

**भावार्थः-** अस्मिन् श्लोके मेषादि- राशीनां वर्णाः प्रदत्ताः सन्ति । मेषराशिः- रक्तवर्णः, वृषभः-श्वेतवर्णः, मिथुनः- हरितवर्णः, कर्कः- ईषत्श्वेवरक्तवर्णः, सिंहः- धूम्रवर्णः, कन्या-अनेकवर्णयुक्तः, तुला-कृष्णवर्णः, वृश्चिकः पीतवर्णः, धनम् - ईषत्कपिलवर्णः, मकरः शुक्लकपिलमिश्रवर्णः, कुंभ-कपिलवर्णः, मीनराशिश्च मत्स्यवर्णः तथा च स्वजन्म लग्नराशिः प्रश्नराशिर्वायद् दिक्प्लवो भवति । तां दिशं गतो राजा चिरेण रिपून् जयति यथा मेषवृश्चिकयोः अधिपतेः भौमस्य प्लव-दिशा दक्षिणाऽस्ति । तथा सूर्यः यस्मिन् राशौ स्थितः तस्मात् द्वितीयराशेः वेशि-संज्ञा भवति ।

## राशीनां दिग्ज्ञानम्

**क्रूरः सोम्यः पुरुषवनिते ते चरागद्विदेहाः**
**प्रागादीशाः क्रियवृषनृयुक्कर्कटाः सत्रिकोणाः ।**
**मार्तण्डेन्द्वोरयुजि समभे चन्द्रभान्वोश्च होरे**
**द्रेष्काणाः स्युः स्वभवनसुतत्रित्रिकोणाधिपानाम्॥**

**अन्वयः-** क्रूरः सौम्यः पुरुषवनिते ते चर अगः द्विदेहाः क्रिय-वृष-नृयुक्-कर्कटाः सत्रिकोणाः सह प्रागादीशाः । मार्तण्ड- इन्द्वोः अयुजि सम-भो चन्द्र भान्वोश्च होरे स्वभवन-सुत-त्रि-त्रिकोणाधिपानां द्रेष्काणाः स्युः ।

**व्याख्या-** **क्रूरः**- निर्दयः **सौम्यः**-मृदु **पुरुषविनते**-पुंस्त्रि **ते**-राशयः **चरः**-मेषकर्कटतुलामकराः चरराशयः **अगः**- वृषसिंहवृश्चिककुंभाः स्थिरराशयः **द्विदेहाः**- मिथुनकन्याधनूंषि-**मीनाः** द्विस्वभावराशयः **क्रिय**- मेषः **वृष**- वृषभः **नृयुक्**- मिथुनः **कर्कटाः**- कर्कः **सत्रिकोणाः** पञ्चमनवमेन सह **प्रागादिशाः**-पूर्वदिशातः **मार्तण्डः**- सूर्यः **इन्दुः**-चन्द्रः **अयुजि**- होराकुण्डल्याम् **होरे**- समराशौ प्रथमा होरा चन्द्रस्य द्वितीया होरा सूर्यस्य **द्रेष्काणाः**- द्रेष्काणाः स्वभवनः- प्रथमस्तद्राश्यधिपस्य द्वितीयः **सुतः**-पञ्चमाधिपः **त्रिः**-तृतीयः **त्रिकोणाधिपानां**- नवमाधिपानां **स्युः**- भवेयुः ।

**भावार्थः-** अस्मिन् श्लोके द्वादश-राशीनां क्रूर-सौम्य-पुरुष-स्त्री-चर-स्थिर-द्विस्वभाव-संज्ञा तथा च दिग्ज्ञानं वर्णितम् अस्ति । विषम-राशयः क्रूराः यथा मेष-मिथुन-सिंह-इत्यादयः-सम-राशयः सौम्याः यथा वृषभः कर्कः कन्या इत्यादयः तदेव पुरुष संज्ञा विषमराशेः तथा समराशेः स्त्रीसंज्ञाः च भवति । चर राशयः-

मेषकर्कतुलामकर-स्थिर-राशयः- वृषसिंहवृश्चिककुंभ द्विस्वभाव राशयः-मिथुनकन्याधनमीन इत्यादयः चर-स्थिर-द्विस्वभाव संज्ञाः सन्ति । मेषसिंहधनु प्राचः स्वामिनः वृषकन्यामकरः दक्षिणदिशः स्वामिनः मिथुनतुलाम्भः पश्चिमदिशः स्वामिनः कर्कवृश्चिकमीन उत्तरदिशः स्वामिनः सन्ति । ओजराशौ प्रथमा होरा सूर्यस्य द्वितीया चन्द्रस्य तथा समराशौ प्रथमा होरा चन्द्रस्य द्वितीया सूर्यस्य भवति । अनया रीत्या होराकुण्डली जायते । राशेः त्रयः विभागाः भवन्ति । प्रथमः भागः लग्नात् द्वितीयभागः पञ्चमात् तृतीयभागः नवमात् जायते इति द्रेष्काणः ।

| **राशयः** | **गुणधर्मः** | **क्रूरसौम्यौ** | **स्त्रीपुरुषौ** | **चरादयः** | **दिशालम्** |
|---|---|---|---|---|---|
| मेषः | विषमः | क्रूरः | पुरुषः | चरः | पूर्वः |
| वृषभः | समः | सौम्यः | स्त्री | स्थिरः | दक्षिणः |
| मिथुनः | विषमः | क्रूरः | पुरुषः | द्विस्वभावः | पश्चिमः |
| कर्कः | समः | सौम्यः | स्त्री | चरः | उत्तरः |
| सिंहः | विषमः | क्रूरः | पुरुषः | स्थिरः | पूर्वः |
| कन्या | समः | सौम्यः | स्त्री | द्विस्वभावः | दक्षिणः |
| तुला | विषमः | क्रूरः | पुरुषः | चरः | पश्चिमः |
| वृश्चिकः | समः | सौम्यः | स्त्री | स्थिरः | उत्तरः |
| घनु | विषमः | क्रूरः | पुरुषः | द्विस्वभावः | पूर्वः |
| मकरः | समः | सौम्यः | स्त्री | चरः | दक्षिणः |
| कुम्भः | विषमः | क्रूरः | पुरुषः | स्थिरः | पश्चिमः |
| मीनः | समः | सौम्यः | स्त्री | द्विस्वभावः | उत्तरः |

## कालपुरुषस्य अङ्गविभागगाः

**कालाङ्गानि वराङ्गमाननमुरो हृत्क्रोडवासोभृतो**

**बस्तिर्व्यञ्जनमूरुजानुयुगले जङ्घे ततोऽङ्घ्रिद्वयम् ।**

**मेषाश्विप्रथमानवर्क्षचरणाश्चक्रस्थिरता राशयो**

**राशिक्षेत्रगृहर्क्षभानि भवनं चैकार्थसम्प्रत्ययाः ॥**

**अन्वयः-** कालाङ्गानि वराङ्गं शिरम्-आननं-ऊरः-हृत् हृदयं क्रोडवासोभृतः कटिः बस्तिः- व्यञ्जनं लिङ्गं जानु युगलं जङ्घे ततो अङ्घ्रिद्वयं भवन्ति मेषादिराशयो अश्विन्यादि-प्रथम-नवर्क्षचरणाः चक्रस्थिताः । राशिःक्षेत्रं गृहम् ऋक्ष-भानि भवनं च एकार्थ-सम्प्रत्ययाः ।

**व्याख्या-** **कालाङ्गानि**-कालपुरुषस्य अङ्गानि **वराङ्गम्** - शिरम् **आननम्**- मुखम् **ऊरः**-अन्तःकरणं **हृत्**-हृदयम् **क्रोडवासोभृतः**- उदरम् **कटिः**- श्रोणिः बस्तिः, नाभ्यधोभागः **व्यञ्जनम्** - लिङ्गम् **ऊरूजानुयुगले**-ऊरूद्वयं, जानुद्वयम् **जङ्घे**-जङ्घाभागे **अंघ्रिद्वयं**-पादौ **कालाङ्गनि**-कालपुरुषस्य अङ्गानि **मेषादि-राशयः** -द्वादशराशयः **अश्विन्यादि**-अश्विनीनक्षत्रात् **प्रथम**-प्रथमचरणं **नवर्क्षचरणाः**-नवमचरणपर्यन्तं-चरणानि **चक्रस्थिता**-मण्डले स्थिता **राशि**-मेषादयः **क्षेत्रम्**-स्थानम् **गृहम्** - लग्नम् **ऋक्षः** - नक्षत्रम् **भानि**-नक्षत्राणि **भवनम्**-गृहम् **एकार्थसम्प्रत्ययाः**-आकाशमण्डले द्वादशराशयः स्थिराः भवन्ति ।

**भावार्थः-** अस्मिन् श्लोके कालपुरुषस्याङ्गानि कल्पितानि सन्ति । कालपुरुषस्य मेषराशिः-मस्तकं, वृषभः-मुखं, मिथुनः-भुजौ, कर्कः-हृदयं, सिंहः-उदरं, कन्या-कटी, तुला-मूत्रेन्द्रियं, वृश्चिकः गुह्येन्द्रियं, धनुः-ऊरू, मकरः-जानू, कुंभः-जंघे, मीनश्च-पादौ रूपेण स्थिताः सन्ति । मानवानां जन्मसमये कालपुरुषस्याङ्गानि आधारीकृत्य विचारः कर्तव्यः ।



## कालपुरुषस्य आत्मादिविभागः

**कालात्मादिनकृन्मनश्चहिमगुः सत्त्वं कुजो ज्ञो वचो**

**जीवो ज्ञानसुखे सितश्च मदनो दुःखं दिनेशात्मजः ।**

**राजानौ रविशीतगू क्षितिसुतो नेता कुमारो बुधः**

**सूरिर्दानवपूजितश्च सचिवः प्रेष्यः सहस्त्रांशुजः ॥**

**अन्वयः-** दिनकृत् आत्मा कालस्य मनः हिमगुः सत्त्वं कुजो, वचः ज्ञः, ज्ञानं सुखं जीवो, मदनो सितश्च, दुःखं दिनेशात्मजः च राजानौ रविशीतगू, नेता क्षितिसुतौ कुमारो बुधः सचिवः सूरिः दावनपूजितश्च, प्रेष्यः सहस्रांशुजः ।

**व्याख्या-** **दिनकृत्** - दिवसकृत् **आत्मा** - चैतन्यम् **कालस्य** कालपुरुषस्य **मनः**- चित्तः **हिमगुः**- चन्द्रः **सत्त्वं**-बलम् **कुजः**-मङ्गलः, **वचः**-वाक् **ज्ञः**-बुधः, **ज्ञानं सुखं च** - विद्यादिसुखम् **जीवः**-बृहस्पतिः, **मदनः**-कामः **सितश्च**-भार्गवः, **दुःखम्** - सुखस्य विरोधी **दिनेशात्मजः**- शनि **राजानौ**-नृपौ **रविशीतगू**-दिनेशचन्द्रौ, **नेता**-नायकः **क्षितिसुताः**-मङ्गलः **कुमारः** - युवराजः **बुधः**-सौम्यः **सचिवः** - मन्त्री **सूरिः**-देवगुरुः **दानवपूजित**-शुक्रः, **प्रेष्यः**- भृत्यः **सहस्त्रंशुजः**-अर्कजः ॥

**भावार्थः-** कालपुरुषस्य सूर्यः- आत्मा चन्द्रः - मनः मङ्गलः- बलं बुध-वाक् जीवः- विद्यादिसुखं भार्गवः-कामः

दिनेशात्मजः दुःखं अस्ति । तथा च राजपरिवाररूपेण राजानौ सूर्यचन्द्रमसौ, मङ्गलः-नेता बुधः-कुमारः मन्त्रिणौ-गुरूशुकौ तथा सेवकः अर्कजः अस्ति ।

## आत्मादीनां शुभाशुभत्वम्

**प्रभाकरौ शीतकरप्रभाकरौ ताराग्राहः पञ्च धरासुतादयः ।**

**तमः स्वरूपौ शिखिसिंहकासुतौ शुभाः शशिज्ञामरबन्धभार्गवाः ॥ १ ॥**

**अन्वयः-** शीतकरप्रभाकरौ प्रभाकरौ धरासुतादयः पञ्च ताराग्रहाः शिखिसिंहिकासुतौ तमः स्वरूपौ शशिज्ञामरवन्ध्यभार्गवाः शुभाः ।

**व्याख्या-** **शीतप्रभाकरौ**-चन्द्रार्कौ **प्रभाकरौ**- प्रकाशकरौ **धरासुतादयः**-मङ्गलादयः पञ्च मङ्गल-बुध-गुरु-शुक्र-शनयः **ताराग्रहाः**-नक्षत्रनाथाः **शिखिसिंहकासुतौ** - राहुकेतू **तमःस्वरूपौ**- छायाग्रहौ **शशिज्ञामरबन्धभार्गवाः**- चन्द्र-बुध-बृहस्पति-शुक्र-ग्रहाः **शुभाः**-शुभकराः ।

**भावार्थ-** सूर्यः तथा चन्द्रमाः प्रकाशग्रहौ स्तः । भौमादि-भौमबुधगुरुशक्रशनयः पञ्चग्रहाः ताराग्रहा इत्याभिधानेन ज्ञायन्ते। राहुकेतू छायाग्रहौ स्तः एवं चन्द्रमाबुधबृहस्पतिशुक्रराहवः शुभफल-प्रदायकाः भवन्ति ।

**क्षीणेन्दुमन्दरविराहुशिखिक्षमाजाः**

**पापास्तु पापयुतचन्द्रसुतश्च पापः ।**

**तेषामतीव शुभदौ गुरुदानवेज्यौ**

**क्रूरौ दिवाकरसुतक्षितिजौ भवेताम् ॥ २ ॥**

**अन्वयः-** क्षीणेन्दुमन्दरविराहुशिखिक्षमाजाः पापास्तु पापयुत-चन्द्रसुतः च पापः । तेषां गुरुदानवेज्यौ अतीव शुभदौ दिवाकरसुत-क्षितिजौ क्रूरौ भवेताम्।

**व्याख्या-** **क्षीण**-क्षययुक्तः **इन्दुमन्दरविराहुशिखिक्षमाजाः**-चन्द्रशनिसूर्यराराहुकेतुमङ्गलाः **पापाः**- पापिनः **पापयुतचन्द्रसुतः**- पापग्रहयुक्तबुधः **पापः**- पापग्रहः **तेषु**-एषु ग्रहेषु **गुरुदानवेज्यौ**-बृहस्पतिभार्गवौ **अतीव**-अधिकं **शुभदौ**- शुभदायकौ **दिवाकरसुतक्षितिजौ**-शनिमङ्गलौ **क्रूरौ**- निष्ठुरौ **भवेताम्**-स्याताम् ।

**भावार्थः-** क्षतियुक्तः चन्द्रमाशनिसूर्यराहुकेतुमङ्गलाः पापग्रहाः सन्ति । एतेषां पापग्रहैः सह युक्तो बुधोऽपि पापग्रहः एव एषु ग्रहेषु बृहस्पतिशुक्रौ सर्वाधिकं शुभदौ ग्रहौ वर्तेते । शनिमङ्गलौ क्रूरौ ग्रहौ स्याताम् ।

**शुक्लादिरात्रिदशकेऽह्नि मध्यवीर्य-**

**शाली द्वितीयदशकेऽति शुभप्रदोऽसौ ।**

**चन्द्रस्तृतीय-दशके बलवर्जितस्तु**

**सौम्येक्षणादिसहितो यदि शोभनः स्यात् ॥ ३॥**

**अन्वयः-** शुक्लादिरात्रिदशके अहनि मध्यवीर्यशाली असौ द्वितीयदशके अतिशुभप्रदः । चन्द्रः तृतीयदशके बलवर्जितः यदि सौम्यक्षणादि-सहितः तु शोभनः स्यात्।

**व्याख्या-** **शुक्लादिरात्रिदशके**-शुक्लपक्षस्य दशरात्रिसमूहे **अह्नि**- दिवसे **मध्यवीर्यशाली**- मध्यमबलयुक्तः **द्वितीयदशके**- द्वितीयदशदिवससमूहे **शुभप्रदः**-शुभप्रदायकः **चन्द्रः**-निशापतिः **तृतीयदशके** - तृतीयदशदिवससमूहे **बलवर्जितः** - बलरहितः **सौम्येक्षणादिसहितः**-शुभग्रहद्रष्टियुक्तः **शोभनः**-सुन्दरः लाभदायी **स्यात्** -भवेत् ।

**भावार्थः-** शुक्लपक्षस्य प्रारम्भात् अर्थात् प्रतिपदातिथितः दशमीतिथि-पर्यन्तं प्रथमदशके चन्द्रमा मध्यबलशाली भवति । द्वितीयदशके अर्थात् शुक्लपक्षस्य एकादशीतिथितः कृष्णपक्षस्य पञ्चमीतिथिपर्यन्तं द्वितीयदशके असौ चन्द्रः शुभफलप्रदायकः भवति । तृतीयदशके अर्थात् कृष्णपक्षस्य षष्ठीतः अमावास्यां यावत् दशदिनेषु चन्द्रः बलवर्जितो भवति । किन्तु यदि शुभग्रहैः सह युक्ते वा दृष्टे सति शुभदो भवति।

## दिशास्वामिनः शुभाशुभफलम्

**प्रागादिका भानुसितारराहुमन्देन्दुविद्देवपुरोहिताः स्युः ॥**

**शुक्रारचन्द्रज्ञसुरेज्यमन्दा वसन्तमुख्यत्वधिपा दृगाणैः ॥**

**अन्वयः**- प्रागादिका भानुः सितः आरः राहुः मन्दः इन्दुः-विद् देवपुरोहितः स्युः । शुक्रः आरः चन्द्रः ज्ञः सुरेज्यः मन्दः वसन्तमुख्यः तु अधिपा दृगाणैः स्युः ।

**व्याख्या**- **प्रागादिका**- पूर्वादिदिशः **भानुः**-अर्कः **सितार**-भार्गवभौमौ **आरः**-भौमः **राहुः**-छायाग्रहः **मन्दः**-अर्कजः **इन्दुः**-चन्द्र **विद्**-बुधः **देवपुरोहितः**- बृहस्पतिः **स्युः**-भवेयुः **शुक्रः**-उशना **आरः**-मङ्गलः **चन्द्रः** ओषधीशः **ज्ञः**-बुधः **सुरेज्यः** वाचस्पतिः **मन्दः**-मानुजः **वसन्तमुरव्यः**-वसन्तादि **अधिपाः**-स्वामिनः **दृगाणैः** ज्ञातव्यम्।

**भावार्थः**- अस्मिन् श्लोके दिक्पतयः तथा च ऋतुस्वामिनः निर्दिष्टाः सन्ति । तत् पूर्वादिक्रमेण पश्यामः । पूर्वः-अर्कः अग्निः- भार्गवः दक्षिणः-भौमः नैऋतिः- राहुः पश्चिमः-मन्दः वायव्यः-शुभ्रांशुः उत्तरः-बुधः ईशानः-बृहस्पतिः इमे अष्टौ दिक्पतयः सन्ति । वसन्तः-शुक्रः ग्रीष्मः मङ्गलः वर्षा-चन्द्रः शरद्-बुधः हेमन्तः वाचस्पतिः शिशिरः-भानुजः अमी ऋतुस्वामिनः सन्ति ।

## विप्रादिवर्णानां स्वामिनः

**विप्रो जीवसितौ दिनेशरुधिरौ भूपालकौ वैश्यराड्**

**इन्दुः शुद्रकुलाधिपः शशिसुतो मन्दोऽवराणां पतिः ।**

**आदित्यामरमन्त्रिशीतकिरणाः सत्त्वप्रधानग्रहाः**

**शुक्रज्ञौ सरजोगुणौ शनिधरापुत्रौ तमः स्वामिनौ ॥**

**अन्वयः**- जीवसितौ विप्रौ दिनेशरुधिरौ भूपालकौ इन्दुः वैश्यराड् शशिसुतः शुद्रकुलाधिपः मन्दः अवराणां यतिः आदित्यामरमन्त्रिशीतकिरणाः सत्त्वप्रधानग्रहाः शुक्रज्ञौ सरजोगुणौ शनिधरापुत्रौ तमः स्वामिनौ ।

**व्याख्या**- **जीविसतौ**-भार्गवबृहस्पती **विप्रौ**-द्विजौ **दिनेशरुधिरौ**-अर्कभौमौ **भूपालकौ**-क्षत्रियौ **इन्दुः**-चन्द्रः **वैश्यराड्**-वैश्यः **शशिसुतः**-बुधः **शुद्रकुलाधिपः**- शुद्राधिपः **मन्दः**-मित्रजः **अवराणां**-शूद्राणां **पतिः**-अधिपः **आदित्यामरमन्त्रिशीतकिरणाः**-अर्कबृहस्पतिचन्द्रमसः **सत्त्वप्रधानग्रहाः**-बलप्रधाननक्षत्रनाथाः **शुक्रज्ञौ**-भार्गवबुधौ **सरजोगुणौ**-रजोगुणयुक्तौ **शनिधरापुत्रौ**-मन्दमङ्गलौ **तमः स्वामिनौ**-तमाधिपौ ।

**भावार्थः**- अस्मिन् श्लोके ग्रहाणां वर्णविचारः तथा च गुणविचारः प्रदर्शितः । भार्गवबृहस्पती ब्राह्मणौ सूर्यमङ्गलौ क्षत्रियौ चन्द्रमावैश्य बुधः शुद्रकुलाधिपः एवं मित्रजः शुद्राणां पतिः । अर्कबृहस्पतिचन्द्रमसः सत्त्वप्रधानग्रहाः सन्ति । भार्गवबुधौ रजोगुणप्रधानग्रहौ स्तः । शनिधरापुत्रौ तमोगुणप्रधान-ग्रहौ वर्तेते ।

## ग्रहाणां देवानां स्वामिनश्च

**शाखाधिपा जीवसितारबोधना धातुस्वरूपद्युचरौ कुजारुणौ ।**

**मूलप्रधानौ तुहिनाकरार्कजौ जीवौ सितार्यौ तु विमिश्र इन्द्रुजः ॥**

**अन्वयः**- जीव सितार बोधना शाखाधिपा धातुस्वरूप-द्युचरौ कुजारूणौ मूलप्रधानौ तुहिनाकर अर्कजौ जीवौ सितार्यौ इन्दुजः तु विमिश्रः ।

**व्याख्या**- **जीवः**-गुरुः **सितार**-भार्गवभौमौ **शाखाधिपाः**-ऋग्वेदाधिपाः **अधिपः**-स्वामी **धातुरूप**- धातुरूपसंज्ञक **द्युचरौ**-ग्रहौ **कुजः**-भौमः **अरुणः**-सूर्यः **मूलप्रधानः**-मूलसंज्ञकः **तुहिनारः**-चन्द्रः **अर्कजः**-सूर्यपुत्रः, शनिः **विमिश्र**-मिश्रसंज्ञकः **सितः**-शुक्रः **जीवः**-गुरुसंज्ञकः **इन्दुजः**-बुधः ।

**भावार्थः-** ऋग्वेदादि-शाखानां स्वामिनः क्रमशः बृहस्पतिः शुक्रः भौमः एवं बुधः वर्तते । ऋग्वेदः-बृहस्पतिः यजुर्वेदः-शुक्रः सामवेदः-भौमः अथर्ववेदः- बुधः वर्तते । सूर्यः भौमः इमौ द्वौ ग्रहौ धातुरूपसंज्ञको स्तः । भृगुः बृहस्पतिः द्वौ ग्रहौ जीवसंज्ञकौ तथा बुधः मिश्रसंज्ञकः वर्तते ।

## गृहदृष्टि स्थानानि

**पादैकदृष्टिर्दशमे तृतीये द्विपाददृष्टिर्नवपञ्चमे च ।**

**त्रिपाददृष्टिश्चतुरष्टके वा संपूर्णदृष्टिः किल सप्तमे च ॥**

**तृतीये दशमे मन्दो नवमे पञ्चमे गुरुः ।**

**विंशतिर्वीक्षते विश्वांश्चतुर्थे चाष्टमे कुजः ।।**

**अन्वयः-** एकपाद-दृष्टिः दशमे तृतीये, द्विपाददृष्टिः नव पञ्चमे च, त्रिपाद-दृष्टिः चतुः-अष्टके वा, संपूर्णदृष्टिः किल सप्तमे च ॥ तृतीये दशमे मन्दः, नवमे पञ्चमे गुरुः विंशतिः वीक्षते विश्वान् चतुर्थे चाष्टमे कुजः ॥

**व्याख्या-** **पादैकदृष्टिः**-प्रथमचरणदृष्टिः **दशमे**-दशमस्थाने **तृतीये**-तृतीयस्थाने **द्विपाददृष्टिः**-द्वितीय-चरण-दृष्टिः **नव**-नवमस्थाने **पञ्चमे**-पञ्चमस्थाने **च**-एवं **त्रिपाद-दृष्टिः** तृतीयचरणदृष्टिः **चतुः**-चतुर्थस्थाने **अष्टके**-अष्टमस्थाने **वा**-अथवा **संपूर्णदृष्टिः**-पूर्णदृष्टिः **सप्तमे**-सप्तमस्थाने **तृतीये**-तृतीयस्थाने **दशमे**-दशमस्थाने **मन्दः**-शनिः **नवम**-नवमस्थाने **पञ्चमे**-पञ्चमस्थाने **गुरुः**-बृहस्पतिः **चतुर्थे**-चतुर्थस्थाने **अष्टमे**-अष्टमस्थाने **कुजः**-भौमः **वीक्षते**-दृश्यते ।

**भावार्थः-** अस्मिन् श्लोके दृष्टिविचारः दर्शितः अस्ति । सूर्यः चन्द्रः बुधः एवञ्च शुक्रः स्वस्थानात् दशमे तथा तृतीये एकपाद दृष्टिं एवं नवमपञ्चम-स्थाने द्विपाद-दृष्टिं तथा चतुर्थाष्टमे त्रिपाददृष्टिं कुर्वन्ति । सर्वे ग्रहाः स्वस्थानात् सप्तमस्थाने सम्पूर्णदृष्टिं कुर्वन्ति । शनैश्चरः स्वस्थानात् तृतीय-दशमस्थाने तथा गुरुः नवम-पञ्चमस्थाने तथा च भौमः स्वस्थानात् चतुर्थ-अष्टमस्थाने सम्पूर्णदृष्टिं करोति ।

## ग्रहाणां मित्रमित्राणि

**अन्योऽन्यतः सोदरलाभमानपातालवित्तव्ययराशिसंस्थाः ।**

**तत्कालमित्राणि खगा भवन्ति तदन्ययाता यदि शत्रवस्ते ॥**

**अन्वयः-** अन्यः अन्यतः सोदर-लाभमान-पाताल-वित्त-व्यय-राशि-संस्थाः खगाः तत्कालमित्राणि भवन्ति । यदि तद् अन्य-राशि-संस्थाः ते शत्रवः भवन्ति ।

**व्याख्या-** **अन्यः**-इतरः **अन्यतः** इतरतः **सोदरः**-तृतीयः **लाभः**-एकादशः **मानं**-दशमः **पातालं**-चतुर्थः **वित्तं**-द्वितीयं **व्ययः**-द्वादशः **राशि**-संस्थाः **खगाः**-ग्रहाः **तत्कालमित्राणि**-तत्कालिकमित्राणि भवन्ति । **यदि तद् अन्य**-अविशिष्ट **ते**-राशयः **शत्रवः**तत्कालिक-शत्रवः भवन्ति ॥

**भावार्थः-** अत्र कथितम् अस्ति ये ग्रहाः स्वस्थानात् द्वितीय-तृतीय-चतुर्थ-दशम-एकादश-द्वादश स्थानेषु स्थिताः ग्रहाः ते तत्कालिक-मित्राणि भवन्ति । तथा च अवशिष्ट-स्थानानि प्रथम-पञ्चम-षष्ठम-सप्तम-अष्टम-नवमस्थानेषु स्थिताःये ग्रहाः ते तात्कालिकशत्रवः भवन्ति ।

## ग्रहाणां नैसर्गिकमैत्री

**रवेः समो ज्ञो मित्राणि चन्द्रारेज्याः परावरी ।**

**इन्द्रोर्न शत्रवो मित्रे रविज्ञावितरे समाः ॥**

समौ कुजस्यशुक्रार्की बुधोऽरिः सुहृदः परे ।
ज्ञस्य चन्द्रो रिपुमित्रे शुक्रार्कावितरे समाः ॥
गुरोरार्केन्दुमित्राण्यार्की मध्यः परावरी ।
भृगोः समाविज्यकुजौ मित्रे ज्ञार्की परौ रिपु ॥
शनेर्गुरुः समो मित्रे शुक्रज्ञौ शत्रवः परे ।

**अन्वयः-** रवेः समः ज्ञः मित्राणि चन्द्र-आर-इज्याः परावरी इन्दोः शत्रवः न मित्रे रविः-ज्ञः इतरे समाः कुजस्य सामे शुक्रार्की बुधः अरिः सुहृदः परे ज्ञस्य चन्द्रः रिपु-मित्रे शुक्र-अर्कौ इतरे समाः गुरोः आर-अर्क-इन्दु-मित्राणि अर्की-परौ रिपू शनेः गुरुः समः मित्रे शुक्रज्ञौ शत्रवः परे ।

**व्याख्या-** **रवेः**-मानोः **सगः**-मध्य **ज्ञः**-बुधः **मित्राणि**-सुहृदः **चन्द्रः**-शीतरश्मिः **आरः** - भौमः **इज्यः**-गुरुः **परावरी**-अन्ये अवशिष्टाः **इन्दोः**-चन्दस्य **न**-नास्ति **शत्रवः**-अरयः **मित्रे**-सुहृदे **रविः**-सूर्यः **ज्ञः** बुधः **इतरे**-अवशिष्टे **समाः**-मध्याः **कुजस्य**-भौमस्य **समौ**-मध्यौ **शुक्र**-उशना **अर्की**- शनिः **बुधः**-ज्ञः **अरिः**-शत्रुः **मित्रे**-सुहृदौ **शुक्रः**-भार्गवः **अर्कः**-सूर्यः **इतरे**-अन्ये **समाः**-मध्याः **गुरोः**-बृहस्पतेः **आरः**-भौमः **अर्कः**-भास्करः **इन्दुः**-चन्द्रः **मित्राणि**- सुहृदः **अर्की**-मन्दः **मध्यः**-समः **परावरी**-अन्ये **अवशिष्टः** **भृगोः**-कवेः **समः**-मध्यः **इज्यः**-गुरुः **कुजः**-**अङ्गारकः** **मित्रे**-बान्धवे **ज्ञः**-बुधः **आर्की**-शनिः **परौ**-अपरौ **रिपुः**-शत्रुः **शनेः**-मन्दस्य **गुरुः**-वाचस्पतिः **समः**-मध्यः **मित्रे**-सुहृदौ **शुक्रः**-भृगुः **ज्ञः** सौम्यः **शत्रवः** रिपवः **परे**-अन्ये ॥

**भावार्थः-** अनेन कोष्टकेन सम्यक् रीत्या ज्ञायते ।

| ग्रहः/मैत्री आदि | सूर्यः | चन्द्रः | भौमः | बुधः | बृहस्पतिः | शुक्रः | शनिः | राहुः | केतुः |
|---|---|---|---|---|---|---|---|---|---|
| मित्रम् | चं. मं. बृ. | सू. बु. | सू. चं. बृ. | सू. शु. | सू. चं. मं. | बु. श. | बु. शु. | शु. बृ. श. | शु. बृ. श. |
| सम : | बु. | बृ. मं. शु. श. | शु. श. | बृ. श. मं. | श. | मं. बृ. | बृ. | -- | -- |
| शत्रुः | शु. श. | -- | बु. | चं. | शु. बु. | सू. चं. | सू. चं. मं. | सू. चं. मं. बु. | सू.चं., मं.बु. |

## स्वाध्यायः

१. **योग्यं विकल्पं चित्वा उत्तरं लिखत ।**

(१) ज्योतिषशास्त्रस्य साक्षिणौ कौ ?

(क) भौमचन्द्रौ (ख) बुधार्कौ (ग) शुक्रज्ञौ (घ) चन्द्रार्कौ

(२) ज्योतिषशास्त्रे कति श्लोकाः सन्ति ?

(क) एकलक्षम् (ख) चतुर्लक्षम् (ग) द्विलक्षम् (घ) पञ्चलक्षम्

(३) कालावबोधकं शास्त्रं किम् ?

(क) ज्योतिषम् (ख) वयाकरणम् (ग) मीमांसा (घ) धर्मशास्त्रम्

(४) प्रधानतया ज्योतिषशास्त्रस्य कति भागाः स्वीकृताः ?

(क) एकम् (ख) द्वौ (ग) त्रयः (घ) चत्वारः

(५) ज्योतिषशास्त्रसय कति प्रवर्तकाः सन्ति ?

(क) षोडश (ख) पञ्चदश (ग) अष्टादश (घ) विंशतिः

(६) सिंहराशेः अपरं नाम किम् ?

(क) नक्रः (ख) घटः (ग) अन्तिः (घ) लेयः

(७) नृयुग्म नाम का राशिः ?

(क) कन्या (ख) मिथुनः (ग) मीनः (घ) मेषः

(8) जुतुम् अर्थात् किम् ?

(क) मेषः (ख) मिथुनः (ग) कर्कः (घ) तुला

(9) कन्याराशेः अपरं नाम किम् ?

(क) पाथमिः (ख) कण्ठीरवः (ग) तौलिः (घ) तोयम्

(10) एकस्मिन् एकराशौ कति नक्षत्रचरणानि भवन्ति ?

(क) चत्वारि (ख) षड् (ग)नव (घ) द्वादश

२. **एकैकवाक्येनोत्तराणि लिखन्तु ।**

(१) शिखि सिंहिकासुतौ कयोः ग्रहयोः नाम्नी वर्तेते ?

(२) पापग्रहाः के के सन्ति ?

(३) प्राग्दिशा अर्थात् का दिशा ?

(४) नैर्ऋत्यदिशः स्वामी ग्रहः कः ?

(५) क्षत्रियग्रहौ कौ स्तः ?

(६) ऋग्वेदस्य स्वामी ग्रहः कः ?

(७) पातालः कस्य भावस्य संज्ञा ?

(८) सम्पूर्ण-दृष्टिः कस्मिन् भावे भवति ?

(९) हेलिः कस्य ग्रहस्य संज्ञा ?

(१०) चरराशयः के सन्ति ?

३. **श्लोकपूर्तिं कृत्वा भावार्थो लेख्यः ।**

(१) अन्योऽन्यतः ----------- यदि शत्रवस्ते ॥

(२) शुक्लादिरा------------- शोभनः स्यात् ॥

(३) कालाङ्गानि ------------- चैकार्थसम्प्रत्ययाः ॥

**४. अ विभागेन सह ब विभागं योजयतः ।**

| **अ** | **ब** |
|---|---|
| (१) सूर्यः | (१) मित्रम् |
| (२) मङ्गलः | (२) सप्तमभावः |
| (३) दिनेशात्मजः | (३) आत्मा |
| (४) कलत्र | (४) सत्त्वम् |
| (५) सुहृद् | (५) शनिः |

**५. टिप्पणी लेख्या ।**

(१) ज्योतिषशास्त्रस्य प्रवर्तकाः ।

(२) नक्षत्र्यादिराशिविचारः ।

(३) उच्चनीचराशिविचारः ।

(४) चरादिराशिज्ञानम् ।

(५) कालपुरुषस्याङ्गनि ।

**६. विस्तरेणोत्तराणि लिखत ।**

(१) ग्रहाणां नैसर्गिकमैत्रीविचारः ।

(२) द्वादशराशीनां पर्यायवाचिनः शब्दाः ।

(३) आत्मादीनां शुभाशुभत्वम् ।

●

# २ लग्नादिसंज्ञाध्यायः

## प्रस्तावना

पूर्ववर्तिप्रकरणे अस्माभिः राशिज्ञानं नक्षत्रानुसारं राशिज्ञानं वर्णादिङ्संज्ञा ग्रहाणामुच्चनीचराशिसंज्ञा पुरुषादिसंज्ञा स्वामिनःज्ञानं ग्रहज्ञानाध्यायश्चाधीतः । जातकस्य जन्मकालिकफलज्ञानाय राश्यादीनां ज्ञानं साहाय्यं विदधाति । जातकस्य शुभाशुभज्ञानस्य सूक्ष्मनिरीक्षणार्थं तन्वादि-द्वादशभावानां संज्ञा-ज्ञानं, तन्वादिनां विशिष्टसंज्ञाज्ञानं ग्रहस्वरूपवर्णनमपि अत्यावश्यकरूपेण ज्योतिर्विदैः निर्देशितमस्ति । अत एव प्रकरणेऽस्मिन् उपर्युक्तज्ञानं वयं प्राप्स्यामः । जन्मपत्रे यः सर्वाधिकबलशाली तत्तुल्य स्वरूपशीलो बालो भवति वा चौरवयोरूपजातिप्रकृतिज्ञानाय ग्रहस्वरूपवर्णनमत्र वर्णित-मस्ति।

## तन्वादिभावानां संज्ञा

### लग्नादीनां संज्ञाकथनम्

**देहं द्रव्यपराक्रमौ सुखसुतौ शत्रुः कलत्रं मृति -**

**भाग्यं राजपदं क्रमेण गदिता लाभव्ययौ लग्नतः ।**

**भावा द्वादश तत्र सौख्य-शरणं देहं मतं देहिनां**

**तस्मादेव शुभाशुभाख्यफलजः कार्यो बुधैर्निर्णयः ॥ १ ॥**

**अन्वयः-** लग्नतः क्रमेण देहं द्रव्यं पराक्रमः सुखं सुतः शत्रुः कलत्रं मृतिः भाग्यं राजपदं लाभः व्ययः (एते) द्वादशभावाः (संज्ञा) गदिताः । तत्र देहिनां सौख्यं शरणं देहं गतम् । (अतो) बुधैः तस्मादेव शुभाशुभाख्यफलजः निर्णयः कार्यः ।

**व्याख्या-** **लग्नतः**- लग्नस्थानात् **क्रमेण**-क्रमानुसारेण **देहं** शरीरं **द्रव्यं**-धनं **पराक्रमः**-शौर्यम् **सुखं**-हर्षः **सुतः**-पुत्रः **शुत्रः**- रिपुः **कलत्रं**-भार्या, **मृतिः**-मृत्युः, **भाग्यं**-दैवं राजपदं राज्यस्थानं **लाभः**-साफल्यं **व्ययः**-(एते) **द्वादशभावसंज्ञाः गदिताः**-कथिताः। **तत्र देहिनां**-शरीरधारिणां **सौख्यशरणं**-सुखाश्रयं **मतम्** -उक्तम्। अतो **बुधैः**-विद्वद्भिः **तस्मादेव**-तस्मात् कारणात् **शुभाशुभाख्यफलजः** शुभः अशुभः च **निर्णयः**-निश्चयः कार्यः ।

**भावार्थः-** जन्मकुण्डल्यां द्वादशभावाः भवन्ति तत्र-क्रमेण (प्रथमं) देहस्थानं धनस्थानं पराक्रमस्थानं सुखस्थान पुत्रस्थानं शत्रुस्थानं कलत्रस्थानं मृत्युस्थानं भाग्यस्थानं राज्यपदस्थानं लाभस्थानं व्यवस्थानं च (एते) भावानां संज्ञा कथिता । तत्रापि देहिनां सुखाश्रयं शरीरम् उक्तम् । अतो बुधजनैः तस्मादेव शुभाशुभाख्यफलजः निर्णयः कर्तव्यः ।

**तन्वादिभावानां संज्ञाबोधकचक्रम्**




**तन्वादिभावनां विशेषसंज्ञा**

## ग्रहाणां संज्ञा-चक्रम्

| ग्रहाः | सूर्यः | चन्द्रः | भौमः | बुधः | गुरुः | शुक्रः | शनिः | राहुः | केतुः |
|---|---|---|---|---|---|---|---|---|---|
| प्रभेदाःवा पर्यायाः | हेलिः | शीतरश्मिः | अंगारकः | इन्दुसुतः | अंगीरसः | कविः | असितः | अगुः | ध्वजः |
| | तीक्षांशुः | शशाङ्कः | कुजः | चन्द्रपुत्रः | अंगीरा | भार्गवः | आर्की | तमः | शिखि |
| | दिवाकरः | मृगाङ्कः | महिसुतः | चन्द्रात्मजः | आर्यः | भृगुः | छायात्मजः | अभिः | राहुः |
| | आदित्यः | शशी | भूसुतः | इनः | जीवः | भृगुसुतः | छायासुतः | कृष्णांगः | पुच्छम् |
| | रविः | निशाकरः | लोहितांगः | बोधनः | सुरगुरुः | दैत्यगुरुः | मन्दः | दीर्घः | |
| | भास्वान् | नक्षत्रपतिः | धराजः | वित् | वाचस्पतिः | उशना | सूर्यपुत्रः | असुरः | |
| | तीक्ष्णरश्मिः | रोहिणीपतिः | अवनिजः | सौम्यः | देवगुरुः | सितः | रविजः | सर्पः | |
| | भानुः | | क्रूरनेत्रः | रोहिणेयः | सुरसरीयः | काणः | पङ्गुः | फणिः | |
| | विवस्वान् | | क्षितिनन्दनः | श्यामर्गांवः | | दानवेज्यः | सौरिः | अगावः | |
| | | | | हेम्नः | | | भास्करिः | | |
| | | | | तारासूनुः | | | | | |
| फारसी | शम्स<br>आफताब | कमर<br>माहफार | मिरींख<br>मारीक | उतारद<br>तीर | मुस्तदी<br>अइरम-<br>भन्द | जुलहो<br>जुहरी | जुदुल<br>केदवान | रास | जनव |
| अंग्रेजी | Sun | Moon | Mars | Marcury | Jupiter | Venus | Saturn | Head | Tail |

## तन्वादिभावानां विशेषसंज्ञा

**लग्नं मूर्तिस्तथाङ्गं तनुरुदयवपुः कल्पमाद्यं ततः स्वं**

**कोशार्थाख्यं कुटुम्बं धनमथ सहजं भ्रातृदुश्चिक्यसंज्ञम् ।**

**अम्बा पातालतुर्य हिबुकगृहसुहृद्वाहनं यानसंज्ञं**

**बन्ध्वाख्यं चाम्बुनीर जलमथ तनयं बुद्धिविद्यात्मजाख्यम् ॥ २ ॥**

**अन्वयः-** अन्वयः लग्नं मूर्तिः तथा अङ्गं तनुः, उदयः, वपुः, कल्पम् आद्यम् ततः स्वं कोशः अर्थं कुटुम्बं धनम् सहजं, भ्राता, दुश्चिक्यं, अम्बा, पातालं, तुर्यं, हिबुकं, गृहं, सुहृद, वाहनं, यानं, बन्धुः, नीरं अम्बु, जलं च अथ तनयं, बुद्धिः, विद्या, आत्मजः, आख्यम् ।

**व्याख्या-** **लग्नं**-प्रथमभावस्य, **मूर्तिः**-स्वरूपं, **अङ्गं**- गात्रं, **तनुः**-शरीरम्, **उदयः**-लग्नं, **वपुः**-देहम्, **आद्यं**-प्रथमः, **कल्पम्**-प्रारम्भः, ततः-तदन्तरम्, **स्वं**-धनं, **कोशः**-धनागारः, **अर्थं**-धनं, **कुटुम्बं** परिवारः, **सहजं**-भ्राता, **भ्राता**-बन्धुः, **दुश्चिक्यं**-तृतीयभाव संज्ञा, **अम्बा**-माता, **पातालं**-अधोलोकः, **तुर्यं**-चतुर्थः, **हिबुकं**-पाताललोकः, **गृहं**-निकेतनम्, **सुहृद्**-मित्रं, **वाहनं**-यानं, **बन्धुः**-भ्राता, **नीरं**-वारि, **जलं**-अम्बु, तनयं-पुत्रः, **बुद्धिः**-मतिः, **विद्या**-ज्ञानम्, **आत्मजः**- तनयः, **आख्यम्**- नाम्ना कथितम् ।

**भावार्थः-** प्रथमभावस्य मूर्ति-अङ्ग-तनु-उदय-वपु-आद्य-स्वं-कल्पादिनामानि सन्ति । द्वितीयभावस्य धन-कोश-अर्थ-कुटुम्बादीनि इति नामानि सन्ति। तृतीयभावस्य सहज-भ्रातृभाव - दुश्चिक्यादि-नामानि सन्ति । चतुर्थभावस्य अम्बा-पाताल-तुर्थ-हिबुक-गृह-सुहृत् - वाहन - यान -बन्धु- अम्बु-नीर- जलादीनि नामानि तथा च (पञ्चमभावस्य नामानि अग्रिमश्लोके ...... ।

**वाक्स्थानं पञ्चमं स्यात्तनुजमथ रिपुद्वेषवैरिक्षताख्यं**

**षष्ठं जामित्रमस्तं स्मरमदनमदधून-कामाभिधानम् ।**

**रन्ध्रायुच्छिद्रयाम्यं निधनलयपदं चाष्टमं मृत्युरन्यद्**

**गुर्वाख्यं धर्मसंज्ञं नवममिह शुभं स्यात्तपोमार्गसंज्ञम् ॥ ३ ॥**

**अन्वयः-** वाक् तनुजः पञ्चमं स्थानं स्यात् । अथ रिपुः द्वेषः वैरिः क्षताख्यं षष्ठम् । अस्तं स्मरः मदनः मदः धूनः कामाभिधानं जामित्रं रन्ध्रः आयुः छिद्रं याम्यं निधनं लयपदं मृत्युः अष्टमं च । अन्यत् गुरुः धर्मसंज्ञं नवमं शुभं तपोमार्गसंज्ञं इह आख्यम् ।

**व्याख्या-** **वाक्**-वाणी, **तनुजः**-आत्मजः **पञ्चमं स्थानं**-सुतस्थानं **स्यात्**-भवेत् । **अथ**-अनन्तरं **रिपुः**-शत्रुः **द्वेषः**-विरोधः **वैरी**-शत्रुः **क्षतं**-व्रणकरम् । **षष्ठं**-षष्ठस्थानं (उक्तम्) तथा च **जामित्रं**-भार्या **अस्तं**-अस्तस्थानं **स्मरः**- कामदेवः, **मदनः**-स्मरः कामदेवः कामवासना च मदधूनः कामाभिधानं जामित्रसंज्ञम् । **रन्ध्रं**-बिलम् **आयुः**-आयुष्यं **छिद्रं**-कुहरं **याम्यं**-यमस्थानं **निधनं**-मृत्युः **लयपदं**-मोक्षपदं मृत्युः मरणम् **अष्टमं**-अष्टमस्थानं च । **गुरुः**-बृहत् **धर्मसंज्ञं**-सद्धर्मनामकं **शुभं**-शुभकारकं **तपोमार्गसंज्ञं**-काठिन्यव्रतं (तपति तापयति वा) **आख्यम्**-उक्तम् ।

**भावार्थः-** पञ्चमभावस्य (भावार्थस्य पूर्वश्लोकेन सम्बन्धः) पुत्र-बुद्धि विद्या-आत्मज-वाणी-तनुजादीनि नामानि सन्ति। षष्ठभावस्य रिपुः - द्वेष- वैरी व्रणादिनि नामानि सन्ति । जामित्र-अस्त- स्मरमदन-मदधून कामाभिधानानि एतानि नामानि सप्तमस्य सन्ति । रन्ध्रायु-छिद्र-याम्य-निधन-लयपद- अष्टम-मृत्यु एतानि अष्टभावस्य नामानि सन्ति । गुरु, धर्म, तपोमार्गादयः नवम-भावस्य पर्यायाः सन्ति।

तातज्ञामानकर्मास्पदगगननभो व्योममेषूरणाख्यं
मध्यं व्यापारमूचुर्दशममथ भवं चागमं प्राप्तिमायम् ।
इत्थं प्रान्त्यान्तिमाख्यं मुनय इह ततो द्वादशं रिष्फमाहु-
र्ग्राह्यं बुद्ध्वा प्रवीणै-र्यदधिकममुतः संज्ञया तस्य तच्च ॥ ४ ॥

**अन्वयः-** तातः आज्ञा मान कम आस्पंद गगनं नभः व्योमः मेषूरणः मध्य-माख्यं व्यापारं दशमं (ऊचुः) भवम् आगमं प्राप्तिः आयम् उत्त्कम् (एकादशंस्य) ततः प्रान्त्यंम् अन्तिमं द्वादशं रिःफं च (द्वादशस्य) अमुतः अधिकं तस्य तत् च संज्ञाया प्रवीणैः बुद्ध्वा ग्राह्यम् इत्थं मुनयः आहुः ।

**व्याख्या-** (ततः) **तातः**-पिता, **आज्ञा**-आदेश, **मान**-मानं, **कर्म**-कर्तव्यम्, **आस्पदं**-प्रतिष्ठा (प्रभुत्वं), **गगनं**-आकाशं, **नभः**-खं, **व्योम**-आकाशं मेषूरणः दशमस्थानं **मध्यमाख्यं** - देहमध्यभागं (दशान्त्यसंख्या) **व्यापारं**-वाणिज्यं, **दशमं**-दशमस्थानं च एते दशमस्थ पर्यायाः **ऊचुः** कथिताः । अथःअनन्तरं **भवं**-भव्यं **आगमं**-वेदं **प्राप्तिः**-लब्धिः **आदं**-धनागमं च । ततः तदनन्तरं **प्रान्त्यं** - अन्तिमं **द्वादशं**-तन्नामकं **अन्तिमाख्यं**-चरमाख्यं **रिफं** - व्ययस्थानं द्वादशं च । अमुतः अधिकं तस्य तच्च संज्ञया तन्नाम्ना **प्रवीणैः** बुधैः **बुद्ध्वा**-ज्ञात्वा **ग्राह्यं**-स्वीकरणीयम् **इत्थं**-एवं रूपेण **मुनयः** मुनिजनाः **आहुः** कथयन्ति ।

**भावार्थः-** दशमभावस्य तात-आज्ञा-मान-कर्म-आस्पद-गगन-नभ-व्योम-मेपूरण-मध्य-व्यापारादीनि नामानि सन्ति । एकादशस्य भव-आगम-प्राप्ति- आय इमानि नामानि सन्ति । द्वादशस्य प्रान्त्य-अन्तिम-रिष्फादिनामानि सन्ति । इतोऽप्यधिकानि नामानि यदि लभ्यन्ते तर्हि बुधैः सुविचार्य तेषां संज्ञा ग्राह्या ।

## केन्द्रादीनां संज्ञाकथनम्

आद्यं तुर्यं कलत्रं दशममिह बुधैः क्रेन्द्रमुक्तं त्रिकोणं
पुत्रं धर्माख्यमुक्तं पणकरमुदितं मृत्युलाभात्मजार्थम् ।
धर्मं चापोक्लिमाख्यं व्ययरिपुसहजं कष्टकाख्यं हि केन्द्रं
चैतच्चातुष्टयं स्यात् त्रिकमिह गदितं वैरि रिष्फान्तकाख्यम् ॥ ५ ॥

**अन्वयः-** इह बुधैः-आद्यं तुर्यं कलत्रं दशमं केन्द्रम् उक्तम् । पुत्रं धर्माख्यं त्रिकोणम् उक्तम् । भृत्युलाभात्माजार्थं अर्थं (च) पणकरम् उदितम् सहजं रिपुः धर्मं व्ययं च आपोक्लिमम् आख्यम् । केन्द्रं कण्टकम् आख्यम् (तदेव) च एतत् चातुष्टयं स्यात् । वैरि रिष्फान्तकाख्यम् इह त्रिकं गदितम् ।

**व्याख्या-** **इह**-अत्र **बुधैः**-पण्डितैः **आद्यं**-प्रथमं **तुर्थं**-चतुर्थं, **कलत्रं**-सप्तमं **दशमं**-दशमस्थानं **केन्द्रं**-केन्द्रनाम्ना **उक्तं**-कथितम् । **पुत्रं**-पञ्चमं **धर्म**-नवमं **त्रिकोणं**-त्रिकोणनाम्ना **उक्तं** -कथितम् । **मृत्युलाभात्मजार्थं**- (क्रमशः) अष्टमम् एकादशं पञ्चमं द्वितीयं च **पणफरं** - तन्नाम्ना **उदितम्** - कथितम् । **धर्म**-नवमं **व्ययं**-द्वादश **रिपुः षष्ठ सहजं**-तृतीयं च आपोक्लिमनाम्ना **गदितं**-कथितम । **केन्द्रं**-केन्द्रस्थानं **कण्टकं**-तन्नाम्ना **आख्यम्**-उक्तम् । **चातुष्टयञ्च** - तन्नाम्ना अपि (उक्तं) **वैरि**-षष्ठं **रिष्फं**-द्वादशं **अन्तकम्**-अष्टमम् **इह**-अत्र **त्रिकं**-त्रिक-स्थानम् इति नाम्ना **गदितम्** - कथितम् ।

**भावार्थः-** बुधैः प्रथमं सप्तमं दशमं चतुर्थं च केन्द्र-संज्ञकम् उक्तम् । पञ्चमं नवमं च त्रिकोणं कथितम् । अष्टमम् एकादशं पञ्चमं द्वितीपञ्च पणफरनाम्ना गदितम् । नवमं द्वादशं षष्ठं तृतीयं च आपोक्लिमनाम्ना उक्तम्) केन्द्रं कण्टकनाम्ना चातुष्टयनाम्ना (स्थान चातुष्टयात्मकत्वाद्) च कथितम् । षष्ठ-द्वादश-अष्टमस्थानं च अत्र त्रिक-नाम्ना कथितम् ।

## संज्ञाज्ञानम्




केन्द्रम् - 1, 4, 7, 10

पणफरम् - 2, 5, 8, 11

आपोक्लिम - 3, 6, 9, 12

त्रिक् - 6, 8, 12

त्रित्रिकोणम् - 9

त्रिकोणम् - 5, 9

**विशेषः-** केन्द्र चतुष्टयकण्टकसंज्ञा लग्नास्तदशमचतुर्थानाम् ।
तस्मात्परतः पणफरमापोक्लिमं च तत्परतः ॥

## त्रिकोणोपचयादि संज्ञा

**धीधर्मर्क्षं त्रिकोणं भवति नवमभं त्रित्रिकोणाह्वयं च ।**
**लाभारि भ्रातृमध्यान्युपचयभवनान्याहुरित्येवमार्याः ॥**

**भावार्थः-** पञ्चमस्थानं नवमस्थानं च त्रिकोणस्थानं भवति । विशेषतः नवमं त्रित्रिकोणाख्यनाम्ना वर्णितम् । तदुपरि लाभषष्ठतृतीयदशमस्थानानि उपचय भवनानि कथितानि । इत्याचार्याणां मतम् ।

### केन्द्रादि स्थानस्थितग्रहेषु बलिग्रह लक्षणम्

**लग्नाम्बुद्यूनकर्माणि केन्द्रमुक्तं च कण्टकम् ।**
**चातुष्टयं चात्र खेटो बली लग्ने विशेषतः ॥**

**भावार्थः-** प्रथमचतुर्थसप्तमदशमस्थानानि स्थानचतुष्टयकेन्द्रसंज्ञया चोक्तम् । तदेव स्थानचतुष्टयं कण्टकं च । अत्र केन्द्रे ग्रहः बलवान् भवति । तत्रापि लग्ने स्थितो ग्रहः (अधिक-बलवान्) लग्नेतरस्थानापेक्षयाऽधिकतो बलवान् भवति ।

## सूर्यादिग्रहाणां संज्ञा

**हेलिः सूर्यश्चन्द्रमाः शीतरश्मिर्हेम्ना विज्ञो बोधनश्चेन्दुपुत्रः ।**

**आरो वक्रः क्रूरदृक्चावनेयः कोणो मन्दः सूर्यपुत्रोऽसितश्च ॥ ६ ॥**

**अन्वयः-** हेलिः, सूर्यः च, चन्द्रमा, शीतरश्मिः, इन्दुपुत्रः, हेम्ना, वित्, बोधनः, इन्दुपुत्रः, ज्ञः, आरः, वक्रः, क्रूरदृक्र, आवनेयः, सूर्यपुत्रः, कोणः, मन्दः, असितः च (एताः संज्ञा) ।

**व्याख्या-** **हेलिः**-आदित्यः **सूर्यः**-रविः, **च** - तथा **चन्द्रमा**-चन्द्रः **शीतरश्मिः** चन्द्रः (शीतो रश्मिर्यस्य) **हेम्ना**-बुधः **वित्**-मृगाङ्कः **बोधनः** सौम्यः **इन्दुपुत्रः**-चन्द्रात्मजः **ज्ञः**-बुधः । **आरः**-भौमः **वक्रः**-कुजः **क्रूरदृक्** -क्रूरद्रष्टा **आवनेयः**-लोहित, **कोणः**-रविजः **मन्दः**-शनिः **सूर्यपुत्रः**-सौरिः **असितः**-छायासुतः इत्यादयःसंज्ञा ।

**भावार्थः-** सूर्यस्य नाम हेलिः, चन्द्रस्य शीतरश्मिः, बुधस्य इन्दुपुत्रः, हेम्ना वित् बोधनश्च नामानि सन्ति । भौमस्य वक्रः क्रूरदृक् आवनेयश्च नामानि सन्ति । कोणः मन्दः सूर्यपुत्रः असितश्च शनेः नामानि सन्ति ।

**जीवोऽङ्गिराः सुरगुरुर्वचसां पतीज्यः**

**शुक्रो भृगुर्भृगुसुतः सित आस्फुजिच्च ।**

**राहुस्तमोऽगुरसुरश्च शिखीति केतुः**

**पर्य्यायमन्यमुपलभ्य वदेच्च लोकात् ॥ ७ ॥**

**अन्वयः-** जीवः अङ्गिरा सुरगुरुः वचसां पतिः इज्यः, शुक्रः भृगुः भृगुसुतः सितः आस्फुजित् च, राहुः तमः अगुः असुरः च, शिखि इति केतुसंज्ञकः (तथैव) लोकात् अन्यम् उपलभ्य पर्य्यायं च वदेत् ।

**व्याख्या-** **जीवः**-गुरुः, **अङ्गिरा** आङ्गिरसात्मजः, **वचसां पतिः**- वाक्पतिः **इज्यः**-देवपूज्यः च । **शुक्रः**-उशना **भृगुः**-दैत्यारिः, **भृगुसुतः**-भार्गवः **सितः**-असुरगुरुः **आस्फुजित्** - शुक्रः च । **राहुः**-सैहिकेयः **तमः**-तमोग्रहः **अगुः**-विद्युन्तुदः असुरः-स्वर्भानुः च **शिखिः**-केतु इति । (तथैव) **लोकात् अन्य**- अन्यशास्त्रात् **उपलभ्य** -प्राप्य **पर्य्यायाः** समानार्थकाः ब्रूयात् इति ।

**भावार्थः-** गुरोः जीव-अङ्गिरा-सुरगुरुः वचसां पति इज्येत्यादिनामानि, शुक्रस्य भृगु भृगुसुत-सित-आस्फुजिच्च, राहोः तमः अगुः असुरश्चनामानि केतोः शिखि इति नाम वर्तते । तदुपरि लोकादन्यशास्त्राच्चोपलभ्य पर्य्यायाः ज्ञेयाः इति भावः ।

**विशेषः-** रविस्तिक्षणांशुर्दिनकरो भास्वांस्तीक्ष्णरश्मिर्भानुविवस्वानित्यादयः सूर्यस्य, शशाङ्कस्तुहिनगुर्मृगाङ्कः शशी निशाकरो नक्षत्रपतीत्यादयश्च चन्द्रस्य, कुजो लोहितो भौमः क्ष्मातनयः इत्याद्याःभौमस्य, सौम्यो रौहिणेयश्चान्द्रि मृगाङ्कतनयः इन्दुजः इत्याद्याः बुधस्य, सुरिः सुरेयो वाक्पतिः देवपुरोहितः इन्द्रमन्त्री इत्याद्याः गुरोः, भार्गवः उशना दैत्येज्योऽसुरगुरुः दैत्यर्त्विगित्याद्याः शुक्रस्य, यमो रविजः पातङ्गिश्छाया-सुतः इत्याद्याः सौरस्य, सैहिकेयः स्वर्भानुर्दानवोऽमृतचोरो विद्युन्तुदः इत्याद्याः राहोः, शिखि इति केतोः पर्यायाः सन्ति ।

(जातकपारिजातस्य द्वितीयाध्याये ३, ४, ५ श्लोकाः)

## नवग्रहस्वरूपवर्णनम्

### सूर्यस्वरूपम्

**सूर्यो नृपो ना चतुरस्त्रमध्यन्दिनेन्द्रदिक् स्वर्ण चतुष्यदोग्रः ।**

**सत्त्वं स्थिरस्तिक्त- पशुक्षितिस्तु पित्तं जरन्पाटलमूलवन्यः ॥ ८ ॥**

**अन्वयः-** सूर्यः नृपः ना चतुरस्त्रः मध्यन्दिनेन्द्रदिक् स्वर्णः चतुष्पदः उग्रः सत्त्वं स्थिरः तिक्तः पशुः क्षितिः पित्तं जरन् पाटलमूलं वन्यः तु (ज्ञेयः)

**व्याख्या-** **सूर्यः**-रविः **नृपः**-क्षत्रियवर्णः **ना**-पुरुषग्रहः **चतुरस्त्रः**-चतुष्कोणाकृतिः **मध्यन्दिनः**-मध्याह्नबली **इन्द्रदिक्**-पूर्वादिक्पतिः **स्वर्णः**-सुवर्णधातुस्वामी **चतुष्पदः**-(गजादि)चतुष्पः चतुष्पदादिस्वामी **उग्रः** - क्रूरः सत्वं सत्वगुणाधिकः **स्थिरः** - स्थिरप्रकृतिः **तिक्तः**-तिक्तरसप्रियः **पशुः**-पशुपतिः **क्षितिः**-भूमिचलनशीलः **पित्तं**-पित्तात्मकः **जरन्** - जरातुरः **पाटलमूलः**-कन्दकरः श्वेतमिश्रितवर्णश्च **वन्यः**-वनचरः ईदृशो ज्ञेयः ।

**भावार्थः-** सूर्यग्रहः क्षत्रियजातियुक्तः पुरुषः चतुष्कोणाकृतिसदृशः मध्याह्नबली पूर्वदिक्पतिः सुवर्णधातुस्वामी चतुष्पदानामधिपतिः क्रूरः सत्त्वगुणप्रधानः स्थिरप्रकृतियुक्तः तिक्तरसप्रियः पशुपतिः भूमितत्त्वयुक्तः पित्तदोषप्रधानः श्वेतामिश्रितरक्तवर्णयुक्तः कन्दमूलाधिपतिः वनचरश्च ज्ञेयः ।

## चन्द्रस्वरूपम्

**वैश्यः शशी स्त्री जलभूस्तपस्वी गौरोऽपराह्णाम्बुगधातुसत्त्वम् ।**

**वायव्यदिक्श्लेष्म-भुजङ्गरूप्यः स्थूलो युवा क्षारशुभः सिताभः ॥ ९ ॥**

**अन्वयः-** शशीः वैश्यः स्त्री जलभूः तपस्वी गौरः अपराह्णः अम्बु गधातुः सत्त्वं वायव्यदिक् श्लेष्मः भुजङ्गः रूप्यः स्थूलः युवा क्षारशुभः सिताभः च ।

**व्याख्या-** **शशीः** चन्द्रः **वैश्यः**-वैश्यवर्णः **स्त्री**-स्त्रीग्रहः जलभूः **जलाक्रान्त**-भूमिचारी **तपस्वी**-तपोनिरतः (अत्रिपुत्रत्वात्) **गौरः**- गौरवर्णः, **अपराह्णः**- अपराह्णबली **अम्बुः**-जलचरः **गधातुः**- गौरिकादिधातुपतिः **सत्त्वः** सत्त्वगुणप्रधानः **वायव्यदिक्**-पश्चिमोत्तर-मध्यकोणाधिपतिः **श्लेष्मः**- कफात्मकः **भुजङ्गः**-सर्पजातिपतिः **रूप्यः**-रजतद्रव्यपतिः **स्थूलः**-विशालदेहः **युवा**-तरुणः **क्षारः**-लवणरसप्रियः **शुभः**-शुभ-ग्रहः **सिताभः**-स्वच्छकान्तियुक्तश्च (अस्ति)।

**भावार्थः-** शशीः वैश्यवर्णः स्त्रीग्रहः जलाक्रान्तभूमिचारी तपोनिरतः गौरवर्णः अपराह्णबली जलचरः सत्त्वगुणप्रधानः वायव्यकोणाधिपतिः कफप्रकृतियुक्तः सर्पाधिपतिः रजतद्रव्याधिपः स्थूलशरीरः युवा लवणरसप्रियः शुभग्रहः स्वच्छसफलद्रव्यपतिश्च ज्ञेयः ।

## भौमस्वरूपम्

**भौमस्तमः पित्तयुवोग्रवन्यो मध्याह्न धातुर्यमदिक् चतुष्पात् ।**

**ना राट् चतुष्कोणसुवर्णकारो दग्धाऽवनी व्यङ्गकटुश्च रक्तः ॥ १० ॥**

**अन्वयः-** भौमः तमः पित्तः युवा उग्रः वन्यः मध्याह्नः धातुः यमदिक चतुष्पात् ना राट् चतुष्कोणः सुवर्णकारः दग्धाऽवनी व्यङ्गः कटुः रक्तः च ।

**व्याख्या-** **भौमः**- कुजः **तमः**-तमोगुणमुख्यः **पित्तः**-पित्तात्मकप्रकृतिः **युवा**-तरुणः **उग्रः**-क्रूरः **वन्यः**-वनचरः **मध्याह्नः**-मध्याह्नबली **धातुः**-धातुपतिः **यमदिक्** - दक्षिणदिक्पतिः **चतुष्पात्**-चतुष्पदजातिस्वामी **ना**-पुरुषग्रहः **राट्**-राजन्यः **चतुष्कोणः**-चतुष्कोणाकृतिः **सुवर्णकारः** - सुवर्णकारजातिपतिः **दग्धाऽवनी**-दग्धभूमिचारी **व्यङ्गः**-निरङ्गः **कटुः**-कटुरसप्रियः **रक्तः**-रक्तवर्णः वा रक्तवर्णपदार्थपतिः चास्ति ।

**भावार्थः-** मङ्गलग्रहः तमोगुणी पित्तात्मकः युवा क्रूरः वनचरः मध्याह्न-बली गैरिकादिधातुपतिः दक्षिणदिक्पतिः चतुष्पदजाति-स्वामी पुरुषग्रहः क्षत्रियवर्णः चतुष्कोणाकृतिः दग्धभूमिचारी अङ्गहीनः कटुरसप्रियः रक्तवर्णपदार्थपतिः च अस्ति ।

## बुधस्वरूपम्

**ग्राम्यः शुभो नीलसुवर्णवृत्तः शिश्विष्टकोच्चः समधातुजीवः ।**

**श्मशानयोषोत्तर-दिक्प्रभातं शूद्रः खगः सर्वरसो रजो ज्ञः ॥ ११ ॥**

**अन्वयः-** ज्ञः ग्राम्यः शुभः नीलः सुवर्णः वृत्तः शिशुः इष्टिकोच्चः समधातुः जीवः श्मशानः योषा उत्तरदिक् प्रभातं शूद्रः खगः सर्वरसः रजः चास्ति ।

**व्याख्या-** **ज्ञः**-बुधग्रहः **ग्राम्यः**-ग्रामचरः **शुभः**-शुभग्रहः **नीलः**-नीलवर्णः **सुवर्णः**-सुवर्णद्रव्याधिपतिः **वृत्तः**-वर्तुलाकारः **शिशुः**-बालवयः **इष्टिकोच्चः**-इष्टिकोच्चप्रदेशचरः **समधातुः**-सम-वातपित्तकफत्रिदोषयुक्तः **जीवः**-जीवजन्तुपतिः **श्मशानः**-शवदहनस्थलचारी **योषा**-नारी (यौति मिश्रीभवति इति) **उत्तरदिक्**-उत्तरदिक्पतिः **प्रभातं**-प्रभातकालबली **शूद्रः**- शूत्रवर्णस्वामी **खगः**-पक्षिजातिः **सर्वरसः**-मधुरकटुकषायम्लक्षारतिक्तरसप्रियः **रजः**-रजोगुण-प्रधानश्चास्ति ।

**भावार्थः-** बुधः ग्रामचरः शुभग्रहः नीलवर्णः काञ्चनद्रव्याधिपतिः वर्तुलाकारः बालवयः इष्टिकोच्चप्रदेशचरः समधातुयुक्तः जीवजन्तुप्रियः श्मशानभूमिचारी स्त्रीग्रहः उत्तरदिशाधिपतिः प्रभातकाले बली शूद्रवर्णस्वामी पक्षिजातिः सर्वरसप्रियः रजोगुणप्रधानश्च वर्तते ।

## गुरुस्वरूपम्

**गुरुः प्रभाते नृशुभेशदिग् द्विजः पीतो द्विपात् ग्राम्य सवृत्त जीवः ।**

**वाणिज्यमाधुर्यसुरालयेशो वृद्धः सुरत्नं समधातुसत्त्वम् ॥ १२ ॥**

**अन्वयः-** गुरुः प्रभाते नृः शुभः ईशदिक् द्विजः पीतः द्विपात् ग्राम्यः सुवृत्तः जीवः वाणिज्यं माधुर्यं सुरालयेशः वृद्धः सुरत्नं समधातुः सत्त्वम् च ।

**व्याख्या-** **गुरुः**- बृहस्पतिः **प्रभाते**-प्रातःकाले बली **नृः**-पुरुषग्रहः **शुभः**-शुभग्रहः **ईशदिक्**-ईशानकोणाधिपः **द्विजः**-ब्राह्मणवर्णः **पीतः**-पीतवर्णः **द्विपात्** - द्विपदस्वामी **ग्राम्यः**-ग्राम्यचरः **सुवृत्तः**-वर्तुलाकारः **जीवः**-मनुष्यादिजीवस्वामी **वाणिज्यं** - क्रयविक्रयकर्ता **माधुर्यं**-मधुररसप्रियः **सुरालयेशः**-देवभवनाध्यक्षः **वृद्धः** - जराजर्जरः **सुरत्नं**-सद्रत्न-स्वामी **समधातुः**-वातादि-धातुपतिः **सत्त्वं**-सत्त्वगुणप्रधानश्चास्ति ।

**भावार्थः-** बृहस्पतिः प्रातःकालबली पुरुषग्रहः शुभग्रह ईशानाधिपतिः ब्राह्मणवर्णः पीतः द्विपदानां स्वामी ग्राम्यचरः वर्तुलाकारः मनुष्यादिजीवानां स्वामी क्रयविक्रयकर्ता मधुररसप्रियः देवभवनाध्यक्षः वृद्धः सुरत्नस्वामी त्रिदोष-युक्तः सात्त्विकस्वभावयुक्तश्चास्ति ।

## शुक्रस्वरूपम्

**शुक्रः शुभः स्त्री जलगोऽपराह्णः श्वेतः कफी रूप्यरजोऽम्लमूलम् ।**

**विप्रोऽग्निदिङ्मध्यवया रतीशो जलावनी स्निग्धरुचि-र्द्विपाच्च ॥ १३ ॥**

**अन्वयः-** शुक्रः शुभः स्त्री जलगः अपराह्णः श्वेतः कफी रूप्यः रजः अम्लमूलं विप्रः अग्निदिक् मध्यमवया रतीशः जलावनी स्निग्धरूचिः द्विपात् च ।

**व्याख्या-** **शुक्रः**-भार्गवः **शुभः**-शुभग्रहः, **स्त्री**-स्त्रीग्रहः **जलगः**-जलचरः **अपराह्णः**-अपराह्णकालबली **श्वेतः**-स्वच्छवर्णः **कफी**-कफात्मकः **रूप्यः**-रजतद्रव्यपतिः **रजः**-रजोगुणी **अम्लमूल**-अम्लरस-प्रियः **विप्रः**-ब्राह्मणवर्णः **अग्निदिक्**-अग्निकोणाधिपतिः **मध्यमवया**-प्रौढवयस्कः **रतीशः**-रतिक्रीडाविषय प्रधानः **जलावनी**-जलभूमिचारी **स्निग्धरूचिः**-चिक्कणत्ववर्णः **द्विपात्**-मानवजातिः च अस्ति ।

**भावार्थः-** शुक्रः शुभग्रहः स्त्रीजातिः जलचरः मध्याहनोत्तरबली श्वेतवर्णः कफात्मकः रजतधातुपतिः रजोगुणी अम्लरसप्रियः ब्राह्मणः अग्निकोणाधिपतिः प्रौढवयस्कः कामशास्त्रनिपुणः चिक्कणत्ववर्णः मानवजातिस्वामी च अस्ति ।

## शनिस्वरूपम्

**शनिर्विहङ्गोऽनिलविन्यसन्ध्या शुद्राङ्गना धातुसमः स्थिरश्च ।**

**क्रूरः प्रतीची तुवरोऽतिवृद्धोत्करक्षितीट् दीर्धसुनीललोहम् ॥ १४ ॥**

**अन्वयः-** शनिः विहङ्गः अनिलः वन्यः सन्ध्या शूद्रः अङ्गना धातुसमः स्थिरः क्रूरः प्रतीची तुवरः अतिवृद्धः उत्करक्षितीट् दीर्धः सुनीलः लोहं च ।

**व्याख्या-** **शनिः**-मन्दः **विहङ्गः**-पक्षिजातिस्वामी **अनिलः**-वातात्मकः **वन्यः**-वनचरः **सन्ध्या**-सन्ध्यासमयबली **शूद्रः**-शूद्रवर्णः **अङ्गना**-स्त्रीगृहः **धातुसमः**-समधातुपतिः **स्थिरः**-स्थिरप्रकृतिः **क्रूरः**-पापग्रहः **प्रतीची**-पश्चिमिदक्पतिः **तुवरः**-कषायरसप्रियः **अतिवृद्धः**-जराजर्जरितः (सकलग्रहेषु-अतिवृद्धः) **उत्करक्षितीट्**-ऊषरभूमिपतिः **दीर्घः**-अत्युच्चदेहयुक्तः **सुनीलः**-अतिनीलवर्णः **लोहं**-लोहधातुस्वामी च अस्ति ।

**भावार्थः-** शनिग्रहः पक्षिजातिपतिः वातप्रकृतियुक्तः वनचरः सन्ध्याकालबली शुद्रवर्णः स्त्रीग्रहः वातपित्तकफात्मक-स्थिरप्रकृतिः पापग्रहः पश्चिम-दिक्पतिः कषायरसप्रियः अतिवृद्धः ऊषरभूमिपतिः दीर्धदेहयुक्तः अतिनीलवर्णः लोहधातुस्वामी च अस्ति ।

## राहुस्वरूपम्

**राहुस्वरूपं शनिवान्निषादं जातिर्भुजङ्गोऽस्थिपनैर्ऋतीशः ।**

**केतुः शिखी तद्वदनेकरूपः खग स्वरूपात्फलमूह्यमित्थम् ॥ १५ ॥**

**अन्वयः-** राहुस्वरूपं शनिवत् (तत्रापि-विशेषतया) निषादजातिः भुजङ्गः अस्थिपः नैर्ऋतीशः च । केतुः शिखी तद्वत् अनेकरूपः खगस्वरूपात् इत्थं फलम् ऊह्यम् ।

**व्याख्या-** **राहुस्वरूपं**-राहुग्रहस्य स्वरूपं **शनिवत्** - शनिग्रहस्य स्वरूपवत् (वर्ण-दिशा-प्रकृत्यादि सममेव बोध्यम्) तत्रापि (यत् किञ्चिदधिकं तदाह) **निषादजातिः**-चाण्डालजातिः **भुजङ्गः**- सर्पाकारः **अस्थिपः**-अस्थिधातुस्वामी **नैर्ऋतीशः** -नैऋत्यकोणस्वामी च । **केतुः** - केतुग्रहः **शिखी**-शिखावान् (यद्यपि पुराणवार्तया शिखीति नोपपद्यते-कारणं यत् शीर्षहीनत्वात् । परन्तु आकारो समुदित-केतुस्वरूप दर्शनात् शिखीति सम्यग् विशेषणम्) **तद्वत्** - शनिराहुवत् (केतुः) **अनेकरुपः** नानाप्रकारस्वरूपवान् खगस्वरूपात् (बृहत्संहितायां केतुः) **इत्थं**-अमुना प्रकारेण **फलमहयं** - फलं ज्ञातव्यम् ।

**भावार्थः-** राहुस्वरूपं शनिवत् भवति तत्रापि सः निषादजातिः सर्पाकारः अस्थिधातुस्वामी नैऋत्यकौणाधिशः च अस्ति। तद्वदेव केतुः शिखावान् तथा शनि राहुवत् नाना-प्रकार-स्वरूपवान् च भवति । इत्थं ग्रहाणां स्वरूपं फलं च बुधैः ज्ञातव्यम् ।

## स्वाध्यायः

**१. अधस्तनेषु प्रश्नेषु योग्यमुत्तरं चित्वा लिखत ।**

(१) तन्वादिभावानां कति संख्या ?

(क) चत्वार (ख) अष्ट (ग) दश (घ) द्वादश

(२) जायाभावस्य अपरं नाम किम् ?

(क) जन्मलग्नम् (ख) पग्चमलग्नम् (ग) सप्तमभावः (घ) दशमभावः

(३) सुखस्य मूलकारणं किं गदितमस्ति ?

(क) धनम् (ख) शरीरम् (ग) स्वर्गम् (घ) भाग्यम्

(४) सूर्यपुत्रः कोऽस्ति ?

(क) कुजः (ख) बुधः (ग) मन्दः (घ) चन्द्रः

(५) सूर्यस्य वर्णः कः ?

(क) ब्राह्मण (ख) क्षत्रियः (ग) वैश्यः (घ) शूद्रः

(६) ईशानकोणाधिपतिः ग्रहः ?

(क) भौमः (ख) गुरुः (ग) शनिः (घ) शुक्रः

(७) सकलग्रहेषु सर्वाधिकवयस्कग्रहः ?

(क) सूर्यः (ख) चन्द्रः (ग) गुरुः (घ) शनिः

(८) रतिक्रीडाविषयप्रधानग्रहः ?

(क) बुधः (ख) गुरुः (ग) शुक्रः (घ) चन्द्रः

(९) लग्नाम्बुद्यूनकर्माणि केन नाम्ना प्रसिद्धानि सन्ति ?

(क) केन्द्रम् (ख) त्रिकोणम् (ग) पणफरः (घ) आपोक्लिमम्

(१०) त्रित्रिकोणाख्यनामकं स्थानम् ?

(क) प्रथमं (ख) चतुर्थं (ग) पञ्चमम् (घ) नवमम्

२. **एकैक-वाक्येनोत्तराणि लिखत ।**

(१) सैहिकेयः कस्य संज्ञा वर्तते ?

(२) भौमः कस्मिन् समये बली भवति ?

(३) षष्ठाष्टमद्वादशस्थानानि केन नाम्ना प्रसिद्धानि सन्ति ?

(४) प्रतीच्याधिपतिः कः ग्रहः ?

(५) सर्पाकारः कोऽस्ति ?

(६) लाभारिभ्रातृमध्याहन स्थानानि केन नाम्ना प्रसिद्धानि सन्ति ?

(७) प्रथम भावस्यान्यनामानि कानि सन्ति ?

३. **श्लोकपूर्तिं कृत्वा भावार्थो लेख्यः ।**

(१) आद्यं तुर्यं कलत्रं दशममिह .................. ।

(२) ताताज्ञामानकर्मास्पदगगन ........................ ।

(३) ग्राम्यः शुभो नीलसुवर्णवृत्तः ...................... ।

**४. अ विभागस्य ब विभागेन सह संयोजन कुरुत**

| अ | ब |
|---|---|
| (१) केन्द्रम् | (१) ३, ६, ९, १२ स्थानानि |
| (२) पणफरम् | (२) ५, ९ स्थाने |
| (३) आपोक्लिमम् | (३) ६, ८, १२ स्थानानि |
| (४) त्रिकोणम् | (४) १, ४, ७, १० स्थानानि |
| (५) त्रिकम् | (५) २, ५, ८, ११ स्थानानि |
| | (६) ३, ६, ११ स्थानानि |

**५. टिप्पणी लेख्या ।**

(१) सूर्यस्य स्वरूपवर्णनम् ।

(२) बुधस्य स्वरूपवर्णनम् ।

(३) शुक्रस्य स्वरूपवर्णनम् ।

**६. विस्तरेणोत्तराणि लिखत ।**

(१) केन्द्रादिनां विशिष्टसंज्ञावर्णनं ग्रन्थोक्तदिशा कुरुत ।

(२) लग्नादिभावानां विशेषसंज्ञा वर्णनं देवगिरायां कुरुत ।

(३) त्रिकोणोपचयादिसंज्ञानां वर्णनं विधेयम् !

(४) वाक्स्थानं पञ्चमं स्यात् श्लोकस्य भावार्थो लेख्यः ।

(५) बृहज्जातकानुसारेण वर्णित-ग्रहाणां संज्ञां विवेचयत ।

**अध्यापकानां प्रवृत्तिः**

- प्रायोगिकरीत्या भावानां विविधसंज्ञाप्रदर्शनं तथा च भावस्थानानि दर्शनीयानि ।

**छात्राणां प्रवृत्तिः**

- विविधग्रन्थुसारेण ग्रहाणां संज्ञा स्वरूपञ्च संशोध्य संग्रहः क्रियताम् ।

●

| | |
|---|---|
| ३ | **भावाध्यायः १**<br>**( प्रथमतः चतुर्थान्तं यावत् )** |

## प्रास्ताविकम्

नभोमण्डलस्य द्वादशकाल्पिनकभागेषु तन्वादिद्वादशभागाः कृताः सन्ति । होराविद्भिः द्वादशभावानां तत्रस्थग्रहाणां च फलकथनं स्वमत्यनुसारेण कृतमस्ति । तद्वदेव जातकालङ्कारेऽपि द्वादशभावनं वर्णनं भावाध्याये कृतम् । तदनुसारेण वयं प्रस्तुतेऽस्मिन्प्रकरणे प्रथमभावतः चतुर्थभावनान्तं यावत् तत्रस्थयोगानुसारं शुभाशुभाख्यफलवर्णनं प्रति गच्छामः ।

## तनुभावः - ( तनुभावस्याशुभफलम् )

**देहाधीशः सपापो व्ययरिपुमृतिगश्चेत्तदा देहसौख्यं**
**न स्याज्जन्तोर्निजर्क्षे व्ययरिपुमृतिपस्तत्फलस्यैव कर्ता ।**
**मूर्तौ चेत्क्रूरखेटस्तदनु तनुपतिः स्वीयवीर्येण हीनो**
**नानातङ्काकुलः स्याद् व्रजति हि मनुजो व्याधिमाधिप्रकोपम् ॥ १ ॥**

**अन्वयः**- सपापः, देहाधीशः, व्ययरिपुमृतिगः, चेत् तदा, जन्तोः देहसौख्यं न स्यात् । व्ययरिपुमृतिगः निजर्क्षे तत्फलस्यैव कर्ता (स्यात्) । चेत् मूर्तौ क्रूरखेटस्तदनु तनुपतिः स्वीयवीर्येण हीनः, हि मनुजः, नानातङ्काकुलः (स्यात्), व्याधिम् आधिं प्रकोपं व्रजति ।

**व्याख्या**- **सपापः**-पापयुक्तः, **देहाधीशः**- लग्नेशः, **व्ययरिपुमृतिगः** - द्वादशषष्ठाष्टस्थानेषु (गतः), **चेत् तदा**-तस्मिन् काले, **जन्तोः** - जातकस्य **देहसौख्यं** - शरीर - सुखं, **न स्यात्** - न भवति, **व्ययरिपुमृतिपः** - द्वादशषष्ठाष्टस्थानाधीशाः, **निजर्क्षे** - स्वभवने भवेयुस्तदा, तत्फलस्यैव कर्ता स्यात्, **चेत्** - यदि, **मूर्तौ** - लग्ने, **क्रूरखेटः** - पापग्रहः, **तदनु** - तथा, **तनुपतिः** - लग्नेशः, **स्वीयवीर्येण** - निजबलेन, **हीनः** - रहितः, **मनुजः** - जातकः, **नानातङ्काकुलः** - विविधभयाक्रान्तः, **स्यात्** - सन्, **व्याधिमाधिप्रकोपं** - रोगचिन्ताव्याकुलं, **व्रजति** - प्राप्नोति ।

**भावार्थः**- यदि लग्नेशः पापयुक्तः सन् षष्ठाष्टमद्वादशस्थानस्थितौ भवति तदा शरीरसुखं न प्राप्यते । षष्ठाष्टमद्वादशस्थानाधिपः स्वराशौ भवेत्तदापि तत्फलस्येव कर्ता । एवं लग्ने क्रूरग्रहः लग्नेशश्च स्वीयवीर्येण हीनः तदा मानवः नैकभयादिव्याप्तः सन् निश्चयेन रोगचिन्ताव्याप्तत्वं प्राप्नोति ।

**शरीरसुख-अभावयोगः**




**शरीरसुख-अभावयोगः**



**शरीरसुख-अभावयोगः**




अनेन प्रकारेण अन्येषां भावानां कुण्डल्यः अपि निर्मितव्याः

## तनुभावस्य शुभफलम्

**अङ्गाधीशः स्वगेहे बुधगुरुकविभिः संयुतः केन्द्रगो वा**

**स्वीये तुङ्गे स्वमित्रे यदि शुभभवने वीक्षितः सत्त्वरूपः ।**

**स्यान्नूनं पुण्यशीलः सकलजनमतः सर्वसंपन्निधानं**

**ज्ञानी मन्त्री च भूपः सुरुचिरनयनो मानवो मानवानाम् ॥ 2 ॥**

**अन्वयः-** अङ्गाधीशः स्वगेहे बुधगुरु - कविभिः संयुतः केन्द्रगः वा स्वीये तुङ्गे स्वमित्रे शुभभवने यदि शुभैः वीक्षितः (तदा) नूनं सत्त्वरूपः पुष्पशीलः सकलजनमतः सर्वसम्पन्निधानं ज्ञानी मन्त्री च भूपः सुरुचिरनयनः मानवानां मानवश्च स्यात् ।

**व्याख्या-** **अङ्गाधीशः** - लग्नेशः, **स्वगेहे** - निजभवने, **बुधगुरुकविभिः** - बुधगुरुशुक्रसहितः, **संयुतः** - युक्तः, **केन्द्रगः** - केन्द्रस्थानः, **वा** - अथवा, **स्वीये तुङ्गे** - स्वोच्चे, **स्वमित्रे** - निजमित्रगृहे, **शुभभवने** - शुभस्थाने शुभैः, **यदि वीक्षितः** - शुभग्रहैःद्रष्टः, **तदा** - तस्मिन्काले, **नूनं** - निश्चयेन, **सत्त्वरुपः** - सत्त्वगुणाकृतियुक्तः, **पुण्यशीलः** - पुष्पभाजनः, **सकलजनमतः** - सर्वजनमान्यः, **सर्वसम्पन्निधानं** - निखिलसम्पदामाश्रयः, **ज्ञानी** - ज्ञानवान् , **मन्त्री** - अमात्य, **भूपः** - राजा, **सुरुचिरनयनः** - सुन्दरलोचनः, **मानवानां** - नराणां, **मानवः** - मान्यः, **स्यात्** - भवति ।

**भावार्थः-** लग्नेशः यदा स्वराशिगः वा बुधगुरुशुक्रैः सह स्वोच्च राशौ स्वमित्रगृहे वा शुभराशौ स्थित्वा शुभग्रहैः द्रष्टो भवति तदा निश्चयेन जातकः सत्त्व-गुणाकृतियुक्तः पुण्यवान् सर्वजनमान्यः निखिलसम्पदामाश्रयः ज्ञानवान्, मन्त्री, नृपतिः सुन्दरलोचनयुक्तः मानवानां मध्ये मान्यो भवति ।

## अशुभयोग :

**लग्ने क्रूरेऽथ याते खलखचरगृहं लग्ननाथे रवीन्दू**

**क्रूरान्तस्थानसंस्था वथ दिनपनिशानाथयोर्द्यूनयायी ।**

**भूमीपुत्रस्तु पृष्ठादुदयमधिगतश्चन्द्रजश्चेन्मनस्वी**

**स्यादन्धो दुष्टकर्मा परभवनरतः पूरुषः क्षीणकायः ॥ ३ ॥**

**अन्वयः-** अथ लग्ने क्रूरे लग्ननाथे खलखचर गृहं याते रवीन्दू क्रूरान्तः स्थानसंस्थौ अथ दिनपनिशानाथयोः द्यूनयायी भूमीपुत्रः चेत् चन्द्रजः पृष्ठादुदयमधिगतः तदा पुरुषः मनस्वी अन्धः दुष्टकर्मा परभवनरतः क्षीणकायः स्यात् ।

**व्याख्या-** **अथ लग्ने**- लग्ने, **क्रूरे** - पापग्रहे, **लग्ननाथे** - लग्नेशे, **खलखचरगृहं** - पापग्रहभवनं, **याते** - प्राप्ते सति, अथवा **रवीन्दू** - सूर्यचन्द्रौ, **क्रूरान्तस्थानसंस्थौ** - पापग्रहण-मध्यगतौ, **अथ दिनपनिशानाथयोः** - सूर्यचन्द्रयोः, **द्यूनयायी** - सप्तमस्थानगतः, **भूमीपुत्रः** - भौमः, **चेत्** - तथा, **चन्द्रजः** - बुधः, **पृष्ठादुदयमिधगतः**-पृष्ठोदयराशिगतः, **तदा पुरुषः** - जातकः, **मनस्वी** - स्वमनोनुकुल-कार्यकर्ता, **अन्धः** - नेत्रहीनः, **दुष्टकर्मा** - दुराचारी, **परभवनरतः** - परगृहवासरतः, **क्षीणकायः** - कृशकायः, **च स्यात्** - भवति ।

**भावार्थः-** अथ लग्ने क्रूरग्रहाः लग्नभावे लग्नेशे पापग्रहयुक्ते सति अथवा सूर्यचन्द्रौ पापग्रहमध्यगतौ एवं च सूर्यचन्द्र-योः सप्तमे भौमः स्यात् तथा च बुधः पृष्ठोयदराशितः (मेष,-वृष,-कर्क,-मकर-राशिषु) भवति । तदा उपर्युक्त त्रिषु योगेषु उत्पन्नः जातकः मनस्वी नेत्रहीनः, दुराचारी, परभवनरतः कृशकायश्च भवति ।

## धनभावफलम्

**कोशाधीशः स्वराशौ सुरगुरुसहितः सर्वसम्पत्प्रदः स्यात्**
**केन्द्रे वाथ त्रिके चेद्भवति हि मनुजः क्लेशभाग् द्रव्यहीनः ।**
**स्वान्त्याधीशौ त्रिकस्थौ कवितनुपयुतौ स्यात्तदा नेत्रहीन**
**चन्द्रः पापेन युक्तो धनभवनगतः शुक्रयुङ् नेत्रहीनः ॥ ४ ॥**

**अन्वयः-** कोशाधीशः सुरगुरुसहितः स्वराशौ केन्द्रे वा सर्वसंपत्प्रदः स्यात् । अथ त्रिके चेत्तदा मनुजः क्लेशभाग् द्रव्यहीनश्च भवति । स्वान्त्याधीशौ कवितनुपयुतौ त्रिकस्थौ चेत् तदा नेत्रहीनः स्यात् । पापेन युक्तश्चन्द्रः धनभवनगतः शुक्रयुक् नेत्रहीनः स्यात् ।

**व्याख्या-** **कोशाधीशः** - धनेशः, **सुरगुरुसहितः** - गुरुणा युक्तः, **स्वराशौ** - निजगृहे, **वा** - अथवा **केन्द्रे** - केन्द्रस्थाने, **सर्वसम्पत्प्रदः** - निखिलैश्वर्य-प्रदः, **स्यात्** - भवति, **अथ त्रिके** - त्रिकभवने, **चेत्तदा** - भवेत्तदा, **मनुजः** - नरः, **क्लेशभाग्** - कष्टभोगी, **द्रव्यहीनः** - धनहीनः, **च भवति** - स्यात् - **स्वान्त्याधीशौ** - द्वितीयद्वादशस्थानाधीपौ, **कवितनुपयुतौ** - शुक्रलग्नेशसहितौ **त्रिकस्थौ** - त्रिकस्थानगतौ, **तदा** - मनुजः, **नेत्रहीनः** - अन्धः, **स्यात्** - भवति, **पापेन** - पापग्रहेण, **युक्तः**- सहितः, **चन्द्रः** - शशी, **धनभवनगतः** - द्वितीयस्थः, **शुक्रयुक्** - शुक्रेण सहितः **नेत्रहीनः** - नयनरहितः, स्यात् ।

**भावार्थः-** यस्य कोशाधीशः गुरुणा सह निजगृहे वा केन्द्रस्थाने (१, ४, ७, १०) तिष्ठेत् तदा नरः निखिलैश्वर्यप्रदो भवति । यदि गुरुयुक्तः धनेशः त्रिक-(६, ८ १२) स्थाने भवेत्तदा निश्चयेन अन्धो भवति । पापग्रहः शुक्रः युक्तश्चन्द्रः लग्नात् द्वितीयभावे भवेत्तदाऽपि नरः नेत्रहीनो भवति ।

## अशुभयोगः

**शुक्रः सेन्दुस्त्रिकस्थो जनुषि निशिनरः प्राप्नुयादन्धकत्वं**
**जन्मान्धः सार्कशुक्रस्तनुभवनपतिः स्यात्तदानीं मनुष्यः ।**
**एवं तातानुजाम्बासुतनिजगृहिणीस्थाननाथाः स्थिताश्चे**
**दादेश्यं तत्र तेषां प्रवरमतियुतेरन्धकत्वं तदानीम् ॥ ५ ॥**

**अन्वयः-** सेन्दु शुक्रः जनुषि त्रिकस्थः नरः निशि अन्धकत्वं प्राप्नुयात् । सार्कशुक्रौस्तनुभवनपतिः (त्रिके) तदानीं मनुष्यः जन्मान्धः स्यात् । एवं तातानुजाम्बासुतनिजगृहिणीस्थाननाथाः (त्रिकस्थाः) स्थिताः चेत् तदानीं प्रवरमतियुतैः तत्र तेषाम् अन्धकत्वम् आदेश्यम् ।

**व्याख्या-** **सेन्दुशुक्रः** - चन्द्रयुक्तःशुक्रः, **जनुषि** - जन्मकाले, **त्रिकस्थः** - त्रिकस्थानगतः, **( तदा ) नरः** - जातकः **निशि**-रात्रौ, **अन्धकत्वं**-नेत्रहीनत्वं, **प्राप्नुयात्** - प्राप्नोति, **सार्कशुक्रौ** - सूर्यसहितः शुक्रः, **तनुभवनपतिः** - लग्नेशः, **त्रिकस्थस्तदानीं** - तदा, **मनुष्यः**-नरः, **जन्मान्धः** - जन्मत एव अन्धः स्यात् , **एवं**-अनेन, **तातानुजाम्बासुतनिजगृहिणीस्थाननाथाः** - दशम - तृतीय - चतुर्थ - पञ्चम - सप्तम-स्थानाधिपतयः (रविचन्द्रशुक्रैः संयुतः त्रिकस्थाः स्थिताः) **चेत्** - तदा, **तदानीं** - तर्हि **प्रवरमतियुतैः** - देवज्ञैः, **तत्र** - तस्मिन्, **तेषां** - तातादीनां, **अन्धकत्वं** - नेत्रहीनत्वम्, **आदेश्यं** - वक्तव्यम् ।

**भावार्थः-** यस्य जन्मकाले चन्द्रयुक्तः शुक्रः त्रिक् स्थाने गतः तदा मानवः रात्र्यन्धौ भवति । एवं रविशुक्राभ्यां युतो लग्नेशः यदि त्रिकस्थः तदानीं मनुष्यः जन्मान्धो भवति । अनेनैव प्रकारेण दशम - तृतीय - चतुर्थ - पञ्चम - सप्तमाधीशाः (रविचन्द्रशुक्रैः संयुतास्त्रिकस्थानस्थिताः चेत् तथा प्रवरमतियुतैः ज्योतिर्विद्भिः तत् तातादीनां (पितृ - भ्रातृ - मातृ - पुत्र कलत्रादीनां) अन्धकत्वम् आदेश्यम् ।

## सहजभावफलम्

**भ्रातृस्थानेशभौमौ व्ययरिपुनिधनस्थानगौ बन्धुहीनः**
**स्वक्षेत्रे सौम्यदृष्टे सहजभवनपे मानवः स्याच्च तद्वान् ।**
**केन्द्रस्थे बन्धुसौख्यं शुभविहगयुते स्याददभ्रं नराणां**
**पापैश्चेदन्यथैतत्तदनु निजधिया ज्ञेयमित्थं समस्तम् ॥ ६ ॥**

**अन्वयः-** भ्रातृस्थानेशभौमौ-व्ययरिपुनिधनस्थानगौ (भवेत्तदा) बन्धुहीनः स्यात् । सहजभवनपे स्वक्षेत्रे सौम्यदृष्टे मानवः तद्वान् (भ्रातृवान्) स्यात् । केन्द्रस्थे (सहजपे) शुभविहगयुते (तदा) नराणां अदभ्रं बन्धुसौख्यं (भवेत्) तदनुपापैः युते चेत् तदैतदन्यथा स्यात् इत्थं निजधिया समस्तं ज्ञेयम् ।

**व्याख्या-** **भ्रातृस्थानेश-भौमौ** - तृतीयेशकुजौ, **व्ययरिपु-निधनस्थानगौ** - द्वादशषष्ठाष्टम-स्थानगतौ, (भवेत्तदा) **बन्धुहीनः** - भ्रातृहीनः स्यात्, **सहजभवनपे** - तृतीयेशे, **स्वक्षेत्रे** - निजराशौ, **सौम्यदृष्टे** - शुभग्रह दृष्टे सति, **मानवः** - नरः, **तद्वान्** - बन्धुवान् स्यात्, **केन्द्रस्थे** - केन्द्रस्थाने, (सहजपे) **शुभविहगयुते** - शुभग्रहयुक्ते, (तदा) **नराणां** - मानवानां, **अदभ्रं बन्धुसौख्यं** - बहुभ्रातृसुखं, **तदनुपापैः** - पापग्रहैः, **युते** - युक्ते, **चेत्** - तदा, **तदैतदन्यथा** - अर्थात् बन्धुसौख्यं न स्यात्, **इत्थं** - अनेनप्रकारेण, **निजधिया** - स्वबुद्ध्या, **समस्तं** - समग्रं **ज्ञेयम्** - विचारणीयम् ।

**भावार्थः-** यस्य जन्मकाले तृतीयेश-भौमौ त्रिक-स्थानगतौ तदा जातकः बन्धुहीनो भवति । तृतीयेशे स्वराशौ शुभग्रहावलोकिते सति मानवः बन्धुहीनो भवति । तथैव सहजेशे शुभग्रहयुक्ते केन्द्रस्थे सति नराणां अधिकभ्रातृसौख्यं स्यात् । अनेन प्रकारेण तृतीयेशे पापग्रह युक्ते केन्द्रस्थे सति बन्धुसुखहानिर्भवति । इत्थं ज्योतिर्विद्भिः स्वबुद्ध्या समस्तं भावफलं विचारणीयम् ।

## चतुर्थभावफलम्

**पातालेशः स्वराशौ शुभखचरयुतो भाग्यनाथेन युक्तः**
**सामन्तः स्यात्ततश्चेत्सुरपतिगुरुणा वाहनेशस्तनुस्थः ।**
**संदृष्टौ राजपूज्यस्तदनु च हिबुकाधीश्वरो लाभसंस्थो**
**यानं पश्यन्नराणां निवहमभिमतं वाहनानां प्रदत्ते ॥ ९ ॥**

**अन्वयः-** पातालेशः स्वराशौ शुभखचरयुतः भाग्यनाथेन युक्तः चेत् सामन्तः स्यात् । ततः तनुस्थः वाहनेशः सुरपतिगुरुणा संदृष्टः (तदा) राजपूज्यः । तदनु च हिबुकाधीश्वरः लाभसंस्थः यानं पश्यन् नराणाम् अभिमतं वाहनानां निवहं प्रदत्ते ।

**व्याख्या-** **पातालेशः** - चतुर्थेशः, **स्वराशौ** - निजभवने, **शुभखचरयुतः** - शुभग्रहसहितः, **भाग्यनाथेन युक्तः**- नवमेशेन युतः, **चेत्तदा** - भवेत्तदा, **सामन्तः** - मांगलिकः स्यात्, **ततः** - तत् पश्चात्, **तनुस्थः** - लग्नस्थितः, **वाहनेशः** - सुखेशः, **सुरपतिगुरुणा** - बृहस्पतिना, **संदृष्टः** - आलोकितः, **तदा राजपूज्यः** - नृपवन्द्यः स्यात्, **तदनु** - तत् पश्चात् च, **हिबुकाधीश्वरः** - चतुर्थेश्वरः, **लाभसंस्थः**-एकादशस्थः, **यानं पश्यन्** - चतुर्थमवलोकयन्, **नराणां** - मानवानां, **अभिमतं** - अभिलषितं, **वाहनानां** - यानानां, **निवहं** - समूहं, **प्रदत्ते** - प्रददाति ।

**भावार्थः-** नवमेश-सहितः चतुर्थेशः स्वगृहे शुभग्रहयुक्तो भवेत्तदा जातकः सामन्तो भवति । यदि सुखेशः लग्नगतः तथा च गुरुदृष्टः चतुर्थेशः स्यात्तदा राजपूज्यो भवति । एवं च एकादशस्थानगतः गुरुणा दृष्टः चतुर्थेशः अथवा चतुर्थस्थानं पश्यन् भवति, तदा नराणामभिलषितं वाहनसमूहं प्रदत्ते ।

## गृहप्राप्तियोगः

**स्वक्षेत्रे तुर्यनाथस्तनुपतिसहितः स्यादकस्माद् गृहाप्तिः**
**सौहार्दं वा सुहृद्भिस्तदितरगृहगश्चेद् गृहालभ्ययोगः ।**
**यावन्तः पापखेटा धनदशमगृहप्रान्त्यपैश्चेत्त्रिकस्थाः**
**युक्तास्तावत्प्रमाणा ज्वलनवशगताः क्लेशदाः स्युर्गृहा नुः ॥ १० ॥**

**अन्वयः-** तनुपतिसहितः तुर्यनाथः स्वक्षेत्रे अकस्माद् गृहाप्तिः वा सुहृद्भिः सौहार्दं तदितर- गृहगश्चेत् गृहालभ्ययोगः यावन्तः पापखेटाः धनदशमगृहप्रान्त्यपैश्चेत्त्रिकस्थास्तावत्प्रमाणा ज्वलनवशगताः गृहाः नुः क्लेशदाः स्युः ।

**व्याख्या-** **तनुपतिसहितः** - लग्नेशयुक्तः, **तुर्यनाथः** - चतुर्थेशः, **स्वक्षेत्रे** - निजगृहे, **अकस्माद्** - सहसा, **गृहाप्तिः** - भवनलाभः, **वा** - अथवा, **सुहृद्भिः** - मित्रजनैः, **सौहार्दं** - प्रीतिः स्यात्, **तदितरगृहगः** - स्वगृहादन्यभावस्थितः, **चेत्** - तदा, **गृहालभ्ययोगः** - गृहप्राप्तियोगः, **यावन्तः** - यावान्, **पापखेटाः** - पापग्रहाः, **धनदशमगृहप्रान्त्यैः** - द्वितीय - दशम - चतुर्थ - द्वादशस्थानाधिपैः, **युक्ताः** - सहिताः, **त्रिकस्थाः** - त्रिक स्थानगताः, **तावत्** - तावान्, **प्रमाणाः** - संख्यकाः, **गृहाः**- भवनानि, **नुः** - नराणां, **क्लेशदाः** - दुःखप्रदाः, **स्युः**-भवेयुः ।

**भावार्थः-** लग्नेशयुक्तः चतुर्थेशः स्वगृहे स्यात्तदा अकस्मात् गृहाप्तिः स्यात् वा मित्रजनैः प्रीतिः स्यात् । यदि स्वगृहादन्यभावस्थितः चेत्तदा गृहप्राप्तियोगो भवति । यावन्तः पापग्रहाः धन - दशम - गृहप्रान्त्यैयुक्ताः त्रिक स्थानगताः तत् प्रमाणसंख्यानि भवनानि नरस्य अग्न्याधीनत्वात् दुःख-प्रदानि स्युः ।

## वाहननाशयोगः

**यावन्तो वाहनस्थाः शुभविहगदृशां गोचरा नो भवेयु-**
**स्तावन्तो वा विरामाः परमगुणवतां वाहनानां नृणां स्युः ।**
**क्रूराः पश्यन्ति यानं व्ययनिधनगताश्चेत्तदा तद्वदेव**
**प्राज्ञैरादेश्यमेषां खलु शुभकरणं शान्तिकं वाहनानाम् ॥ ११ ॥**

**अन्वयः-** यावन्तः वाहनस्थाः शुभविहगदृशां गोचरा नो भवेयुः तावन्तः नृणां परमगुणवतां वाहनानां विरामाः स्युः । वा व्ययनिधनमताः क्रूरा यानं पश्यन्ति चेत्तदा तद्वदेव फलं स्यात् । प्राज्ञः एषां वाहनानां खलु शुभकरणं शान्तिकम् आदेश्यम् ।

**व्याख्या-** **वाहनस्थाः** - चतुर्थभवनस्थिताः, **यावन्तः** - यावान्, **शुभविहगदृशां गोचराः**-शुभग्रहदृष्टा, **नो भवेयुः** - न भवन्ति, **तावन्तः** - तावान्, **नृणां** - नराणां, **परमुणवतां** - उत्कृष्ट गुणयुक्तानां, **वाहनानां** -

यानानां **विरामाः**-विनष्टाः, **स्युः** - भवन्ति, **वा** - अथवा **व्ययनिधनगताः** - द्वादशाष्टमस्थाः, **क्रूराः** - पापग्रहाः, **यानम्पश्यन्ति** - चतुर्थमवलोकयन्ति, **चेत्तदा तद्वदेव** - पूर्वोक्तफलसदृशमेव, **फलं स्यात्** - (वाहनानां विनाशाः स्युः), **प्राज्ञैः** - बुद्धियुक्तजनैः, **एषां** - वाहनानां, **खलु** निश्चयेन, **शुभकरणं** - कल्याणप्रदं, **शान्तिकं** - शान्तिकर्म, **आदेश्यं** - विधेयम् ।

**भावार्थः-** चतुर्थस्थानस्थिताः यावन्तः पापग्रहाः शुभग्रहदृष्टिरहिताः भवेयुः । तावन्तो मानवानां परमगुणयुक्तानां वाहनानां विनाशाः स्युः । वा चेद् द्वादशाष्टमस्थाः यावन्तः क्रूरग्रहाः चतुर्थभवनं पश्यन्ति तदा तावन्तो वाहनानां विनाशाः स्युः । तदर्थं प्राज्ञैः एषां वाहनानां निश्चयेन कल्याणप्रदं शान्तिकर्म आदेश्यम् ।

**सहजे सहजाधीशे षडादित्रयगेऽपि वा ।**

**सहजेऽपि विशेषेण भ्रातुः सौख्यं न जायते ॥**

**अन्वयः-** सहजाधीशे सहजे वा षडादित्रयगे अपि (तदा) सहजे अपि विशेषेण भ्रातुः सौख्यं न जायते ।

**व्याख्या-** **सहजाधीशे** - तृतीयेशे, **सहजे** - तृतीयस्थाने वा, **षडादित्रयगे** - षष्ठाष्टमद्वादशस्थानस्थिते सति भ्रातृसौख्यं न स्यात् । विशेषेण **सहजे** - सहजस्थाने (तृतीयेशे) अपि **भ्रातुः** - बन्धोः, **सौख्यं**-सुखं **न** - नहि, **जायते** - भवति ।

**भावार्थः-** तृतीयेशे तृतीयभवने स्थिते अथवा षष्ठाष्टमद्वादशस्थानस्थिते सति भ्रातृसौख्यं न भवति । विशेषेण सहजस्थाने तृतीयेशस्य स्थितिरपि बन्धुसुखहानिं करोति ।

**सहोत्थभावेशकुजौ सपापो पापालये वा भवतो जनस्य ।**

**उत्पाद्य सद्यो निहतः सहोत्थान् इतीरितं जातकतत्त्वविज्ञैः ॥**

**अन्वयः-** यस्य सहोत्थाभावेशकुजौ सपापो वा पापालये भवतः (तदा) जनस्य उत्पाद्य सहोत्थान् सद्यः निहतः इति जातकतत्त्वविज्ञैः ईरितम् ।

**व्याख्या-** **यस्य** - जातकस्य, **सहोत्थाभावेशकुजौ** - तृतीयेश-भौमौ, **सपापो**-पापयुक्तो **वा** - अथवा **पापालये** - पापस्थाने **भवतः** - स्थिते स्तः (तदा) **जनस्य** - जातकस्य **उत्पाद्य** - जन्मत एक सहोत्थान् - भ्रातृबान्धवान् **सद्यः** - सहसा **निहतः** - विनष्टः इति **जातकतत्त्वविद्भिः**- होराशास्त्रज्ञैः **ईरितम्** - कथितम्।

**भावार्थः-** तृतीयेशः तथा भौमः यदि पापग्रहयुक्तौ अथवा पापग्रहराशिगतौ तर्हि जातकस्य भ्रातृणां जन्मकाल एव मृत्युकालो भवति, इत्थं ज्योतिर्विद्भिः कथितमस्ति ।

**स्त्रीखेटः सहजाधीशः शुक्रो वाथ निशाकरः ।**

**तत्रगो भगिनीं दत्ते भ्रातरं पुरुषग्रहः ॥**

**अन्वयः-** सहजाधीशः स्त्रीखेटः अथ शुक्रः वा निशाकरः (च) तत्रगः (तदा) भगिनीं दत्ते (यदि) पुरुषग्रहः सहजाधीशः तदा भ्रातरं दत्ते ।

**व्याख्या-** **सहजाधीशः** - तृतीयेशः **स्त्रीखेटः** - स्त्रीग्रहः **अथ शुक्रः** - भार्गवः **वा** - अथवा **निशाकरः** - चन्द्रः (च) **तत्रगः** - तत्रस्थः (तदा) **भगिनीं** - सहजां **दत्ते** - प्रददाति । (यदि) **पुरुषग्रहः** - पुरुषखेटः **सहजाधीशः** - तृतीयेशः, **तदा भ्रातरं** - सहजं **दत्ते** - प्रददाति ।

**भावार्थः-** यदा तृतीयेशः स्त्रीग्रहः अथवा शुक्रः वा चन्द्रः च तत्र एव स्थितः तदा भगिनीं ददाति । यदि पुरुषग्रहः तृतीयेशः तदा भ्रातरं प्रददाति ।

## स्वाध्यायः

**१. अधस्तनेषु प्रश्नेषु योग्यमुत्तरं चित्वा लिखत ।**

(१) पापयुक्तः लग्नेशः कीदृशं सुखं न ददाति ?

(क) धनसुखम् (ख) भार्तृसुखम् (ग) शरीरसुखम् (घ) पुत्रसुखम्

(२) स्वगृहस्थः अङ्गाधीशं जातकं ............... करोति ?

(क) ज्ञानवान् (ख) पुत्रवान् (ग) धनवान् (घ) कलत्रवान्

(३) मेष–वृष–कर्क–मकरराशयः सन्ति ?

(क) अरुणोदयराशयः (ख) पृष्ठोदयराशयः (ग) केन्द्रराशयः (घ) त्रिकोणराशयः

(४) कोशाधीशः स्वराशौ सुरगुरुसहितश्चेत्तदा मानवः स्यात् ?

(क) सर्वसम्पत्प्रदः (ख) सर्वसुखप्रदः (ग) सर्वविद्याप्रदः (घ) सर्वज्ञानप्रदः

(५) पापयुक्तश्चन्द्रः धनभवनगते सति जातको भवति ?

(क) सुखहीनः (ख) अङ्गहीनः (ग) नेत्रहीनः (घ) श्रोत्रहीनः

(६) जन्मकाले कौ त्रिकस्थौ भवेतां तदा नरः रात्र्यन्धकत्वं प्राप्नुयात् ?

(क) सूर्य–शुक्रौ (ख) सूर्य–चन्द्रौ (ग) सूर्य–भौमौ (घ) चन्द्र–शुक्रौ

(७) भ्रातृस्थानेश–भौमो कस्मिन्स्थाने जनं बन्धुहीनं करोति ?

(क) केन्द्रस्थाने (ख) त्रिकोणस्थाने (ग) त्रिकस्थाने (घ) त्रिषडायस्थाने

(८) पातालेशः स्वराशौ शुभग्रहयुक्तां भाग्यनाथेन युतः चेत् जातको भवति ?

(क) संन्यासी (ख) सामन्तः (ग) मठाधीशः (घ) वाक्कीलः

(९) चतुर्थस्थानगताः यावन्तः पापग्रहाः शुभद्रष्टिरहिताः भवेयुः तावन्तो विनाशाः स्युः ?

(क) वाहनानाम् (ख) गृहाणाम् (ग) कलत्रानाम् (घ) पुत्राणाम्

(१०) तुर्यनाथोऽस्ति ?

(क) तृतीयेशः (ख) चतुर्थेशः (ग) पञ्चमेशः (घ) सप्तमेशः

**२. एकैक-वाक्येनोत्तराणि लिखन्तु ।**

(१) जातकः कदा आधिव्याधिप्रकोपं व्रजति ?

(२) क्षीणकायः जनः कस्मिन्योगे भवति ?

(३) पापयुक्तश्चन्द्रः धनभवनगतः तदा जातकः कीदृशो भवति ?

(४) कस्मिन्योगे जातकस्यान्धकत्वं गदितमस्ति ?

(५) नराणामधिकभ्रातृसौख्यं कदा भवति ?

(६) चतुर्थेश्वरः लाभस्थ सन् यानं पश्यति तदा किं भवति ?

(७) गृहालभ्ययोगः कदा भवति ?

**३. श्लोकपूर्तिं कृत्वा भावार्थो लेख्यः ।**

(१) अङ्गाधीशः स्वगेहे व्यय ................. ।

(२) भ्रातृस्थानेश भौमौ ....................... ।

(३) पातालेशः स्वाराशौ ...................... ।

**४. अ-विभागेन सह ब-विभागस्य संयोजनं कुरुत ।**

| अ | ब |
|---|---|
| (१) कोशाधीशः त्रिकस्थाने | (१) सर्वजनमान्यः करोति |
| (२) पापखेटाः | (२) जातकः जन्मान्धो भवति |
| (३) भ्रातृस्थानेशभौमः | (३) द्रव्यहीनत्वं करोति |
| (४) सार्कशुक्रस्तदनुभवनपतिः तदा | (४) दुःखप्रदानि भवनानि ददन्ति |
| (५) स्वगृहस्थ अङ्गाधीशः | (५) बन्धुहीनः करोति |
| | (६) धनहीनः करोति |

**५. टिप्पणी लेख्या ।**

(१) तनुभावस्याशुभफलम् ।

(२) भ्रातृप्रदयोगाः ।

(३) सुखप्रदयोगाः ।

**६. विस्तरेणोत्तराणि लिखत ।**

(१) प्रथमभावस्य शुभफलानि वर्णयत ।

(२) ग्रन्थोक्तदिशा धनभावस्य फलवर्णनं कुरुत ।

(३) जातकस्यान्धकत्वयोगानां वर्णनं कुरुत ।

(४) भ्रातृसौख्यप्रद-योगानां वर्णनं कुरुत ।

(५) चतुर्थभावस्थगृहप्राप्तियोगानां वर्णनम् ।

**अध्यापकानां कृते**

- जन्माङ्गचक्रमाध्यमेन सौख्यप्रदयोगानां निदर्शनं ज्ञानं च प्रदातव्यम् ।

**छात्राणां कृते**

- शास्त्रस्यान्यग्रन्थस्थित-वाहनादियोगानां फलकथनं करणीयम् ।

# ४

# भावाध्यायः २ –
# ( पञ्चमतः अष्टमभावपर्यन्तम् )

## पञ्चमभावफलम् :

### प्रास्ताविकम्

लोकानां प्राक्कर्मविपाकव्यञ्जकत्वं शास्त्रस्यास्य प्रयोजनम् । अर्थात् सत्पात्रशुभाशुभकथनादिहलोकपरलोकसिद्धिः । तदनु सारमस्मिन् प्रकरणे विद्या–सन्तति–शत्रु–कलत्रायुर्दायादि विषयाऽधारित शुभाशुभाख्यफलकथनं वर्णितमस्ति । प्रकरणमिदं ज्योतिर्विद्भिः होरातन्त्रमहार्णवप्रकरणे महदुपकारकं सद्ज्ञानप्रदायकं भविष्यति मे दृढो विश्वासः वर्तते ।

**विद्यास्थानाधियो वा बुधगुरुसहितश्चेद्त्रिके वर्तमाने ।**
**विद्याहीनो नरः स्यादथ नवमनिजक्षेत्रकेन्द्रेषु तद्वान् ।**
**बालत्वं वृद्धता वा यदि गगनसदां जन्मकाले तदा स्यात्**
**प्रज्ञामान्द्यंनराणामथ यदि विहगः स्वर्क्षगो दोषहृत्स्यात् ॥ १ ॥**

**अन्वयः-** विद्यास्थापनाधिपः वा बुधगुरुसहितः त्रिके चेत् (तदा) नरः विद्याहीनः भवति । अथ नवमनिजक्षेत्रकेन्द्रेषु (पञ्चमेश) चेत् तद्वान् भवति । यदि जन्मकाले गगनसदां बालत्वं वृद्धता वा तदा नराणां प्रज्ञामान्द्यं स्यात्। अथ यदि विहगः स्वर्क्षगः (चेत्) तदा दोषहृत् स्यात् ।

**व्याख्या-** विद्यास्थानाधिपः पञ्चमेशः वा **बुधगुरुसहितः** – चन्द्रजगुरुणा सहत्रिके-त्रिके चेत् (तदा) **नरः**-जातकः **विद्याहीनः** – निरक्षरः – स्यात् । **अथ यदि** – चेत् **पञ्चमेशः** – विद्याधिपः **नवमनिजक्षेत्रे केन्द्रेषु** – भाग्यतनुकेन्द्रस्थानेषु स्थितः **तदा** – तर्हि **जातकः** – नर : **तद्वान्** – विद्वान्, **भवति**–जायते । **यदि**– यदा **जन्मकाले** – जन्मसमये **गगनसदां**– ग्रहाणां **बालत्वं**– बाल्यावस्था **वृद्धता** – वृद्धावस्था वा **तदा**– तर्हि **नराणां**–मनुष्याणां **प्रज्ञामान्द्यं** – मन्दवृद्धिः **स्यात्** – भवति । अथ **यदि** – चेत् **विहगः**– ग्रहः **स्वर्क्षगः** – निज- क्षेत्रीयः चेत् **तदा** – तर्हि **दोषहृत्** – दोषहर्ता **स्यात्** – भवति ।

**भावार्थः-** पञ्चमेशः अथवा बुधगुरुसहितः पञ्चमेशः त्रिक (६, ८, १२) स्थाने भवति तदा मानवः विद्याहीनो भवति। पञ्चमेशः एकाकी वा बुधगुरुभ्यां युक्तःस्वराशौ, भाग्यस्थाने केन्द्रे वा भवति तदा जातकः विद्वान भवति। यदि जन्मकाले पञ्चमेशःबालत्व–वृद्धता – युक्तः तदा जातकः मन्दबुद्धियुक्तो भवति किन्तु यदि पञ्चमेशः स्वक्षेत्रे स्थित्वा (बालत्व वृद्धतारहितः) चेत् तदा जातकस्य मन्द बुद्धियोगेन भवति ।

**विद्याहीनयोगः**




**विद्यावान् योगः**



**मन्दबुद्धि योगः**




बुध अंशः कला विफला

२८ १० ५०

**मन्दबुद्धि अभावयोगः**




शनि अंशः कला विफला

१५ ६१ ५३

## मूकसन्तानभावयोगौ

**वाक्स्थानेशौ गुरुर्वा व्ययरिपुविलयस्थानगो वाग्विहीन-**

**श्चैवं पित्रादिकानां पतय इह युता मूकता स्याच्च ताभ्याम् ।**

**वागीशात् पञ्चमेशस्त्रिकभवनगतः पुत्र धर्माङ्गनाथा**

**रन्ध्रद्वेष्यान्तिमस्था यदि जनुषि नृणमात्मजानामभावः ॥ २ ॥**

**अन्वयः-** वाक्स्थानेशः वा गुरुः व्ययरिपुविलयस्थानगः (तदा) नरः वाग्विहीनः (भवति) एवं च पित्रादिकानां पतयः ताभ्यां युताः तदा इह मूकता स्यात् । यदि जनुषि वागीशात् पञ्चमेशः त्रिकभावगतः (तथा) पुत्रधर्माङ्गनाथाः रन्ध्रेद्वेष्यान्तिमस्थाः (तदा) नृणाम् आत्मजानाम् अभावः ।

**व्याख्या-** **वाक्स्थानेशः** पञ्चमेशः वा **गुरुः**-बृहस्पतिः व्ययरिपुविलयस्थानगः षष्ठाष्टमद्वादशस्थानस्थितः तदा **नरः**-जातकः **वाग्विहीनः**-मूको भवति एवं च पित्रादिकानां **पलयः**-पित्रादिभावनां स्वामिनः **ताभ्यां**-पञ्चमेशगुरुभ्या **युताः**-युक्ताः **तदा**- तर्हि **इह**-अत्र **मूकता**-मूकत्वं स्यात् । **यदि** - जनुषि जन्मकाले **वागीशात्**-गुरुतःपञ्चमेशः -सन्तानाधियःत्रिकभवनगतः (६, ८, १२) स्थानस्थितः (तथा) **पुत्रधर्माङ्गनाथाः** -पञ्चमनवमनिजनाथाः रन्ध्रे **द्वेष्यान्तिमस्थाः** - (६, ८, १२) त्रिकस्थानगताः (तदा) **नृणां**-मानवानाम् **आत्मजानां** - पुत्रादिकानां **अभावः**-हानिर्भवति ।

**भावार्थः-** यदि बृहस्पतिः पञ्चमेशो भूत्वा त्रिकस्थानस्थः तदा जातकः वाग्विहीनो भवति इत्थं पितृ-मातृ-भ्रातृ-कलत्रादीनां पतयः सुरगुरुसहितः त्रिकस्थाने चेत्तदा नराणां मूकत्वं वक्तव्यम् । बृहस्पतिः वा पञ्चमेशः त्रिकस्थाने पुत्रधर्माङ्गनाथाः त्रिकस्थानगताः तदा जातकानां पुत्रादिकानामभावो भवति ।

## अन्यसन्तानयोगाः

**किञ्चित्कालं विलम्बः शुभखगसहितास्तेऽथ कर्के सुतर्क्षे**

**चन्द्रे कन्याप्रजावान्प्रमिततनयवांश्चाथ देवेन्द्रपूज्यात् ।**

**क्रूरश्चेत् पञ्चमस्थो गुरुरपि सुतगः स्यात्तदाऽपत्यहीन**

**इच्छायापुत्रः स्वगेहाद्यदि भवति सुते सूनुरेकस्तदानीम् ॥ ३ ॥**

**अन्वयः-** ते शुभखगसहिताः (चेत्तदा) किञ्चित्कालं विलम्बः (स्यात्) अथ सुतर्क्षे कर्के चन्द्रे (सति जातकः) कन्या प्रजावान् प्रमिततनयवान् च स्यात् । यदि देवेन्द्र पूज्यात् क्रूरः गुरुरविसुतगः चेत् तदा अपत्यहीनः (स्यात्) छायापुत्रः यदि स्वगेहात् सुते भवति तदानीम् एकः सूनुः स्यात् ।

**व्याख्या-** **ते शुभखगसहिताः** - शुभग्रहयुताः चेत् **तदा** - तर्हि **किञ्चित्कालं**-समयानन्तरं विलम्बेन पुत्रलाभो भवति। **अथ**-अनन्तरं **सुतर्क्षे** पञ्चमस्थाने **कर्के** - कर्कराशौ चन्द्रेसोमे सति जातकः मानवः **कन्या**-सुता प्रजावान् **प्रमिततनयवान्** - स्वल्यसन्ततिवान् च स्यात् । यदि **देवेन्द्रपूज्यात्** - गुरोः पञ्चमस्थः पञ्चमभावस्थितः **क्रूरः** - पापग्रहः गुरुः बृहस्पतिः अपि च सुतगः पञ्चमस्थः चेत् **तदा** - तर्हि **अपत्यहीनः** - सन्तानहीनो भवति । **छायापुत्रः** शनिः यदि स्वगेहात निजराशितः **सुते**-पञ्चमभावे स्यात् **तदानीं**- तस्मिन्काले **एकः सूनुः** एकैव पुत्रः जायते ।

**भावार्थः-** पुत्रधर्माङ्गनाथाः शुभग्रहेणयुक्ताः भवन्ति तदा (विवाहात्) किञ्चित्समयविलम्बेन पुत्रलाभो भवति । अथ पञ्चमभावे कर्कराशौ चन्द्रे सति जातकः कन्यावान् वा स्वल्पसन्ततिवान् च भवति । यदि गुरोः पञ्चमस्थः पापग्रहः गुरुश्च भवेतां तदा सन्तानरहितः स्यात । शनिः यदि निजभवनतः पञ्चमस्थः तदानीं एकपुत्रः भवति ।

**कुम्भे चेत्पञ्च पुत्रास्तदनु च मकरे नन्दनेऽप्यात्मजाः स्युः**
**तिस्रो भौमः सुतानां त्रितयमथ सुतादायको रौहिणेयः ।**
**इत्थं काव्यः शशाङ्को जनुषि च गुरुणा केवलेनैव पुत्राः**
**पञ्च स्युः केतुराह्वोः क्रियवृषभवने कर्कटे नो विलम्बः ॥ ४ ॥**

**अन्वयः-** लग्नात् नन्दने कुम्भे शनिश्चेद् पञ्चपुत्राः, तदनु च मकरे (शनिश्चेत्) तिस्त्रः आत्मजाः(भवन्ति) । तत्रस्थः भौमः चेत्तदा सुतानां त्रितयं, इत्थं जनुषि रौहिणेयः काव्यः वा शशाङ्को भवेत्तदा (सुतादायकः) केवलेन गुरुणा पञ्चपुत्राः स्युः । एवं क्रियवृषभवने कर्कटे वा केतुराह्वोः (स्थितिः) नो विलम्बः ।

**व्याख्या-** **लग्नात्** - प्रथमभावात् **नन्दने**-पञ्चमे **कुम्भे**-कुम्भराशौ **शनिश्चेत्** - मन्दस्य स्थितिश्चेद् पञ्चपुत्राः भवन्ति । **तदनु**-तनैव प्रकारेण च **मकरे**-मकरराशौ (शनिश्चेत्तदा) तिस्त्रः आत्मजाः सुताः भवन्ति । तत्रस्थः तस्मिन्स्थानस्थितः **भौमः** मङ्गलः चेत्तदा **सुतानां** - कन्याकानां **त्रितयं**-त्रयं वक्तव्यम् । इत्थं जनुषिः जन्मकाळे **रौहिणेयः** बुघः काव्यः शुक्रः **शशाङ्क**-चन्द्रः भवेत्तदा (सुतादायकः) केवलेन **गुरुणा**-बृहस्पतिना पञ्चपुत्राः स्युः । एवं (पञ्चमभावे) **क्रियवृषभवन**- मेषवृषराशौ **कर्कटे**-कर्क-राशौ वा **केतुराह्वोः** - सैंहिकेयशिख्योः स्थितिश्चेत नो **विलम्बः** - सन्तानलाभे- विलम्बो न भवति ।

**भावार्थः-** लग्नात् पञ्चमस्थाने कुम्भराशौ शनिश्चेत्तदा पुञ्चपुत्राः भवन्ति । तदनु तस्मिन् स्थाने मकरराशौ शनिश्चेत्तदा तिस्त्रःआत्मजाः भवन्ति । तत्रस्थः भौमः चेत्तदा सुतानां त्रितयं वक्तव्यम् । इत्थं जन्मकाले रौहिणेयः शुक्रः वा चन्द्रो भवेत्तदा कन्याप्रदः भवति । केवलेन गुरुणा पञ्चपुत्राः स्युः । पञ्चमभावे मेषवृषराशौ कर्के वा राहुकेतोः स्थितिश्चेत् सन्तानलाभे विलम्बो न भवति ।

## सन्तानलाभे वर्षज्ञानम्

**पापो वा वासवेज्यः सुखभवनगतः पञ्चमे वाऽष्टमे वा**
**शीतांशुः सन्ततेः स्यात् खगुणमितसमातुल्य एव प्रबन्धः ।**
**यावन्तःपापखेटाः तनवगृहगताः सौम्यदृष्ट्या न दृष्टाः**
**तावद्वर्षप्रमाणो नियतमिह भवेत् सन्ततेर्वा विलम्बः ॥ ५ ॥**

**अन्वयः-** पापः वा वासवेज्यः सुखभवनगतः (तथा च) शीतांशुः पञ्चमे अष्टमे वा स्यात्तदा खगुणिमतसमातुल्य एव प्रबन्धः (स्यात्) / अथवा यावन्तः पापखेटाः सौम्यदृष्टया न दृष्टाः तनयगृहगताः तावद्वर्षप्रमाणः नियतम् इह सन्ततेः विलम्बो भवेत् ।

**व्याख्या-** **पापः**-पापग्रहः **वा** - अथवा **वासवेज्यः** - सुरेज्यः **सुखभवनगतः** - चतुर्थ - स्थानगतः(तथा च) **शीतांशुः**-

चन्द्रः **पञ्चमे** – अष्टमेवा-पञ्चमभावे **अष्टम**-भावे वा **स्यात्तदा** – भवेत्तदा **खगुणिमतसमातुल्य** – त्रिंशद्वर्षपर्यन्तं एव **प्रबन्धः** – सन्तानलाभे प्रतिबन्धो भवति । अथवा यावन्तः **पापखेटाः** पापग्रहाः **सौम्यदृष्टया**- शुभग्रहदृष्ट्या न **दृष्टाः** – रहिताः तावद्वर्षप्रमाणः स्तावद्वर्षसंख्याकतुल्यः **नियतं**-निश्चितम् **इह**-अत्र **सन्ततेः**-पुत्राणां विलम्बो **भवेत्** – स्यात् ।

**भावार्थः**- पापग्रहो वा बृहस्पतिः चतुर्थभावगतः तथा च चन्द्रः पञ्चमे अष्टमे वा स्यात्तदा त्रिंशद्वर्ष-पर्यन्तं सन्तालाभे प्रतिबन्धो भवति । अथवा यावन्तः पापग्रहाः शुभग्रहदृष्ट्या न दृष्टाः तावद्वर्षप्रमाणं निश्चितमिह सन्तते विलम्बो भवति ।

## रिपुभावफलम्

**षष्ठेशे पापयुक्ते तनुनिधनगते नुः शरीरे व्रणाः स्युः**
**चादेश्यं तज्जनित्रीजनकसुतवधु बन्धुमित्रादिकानाम् ।**
**इत्थं तत्स्थानगामी शिरसि दिनमणिश्चानने शीतभानुः**
**कण्ठे भूमीतनूजोहृदि शशितनयो वाक्पतिर्नाभिमूले ॥ ६ ॥**

**भावार्थः**:- षष्ठेशे पापयुक्ते तनुनिधनगते नुः शरीरे व्रणाः स्युः । इत्थं जनित्रीजनक-सुत-वधु-बन्धु-मित्रादिकानां (शरीरे व्रणाः) आदेश्यम् । तत्स्थानगामी दिनमणि चेत् तदा शिरसि शीतभानुः (चेत्) आनने भूमितनुजः (चेत्) कण्ठे शशितनयः (चेत्) हृदि वाक्यतिः (चेत्) नाभिमूले व्रणाः स्युः ।

**व्याख्या**- **षष्ठेशे** – षष्ठाधिपे **पापयुक्ते** – क्रूरग्रहयुते **तनुनिधनगते** – लग्नाष्टमस्थाने ते सति **नुः** – नरस्य शरीरे – तनौ व्रणाः – गदः स्युः । **इत्थं** – अनेन प्रकारेण **जनित्रीजनकसुतवधुबन्धुमित्रादिकानां** – मातृ-पितृ-पुत्र-कलत्र-भ्रातृ-मित्रादिकानाम् अपि (शरीरे व्रणाः) **आदेश्यम्** – वक्तव्यम् । **तत्स्थानगामी** – उपयुक्तस्थाने **दिनमणिः** – सूर्यः चेत्तदा **शिरसि** – मस्तके, **शीतभानुः** – चन्द्रः **आनने** – मुखे **भूमितनुजः** – भौमः – **कण्ठे** – गले **शीशतनयः** – बुधः **हृदि** – हृदये वाक्पतिः गुरुः भवति तदा नाभिमूले **व्रणा** – गदाः स्युः ।

**भावार्थः**:- यस्य षष्ठेशे पापयुक्ते लग्नाष्टमस्थानगते जातकस्य शरीरे रोगाः भवन्ति । तथैव मातृ-पितृ-सुत-कलत्र-भ्रातृ – मित्रादिकानामपिव्रणाः आदेश्याः । इत्थं तत्स्थानगामी सूर्यः शिरसि, चन्द्रः मुखे भौमः कण्ठे बुधः हृदये गुरुश्च नाभिमूले व्रणाप्रदः भवति ।

**नेत्रे पृष्ठे च शुक्रो दिनकरतनयः स्यात् पदे चाधरे चेत्**
**केतुर्वा सैंहिकेयस्तदनु तनुपतिर्भौमिवत्क्षेत्रसंस्थः ।**
**आभ्यामालोकितः सन् भवति हि कतिचित्स्थानगो वा तदानीं**
**नेत्रे रोगी नरः स्यात् प्रवरमतियुतैर्होरिकैर्ज्ञेयमेवम् ॥ ७ ॥**

**अन्वयः**:- शुक्रः (षष्ठेशश्चेत्) नेत्रे पृष्ठे च (गदः) दिनकरतनयः चेत् पदे केतुर्वासैंहिकेयः (चेत्तदा) अधरे (व्रणाः स्युः) अथ यदि तनुपतिः भौमवित्क्षेत्रसंस्थः आभ्यां आलोकितः वा तदनु (लग्नपतिः ताभ्यां दृष्टः सन् कुत्रचित् स्थानगः तदानीं नरः नेत्रे रोगी स्यात् । एवं प्रवरमतियुतैः होरिकैः ज्ञेयम् ।

**व्याख्या**- **शुक्रः (षष्ठेशश्चेत्)** – भृगुः (लग्नाष्टमस्थानगतः तदा) **नेत्रे**-चक्षुषि-**पृष्ठे** – पृष्ठभागे च, **दिनकरतनयः** – शनिः चेत् पदे, केतुर्वा **सैंहिकेयः**-शिखीराहुर्वा (चेत्तदा) **अधरे**-ओष्ठे (व्रणाः स्युः) अथ यदि **तनुपतिः** – लग्नेशः भौमवित्क्षेत्र **संस्थः** – कुजबुधराशिगतः **आभ्यां** – कुजबुधाभ्यां **आलोकितः** -दृष्टः वा तदनु (लग्नपतिः ताभ्यां दृष्टः सन्) **कुत्रचित् स्थानगः** – यत्रकुत्रापि स्थितः तदानीं **नरः** – जातकः **नेत्रे**-चक्षुषि रोगी स्यात् । **एवं** – अनेन प्रकारेण **प्रवरमतियुतैः**- तीक्ष्णबुद्धिवद्भिः **होरिकैः**-दैवज्ञैः **ज्ञेयम्** – ज्ञातव्यम् ।

**भावार्थः-** शुक्रः षष्ठेशश्चेत लग्नाष्टमगतस्तदा नेत्रे पृष्ठस्थाने च, शनिश्चेत् पदे, केतुर्वा राहुः चेत्तदा अधरे व्रणाः स्युः । अथ यदि लग्नेशः कुजबुधाभ्यां दृष्टः वा लग्नपतिः ताभ्यां दृष्टः सन् कुत्रचिदपि स्थानगः तदानीं नरः नेत्रे रोगी भवति । एवं तीक्ष्णबुद्धिवद्भिः दैवज्ञैः ज्ञातव्यम् ।

**पुंल्लग्ने स्वीयतुङ्गे रिपुभवनपतौ वीक्षितेऽसन्नभोगै**

**रङ्गेनूनं नराणामरिजनवशतः स्याद् गदो गूढरूपः ।**

**रिष्फस्थाने स्थिते चेदरिसदनयतौ सिंहिकापुत्रयुक्ते**

**किं वा सप्ताश्वयुक्ते परगृहवसतिर्नीचवृत्तिर्नरः स्यात् ॥ ८ ॥**

**अन्वयः-** रिपुभवनपतौ- षष्ठेशौ पुलंग्नेवा स्वीयतुङ्गे असन्नभोगैः वीक्षिते(सति) नूनं नराणां अङ्गे अरिजनवशतः गूढरूपः गदः स्यात् । अरिसदनपतौ चेद् रिष्फस्थाने स्थिते सिंहिकापुत्रयुक्ते किं वा सप्ताश्वयुक्ते सति नरः परगृहवसतिः नीचवृत्तिश्च स्यात् ।

**व्याख्या-** **रिपुभवनपतौ**- षष्ठेशौ **पुंल्लग्ने**-पुरुष ग्रहलग्ने वा **स्वीयतुङ्गे** स्वोच्चे **असन्नभौगैः** - अशुभग्रहैः **वीक्षिते**- दृष्टि (सति) **नूनं**-निश्चितं **नराणां**-मानवानां **अङ्गे**-शरीरे **अरिजनवशतः**-शत्रुकृतः **गूढरूपः**-प्रच्छनः **गदः** - रोगः स्यात् । **अरिसदनपतौ**-षष्ठेशैचेद् रिष्फस्थाने द्वादशस्थे सति **सिंहिकापुत्रयुक्ते** - राहुणा युक्ते किं वा **सप्ताश्चयुक्ते**- सूर्ययुते सति **नरः** - जातकः **परगृहवसतिः** - अन्यभवननिवासी **नीचवृतिश्च**- नीचकर्मा च **स्यात्** - भवति ।

**भावार्थः-** षष्ठेशे पुरुषराशिगतलग्ने वा स्वोच्चराशौ अशुभग्रहैः वीक्षिते सति निश्चयेन नराणामङ्गे शत्रुकृतप्रच्छन्नगुप्तरोगो भवति । षष्ठेशे चेद् द्वादशस्थेसति राहुयुक्ते वा सूर्ययुते सति नरः परगृहनिवासी नीचवृत्ति-युक्तश्च भवति।

## सप्तमभावफलम्

**यावन्तो वा विहङ्गा मदन सदनगाश्चेन्नीजाधीशदृष्टा-**

**सत्वान्तो नुर्विवाहास्त्वथ सुमतिमता ज्ञेयमित्थं कुटुम्बे ।**

**कार्यो होरागमज्ञैरधिकबलवतां खेचराणां हि योगा**

**दादेश्यं तत्र वीर्यं रविविद्युकुभुवामङ्गदिक् शैलसंख्यम् ॥ ९ ॥**

**अन्वयः-** अथ-मदनसदनगाः यावन्तःविहङ्गा (शुभा वा पायाः) निजाधीशदृष्टाः चेत्तदा तावन्तः नुः विवाहाः स्युः। वा इत्थं सुमतिमता कुटुम्बे अपि ज्ञेयम् । होरागमज्ञैः अधिकबलतवां खेचराणां योगात् हि (विचारः) कार्यः, तत्र रविविधुकुभुवां (क्रमेण) अङ्गदिक् शैलसंख्यं वीर्यम् आदेश्यम् । (अन्य ग्रहाणां षट्संख्यकं बलं ज्ञेयम्)।

**व्याख्या-** **अथ** अनन्तरं **मदनसदनगाः**- सप्तमस्थानगताःयावन्तः **विहङ्गाः**-ग्रहाः (शुभा वा पायाः) **निजाधीशदृष्टाः**- सप्तमेशेनावलोकितः चेत्तदा तावन्तः **नुः** - नरस्य **विवाहाः**-लग्नाः स्युः । **वा इत्थं**- अनेन प्रकारेण **सुमतिमता**-बुद्धिमानेन **कुटुम्बे**-परिवारे अपि ज्ञेयम् । **होरागमज्ञैः** - ज्योतिर्विदैः **अधिकबलवतां** - अधिक बलशालीनां **खेचराणां**-ग्रहाणां योगात् **हि**-निश्चयेन (विचारः) कार्यः करणीयः । तत्र **रविविधुकुभुवां**- सूर्यचन्द्रकुजानां (क्रमेण) **अङ्गदिक्शैलसंख्यं**-षट्दशसप्तसंख्यं **वीर्य**-पराक्रमं(बलं) **आदेश्यम्** - कथनीयम्।

**भावार्थः-** अथ सप्तमस्थानगताः यावन्तः ग्रहाः शुभ वा पापग्रहः निजाधीशदृष्टाः (सप्तमेशेनावलोकिताः) चेत्तदा तावन्तः नरस्य विवाहाः भवन्ति । वा इत्थं बुद्धिमानेन परिवारे अपि ज्ञेयम् । ज्योतिर्विद्भिः अधिकबलवतां ग्रहाणां योगात् निश्चयेन विचारः कार्यः । तत्र सूर्यचन्द्रकुजानां । क्रमेण षट्दशसप्तसंख्याकं बलं अन्यानां तु षट्संख्यकं बलं आदेश्यम् ।

## शुभाशुभयोग :

**केन्द्रस्थावा त्रिकोणे यदि खलु गृहिणीकारकारण्या नभोगाः**

**कामार्थेशौ निजर्क्षे परिणयनविधिः स्यात्तदानीं नुरेकः ।**

**जायाधीशः कुटुम्बाधिपतिरपि युतश्चेत्त्रिके गर्हिताख्यैः**

**यावद्भिः शुक्रयुत्कोनियतमिहभवेत तावतीनां विराम ॥ १० ॥**

**अन्वयः-** यदि गृहिणीकारकाख्याः नभोगाः केन्द्रस्थाः वा त्रिकोणेस्थिताः तथा कामार्थेशौ निजर्क्षे तदानीं खलु नुः परिणयनविधिः एकः स्यात् । जायाधीशः कुटुम्बाधिपतिरपि शुक्रयुक्तः त्रिकेचेत् यावद्भिः गर्हिताख्यैः (युताः दृष्टाः वा) तावतीनाम् इह विरामः नियतं भवेत् ।

**व्याख्या-** यदि **गृहिणीकारकाख्या**-स्त्रीकारकाः **नभोगाः** ग्रहाः **केन्द्रस्थाः** केन्द्रस्थानगताः वा **त्रिकोणेस्थिताः**- त्रिकोणस्थाने स्थिताः तथा **कामार्थेशौ** सप्तमद्वितीयेशौ **निजर्क्षे** - स्वगृहे **तदानीं** - तर्हि **खलु** - निश्चयेन **नुः**-नरस्य **परिणयनविधिः** - विवाहः एकः स्यात् । **जायाधीशः** - सप्तमेशः **कुटुम्बाधिपतिरपि** - द्वितीयेश अपि **शुक्रयुक्तः** - भृगुयुतः त्रिके (६, ८, १२) स्थाने **चेत्** - तर्हि **यावद्भिः** - यावन्तः गर्हिताख्यैः पापग्रहैः (युतः दृष्टः वा) तावतीनां **इह**-अत्र विरामः नाशः **नियतं**-निश्चितं भवेत् ।

**भावार्थः-** यदि स्त्रीकारकाः ग्रहाः केन्द्र (१, ४, ७, १०) स्थानगताः वा त्रिकोण (५, ९) स्थानगताः तथा सप्तमद्वितीयेशौ स्वगहे स्थितौ तदानीं निश्चयेन नरस्य एकः विवाहः स्यात् । सप्तमेशः द्वितीयेश अपि शुक्रयुक्तः त्रिके चेत्तदा यावद्भिः पापग्रहैः युतः वा दृष्टः तावतीनां इह नाशः निश्चितं भवेत् ।

## गर्भाभावयोग

**लग्नस्थे सप्तसप्तौ दिनमणितनये कामगे चार्कमन्दौ**

**द्यूने चन्द्रे नभःस्थे न च यदि गुरुवाऽलोकिते नो प्रसूते ।**

**द्वेष्यरी मित्रमन्दौ द्विषि सितकिरणऽस्ते बुधेनेक्षिते नो**

**सूते द्वेष्ये जलर्क्षे यदि कुजरविजौ गर्भिणी स्यान्न नारी ॥ ११ ॥**

**अन्वयः-** सप्तसप्तौ लगस्थे दिनमणितनये कामगे अथ च अर्कमन्दौ द्यूने (गते सति) यदि गुरुणा न आलोकिते, चन्द्रे नभस्थे च (तदा) एवं द्वेष्येशे मित्रमन्दौ द्विषि बुधेन ईक्षिते, सितिकिरणे अस्ते सति तथा कुजरविजौ द्वेष्ये जलर्क्षे वा (स्थितौ तदा) नारी गर्भिणी न स्यात् ।

**व्याख्या-** **सप्तसप्तौ**-सूर्ये **लग्नस्थे**-लग्नस्थानगते **दिनमिणतनये**-शनैश्वरे **कामगे**-सप्तमस्थे अथ च **अर्कमन्दौ** - सूर्यशनैश्चरौ **द्यूने** - सप्तमस्थे (गति सति) यदि **गुरुणा** - बृहस्पतिना न **आलोकिते**- दृष्टे, **चन्द्रे** - सोमे **नभस्थे**-दशमस्थे च (तदा) एवं **द्वेष्येत्रो**- षष्ठेत्रो **मित्रमन्दौ** - सूर्य - शनैश्वरौ द्विषि - षष्ठगते **बुधेन**-चन्द्रजेन **ईक्षिते**-दृष्टे, सितिकिरणेचन्द्रे **अस्ते**-सप्तमस्थे सति तथा **कुजरविजौ** - भौमशनैश्वरौ द्वेष्येषष्ठस्थाने **जलर्क्षे** - चतुर्थे वा (स्थितौ तदा) **नारी**-स्त्री **गर्भिणी** - गर्भग्रहणकर्त्री न **स्यात्** - भवति ।

**भावार्थः-** सूर्ये लग्नस्थानगते शनैश्वरे सप्तमस्थे, अथ च सूर्यशनैश्चरौ सप्तमस्थे गते सति, यदि गुरुणा नावलोकिते, चन्द्रे दशमस्थे च तदा एवं षष्ठेशे सूर्यशनैश्चरौ षष्ठगते बुधेन दृष्टि सति, चन्द्रे सप्तमस्थे सति तथा भौमशनैश्चरौ षष्ठस्थाने चतुर्थे वा स्थितौ तदा जातकस्य नारी गर्भिणी न स्यात् ।

## अष्टमभावफलम्

**रन्ध्रस्थान-स्थिता वा स्थिरभवनगताः शुक्रवागीशसौम्याः**
**कृच्छ्राणां कर्मणां ना भवति हि नियतं कारकः स्तब्धभावः ।**
**बाल्ये दुःखी नरः स्थान्निधनगृहपतौ लाभयाते सुखी स्यात्**
**पश्चात् पापेऽल्पमायुः शुभखगसहिते दीर्घमायुर्नराणाम् ॥ १२ ॥**

**अन्वयः-** शुक्रवागीशसौम्याः रन्ध्रस्थानस्थिताः वा स्थिरभवनगताः तदा ना नियतं कृच्छ्राणां कर्मणां कारकः स्तब्धभावः (स्यात्) निधनगृहपतौ लाभयाते सति नरः बाल्ये दुःखी (पश्चात् सुखी स्यात्) एवं (लाभगताष्टमेशे) यावेसति अल्पमायुः तथा शुभखगसहिते नराणां दीर्घायुः स्यात् ।

**व्याख्या-** **शुक्रवागीशसौम्याः** - भृगुगुरुबुधाः **रन्ध्रस्थानस्थिताः** - अष्टमस्थाः वा **स्थिरभवनगताः** - स्थिरराशिगताः तदा **ना**- नरस्य **नियतं**-निश्चिंत **कृच्छ्राणां** - क्लिष्टकर्मणां **कारकः**-कर्ता **स्तब्धभावः** - अकोमलचित्तः (च स्यात्) **निधनगृहपतौ** - अष्टमस्थानाधिपे **लाभयाते**-लाभस्थाने सति **नरः** - जातकः **बाल्ये** - बाल्यकाले **दुःखी** - दुःखप्राप्तिकर्ता (पश्चात् सुखी स्यात्) **एवं** - अनेनप्रकारेण (लाभगताष्टमेशे) **पापे**-पापग्रहे सति **अल्पमायुः**-स्वल्पायुः, तथा **शुभखगसहिते** - शुभग्रहयुक्ते नराणां मानवानां **दीर्घायुः** - सुदीर्घम्-आयुः **स्यात्** - भवति ।

**भावार्थः-** बुधगुरुशुक्राः अष्टमस्थानगताः वा स्थिरराशिगताः भवन्ति तदा जातकस्य निश्चित क्लिष्टकर्मणां कारकः अकोमलचित्तश्च भवति । अष्टमेशौ लाभस्थानगते सति नरः बाल्यकाले दुःखी पश्चात् (बाल्यावस्थानन्तरं) सुखी स्यात् । एवं पापग्रहे लाभगताष्टमेशे सति अल्पायुः तथा शुभग्रहयुक्ते सति नराणां दीर्घायुः कथनीयम् ।

**कुर्यादायुर्गृहेशः खलखगयुगरिप्रान्त्य संस्थोऽल्पमायु -**
**श्चेल्लग्नाधीशयुक्तो निधनभवनपः स्वल्पमायुः प्रदत्ते ।**
**रन्ध्रस्थो वा चिरायुस्तदनु रविभवस्तत्र तद्वल्लयेशः**
**कोशस्थान स्थितशचेज्जनुषि हि मनुजो वैरियुक् तस्करः स्यात् ॥ १३ ॥**

**अन्वयः-** **आयुर्गृहेशः** खलरवगयुक् अरिप्रान्त्यसंस्थः तदा अल्पमायुः प्रदत्ते । चेद् निधनभवनपः लग्नाधीशयुक्तः तदा (अपि) स्वल्पमायुः वा अष्टमेशः रन्ध्रस्थः तदा चिरायुः,तदनु रविभवः तदा तद्वत् चिरायुः स्यात् वा जनुषि लयेशः चेद् कोशस्थानस्थितः तदा हि मनुजः वैरियुक् तस्करः च स्यात् ।

**व्याख्या-** आयुर्गृहेशः अष्टमेशः **खलखगयुक्**-पापग्रहयुक्तः **अरिद्रान्यसंस्थाः**- षष्ठद्वादशस्थानगतः तदा **अल्पमायुः** स्वल्पायुः **प्रदते**-कुर्यात् । चेद निधनभवनवः अष्टमेशः लग्नाधीशयुक्तः लग्नेशेनयुतः तदा(अपि) **स्वल्पमायुः** - अल्पायुः (प्रदत्ते) । वा अष्टमेशः **रन्ध्रस्थः** - अष्टमस्थ तदा **चिरायुः** - दीर्घायुः (प्रदत्ते) तदनु **रविभवः**-शनिः (तत्राष्ट मस्थश्चेत्तदा) **तद्वत्** - चिरायुः स्यात् । वा **जनुषि जन्मकाले लयेशः**- अष्टमेशः चेद् **कोशस्थानस्थितः**- द्वितीयस्थः तदा **हि** - निश्चयेन **मनुजः** - नरः **वैरियुक्तः** - शत्रुयुतः **तस्करः** - चौरः च स्यात् ।

**भावार्थः-** अष्टमेशः पापग्रहयुक्तः षष्ठद्वादशस्थानगतः तदा अल्पायुः कुर्यात् चेद् अष्टमेशः लग्नेशयुक्तः तदा अपि स्वल्पायुः प्रदत्ते । वा अष्टमेशः अष्टमस्थः तदा दीर्घायुः तदनु शनैश्चरस्य तत्राष्टमस्थानगते सति अपि चिरायुर्भवति । वा जन्मकाले अष्टमेशः चेत् द्वितीयस्थः तदा निश्चयेन मनुजः शत्रुयुक्तः चौरः च स्यादिति।

**आयुर्देहाधिनाथौ निधनरिपुगतौ हीनवीर्यौ प्रसूतौ**
**सङ्ग्रामे कीर्तिशेषं व्रजति बलयुतौ तौ सदा तज्जयाप्तिम् ।**
**शुक्रेणान्दोलिकायास्तनुपविधुयुतो वाहनस्थाननाथो**
**मूर्तौ दंतावलेन्द्रैरथ गुरुसहितः स्थाज्जयो वाजिवाहैः ॥ १४ ॥**

**अन्वयः-** प्रसूतौ आयुर्देहाधिनाथौ हीनवीर्यौ निधनरिपुगतौ तदा संग्रामे कीर्तिशेषं व्रजति । तौ बलयुतौ तदा तज्जयाप्तिं व्रजति । अथ वाहनस्थाननाथः सुखेशः शुक्रेण युतः तदा आन्दोलिकायाः जयः स्यात् । एव सुखेशः तनुपविधुयुतो मूर्तौ स्थितस्तदा दन्तावलैन्द्रैः जयः स्यात्, अथ यदि (सुखेशः) गुरुसहितः (लग्ने तदा) वाजिवाहैः जयः स्यात् ।

**व्याख्या-** **प्रसूतौ**-जन्मकाले **आयुर्देहाधिनाथौ** - अष्टमेशलग्नेशौ **हीनवीयौ** - निर्बलौ **निधनरियुगतौ** - अष्टमषष्ठस्थौ तदा **सङ्ग्रामे**-सङ्ग्रामस्थले **कीर्तिशेषं** - मृत्युं व्रजतिः गच्छति (अर्थात् युद्धं विहाय मृत्युमाप्नोति) । **तौ**-अष्टमेश लग्नेशौ **बलयुतौ** - सबलौ तदा **तज्जयाप्ति** - तस्य **व्रजति** - (विजयीभवति) अथ **वाहन**-स्थाननाथः सुखेशः शुक्रयुतस्तदा **आन्दोलिकायाः**-शिबिकायाः जयः स्यात् अर्थात् शिबिकास्थितो विजयी भवति । एवं **सुखेशः** - चतुर्थेशः **तनुपविधुयुतः** लग्नेशचन्द्राभ्यांयुक्तः **मूर्तौ** - लग्ने स्थितस्तदा **दन्तावलेन्द्रैः** - श्रेष्ठगजैः जयः स्यात् अथ यदि **सुखेशः** - गुरुसहितः लग्नेभवेत्तदा **वाजिवाहैः** - तुरगैः जयः स्यादिति।

**भावार्थः-** जन्मकाले अष्टमेशलग्नेशौ निर्बलौ अष्टषष्ठस्थौ तदा नरेः सङ्ग्रामे कीर्तिशेषं (मृत्युं) व्रजति। अष्टमेशलग्नेशौ बलयुक्तौ तदा तस्य जयो भवति । अथ सुखेश शुक्रयुक्तस्तदा शिबिकास्थितो विजयो भवति । एवं चतुर्थेशः लग्नेशचन्द्राभ्यां लग्ने स्थितस्तदा श्रेष्ठगजैः विजयी भवति । अथ यदि चतुर्थेशः गुरुसहितः लग्ने - भवेत्तदा तुरगैः (अश्वैः) जयः स्यात् ।

## स्वाध्यायः

**१. अधस्तनेषु प्रश्नेषु योग्यमुत्तरं चित्वा लिखत ।**

(१) नवमनिजक्षेत्रकेन्द्रेषु पञ्चमेशः तदा जातको भवति ?
(क) विद्यावान् (ख) कलत्रवान् (ग) धनवान् (घ) बन्धुवान्

(२) विद्यास्थानाधिपो बुधगुरुसहितः ............ तदा नरः विद्याहीनो भवति ?
(क) केन्द्रे (ख) त्रिकोणे (ग) त्रिके (घ) त्रिषडाये

(३) व्ययरिपुविलयस्थानगः गुरुः कं वाग्विहीनं करोति ?
(क) बन्धुम् (ख) सहजम् (ग) पुत्रम् (घ) जातकम्

(४) देवेन्द्रपूज्यात् क्रूरः गुरुरपि सुतगः चेत्तदा जाताको भवति ?
(क) धनहीनः (ख) अपत्यहीनः (ग) बन्धुहीनः (घ) कलत्रहीनः

(५) छायापुत्रः स्वगेहात् कस्मिन्स्थाने स्यात्तदा एकसूनुभर्वति ?
(क) तृतीयभावे (ख) चतुर्थभावे (ग) पञ्चमभावे (घ) षष्ठभावे

(६) लग्नात् पञ्चमस्थाने मन्दः शनिर्वा स्थितो तदा कति पुत्राः भवन्ति ?
(क) त्रयः (ख) चत्वारः (ग) पञ्च (घ) षट्

(७) वासवेज्यः कस्य ग्रहस्य नामभिधानमस्ति ?
(क) बुधस्य (ख) गुरोः (ग) शुक्रस्य (घ) राहोः

(८) खगुणमितसमातुल्यशब्दस्यार्थेऽस्ति ?
(क) त्रिशंद्वर्षमपर्यन्तम् (ख) चत्वारिंशद्वर्षम् (ग) पञ्चाशद्वर्षम् (घ) पञ्चविंशवर्षम्

(९) पापयुक्तषष्ठेशे तनुनिधनगते सति किं भवति ?
(क) शरीरे हानिः (ख) शरीरे लाभः (ग) शरीरे गदः (घ) शरीरे व्रणाः

(१०) कण्ठे रोगं कः ग्रहः करोति ?
(क) सूर्यः (ख) चन्द्रः (ग) भौमः (घ) गुरुः

२. **एकैक-वाक्येनोत्तराणि लिखन्तु ।**

(१) मन्दबुद्धियुक्तः जनः कदा भवति ?

(२) ज्योतिर्विद्धिः जातकस्य कदा मूकत्वं वक्तव्यम् ?

(३) जातकः कदा अपत्यहीनो भवति ?

(४) सूतानां त्रितयं कस्मिन्योगे कथनीयम् ?

(५) जातकः कदा नेत्ररोगी भवति ?

(६) अरिजनवशतः गूढरूपः गदः कदा भवति ?

(७) जातकस्य एकैव परिणयनविधिर्भवति ?

३. **श्लोकपूर्तिं कृत्वा भावार्थो लेख्यः ।**

(१) वाक्स्थानेशो गुरुर्वा ............................. ।

(२) लग्नस्थे सप्तसप्तौ ................................ ।

(३) आयुर्देहाधिनाथौ .................................... ।

४. **अ-विभागस्य ब-विभागेन सह संयोजनं कुरुत ।**

| **अ** | **ब** |
|---|---|
| (१) वागीशः | (१) शनिः |
| (२) चन्द्रजः | (२) मङ्गलः |
| (३) सूर्यसूनुः | (३) राहुः |
| (४) भूमिजः | (४) गुरुः |
| (५) सैंहिकेयः | (५) रविः |
| | (६) बुधः |

५. **टिप्पणी लेख्या ।**

(१) सन्तानयोगः

(२) शारिरीकयोगाः

(३) आयुर्दाययोगः

६. **विस्तरेणोत्तराणि लिखत ।**

(१) पञ्चमभावस्थ विद्यायोगानां वर्णनं कुरुत ।

(२) सन्तानविलम्बयोगस्य ग्रन्थानुसारं वर्णनं कुरुत ।

(३) जातकस्य विवाहयोगानां वर्णन कुरुत ।

(४) गर्भाभावयोगः कदा भवति इति सविस्तरं वर्णयत ।

(५) दीर्घायुर्योगस्य ग्रन्थोक्तदिशा वर्णनं विधेयम् ।

**अध्यापकानां प्रवृत्ति :**

- होराशास्त्रस्यान्यग्रन्थेषु प्रदत्त सन्तानयोगानां सोदाहरणज्ञानं प्रदातव्यम् ।

**छात्राणां प्रवृत्ति :**

- रोगकारकग्रहाणां शरीरस्थितविविधाङ्गानि चित्रमाध्येमेन प्रदर्शयत ।

| ५ | भावाध्यायः ३<br>( नवमभावतः द्वादशभावान्तं यावत् ) |
|---|---|

## प्रास्ताविकम्

जातकतत्त्वविद्भिः भावाध्यायस्य स्वमत्यानुसारं नैकविधं फलकथनं कृतमस्ति । किन्त्वत्र तु जातकालङ्काराऽधारित–नवमभावतः द्वादशभावान्तं यावत् पटुधियां होराफलज्ञप्तये शुभाशुभाख्यफलं वर्णितमस्ति । प्रकरणेऽस्मिन् भाग्यफलं, कर्मफलं, लाभभावफलं, व्ययभावफलं च प्रति गच्छामः ।

### भाग्यभावफलम्

**भाग्येशो मूर्तिवर्ती सुरपतिगुरुणालोकितो भूपवन्द्यो**
**लग्नस्थो वाहनेशो नवमपतिरुभौ पश्यतश्चेत् स्वगेहम् ।**
**सर्वासामास्पदं स्यान्मनुज इह तदा सम्पदां वाहनेन्द्रो**
**रन्ध्रस्थानस्थितश्चेद् व्रजति हि मनुजो भाग्यराहित्यमेवम् ॥ १ ॥**

**अन्वयः**:- सुरपतिगुरुणा आलोकितः भाग्येशः मूर्तिवर्ती (तदा नरः) भूपवन्द्यः (स्यात्) । वाहनेशः नवमपतिः च उभौ लग्नस्थौ चेत् स्वगेहं पश्यतः (तदा) मनुजः सर्वासां (सम्पदां) आस्पदं स्यात् । चेद् वाहनेन्द्रः रन्ध्रस्थानस्थितः तदा हि मनुजः भाग्यराहित्यं व्रजति ।

**व्याख्या**- **सुरपतिगुरुणा**–बृहस्पतिना **आलोकितः** – दृष्टः **भाग्येशः** – नवमेशः **मूर्ति** – वर्ती लग्नगतः (तदा नरः) **भूपवन्द्यः** – नृपपूज्यः स्यात् । **वाहनेशः** – सुखेशः **नवमपतिश्च**–नवमेशश्च **उभौ**–द्वौ **लग्नस्थौ** – लग्नस्थानगतौ चेत् **स्वगेहं** – निजगृहं **पश्यतः** – आलोकितः तदा इह (मनुजः) **सर्वासां सम्पदां**–सर्वविधैश्वर्याणां **आस्पदं** – आश्रयः स्यात् । चेद् **वाहनेन्द्रः** – सुखेशः **रन्ध्रस्थानस्थितः** – अष्टमस्थः तदा **हि**–निश्चयेन **मनुजः भाग्यराहित्यं** – भाग्यहीनत्वं **व्रजति** – प्राप्नोति ।

**भावार्थः**:- गुरुदृष्टः नवमेशः लग्नस्थः चेत्तदा नरः नृपवन्द्यो भवति। वाहनेशः नवमेशश्च द्वावेष लग्नस्थानगतौ चेत् निजगृहं पश्यतः तदा इह (अस्मिन्योगे) मनुजः सर्वविधैश्वर्याणामाश्रयो भवति । चेद् सुखेशः अष्टमस्थः तदा हि मनुजः भागहीनत्वं प्राप्नोति ।

**भाग्यहीन योगः**




**सर्वविधणेश्वर्य योगः**



**नृपवन्द्ययोगः**




**हीनानां वाहनानां तदनु चपलता प्राप्तिरेवं नराणां**
**ज्ञेया होरागमज्ञैरथ नवमवतौ लाभगे राजवन्द्यः ॥**
**दीर्घायुर्धर्मशीलस्तदनु धनवपुर्वाहनेशः स्वगेहे**
**धर्मेशो लग्नवर्ती जनुषि यदि गजस्वामिसिंहासनानाम् ॥ २ ॥**

**अन्वयः-** (अष्टमस्थे वाहनेशे) सति हीनानां वाहनानां प्राप्तिः तदनु नराणां चपलता स्यात् । एवं होरागमज्ञैः अथ नवमवतौ लाभगे (सति नरः) - राजवन्द्यः दीर्घायुः धर्मशीलश्च स्यात् । तदनु यदि जनुषि धनवपुवाहेनेशाः स्वगेहे धर्मेशः लग्नवर्ती स्यात् तदा गजस्वामिसिंहासनानां प्राप्तिः स्यात् ।

**व्याख्या-** (अष्टमस्थे सुखेशे सति) **हीनानां वाहनानां** - निर्बलवाहनानां **प्राप्तिः**-लब्धिः **तदनु नराणां** - मनुष्याणां **चपलता** - चञ्चलता स्यात् । एवं **होरागमज्ञैः**- दैवज्ञैः ज्ञेयाः । अथ **नवमपतौ** - नवमेशेलाभगे - एकादशस्थे सति नरः **राजवन्द्यः** - नृपमान्यः **दीर्घायुः**- चिरायुः धर्मशीलश्च स्यात् । **तदनु**-तदनन्तरं यदि **जनुषि** - जन्मकाले **धनवपुर्वाहनेशाः** - द्वितीयलग्नचतुर्थेशाः स्वगेहे **धर्मेशः** नवमेशः **लग्नवर्ती** - लग्नगतः स्यात्तदा **गजस्वामिसिंहासनानां** - हस्तिराजसिंहासनानां **प्राप्तिः**- लब्धिः स्यात् ।

**भावार्थः-** (अग्रिमश्लोकेन सम्बन्धः - अष्टमस्थे सुखेशे सति) हीनानां वाहनानां - निर्बल-वाहनानां प्राप्तिः - लब्धिः भवति । तदनु मनुष्याणां चञ्चलता अपि स्यात् । इत्थं ज्योतिर्विद्भिः ज्ञेयम् । अथ नवमेशे एकादशस्थान-गते सति नरः नृपमान्यः दीर्घायुः धर्मशीलश्च भवति । तदनन्तरं यदि जातकस्य जन्मकाले द्वितीयलग्न-चतुर्थेशाः निजगृहे, लग्ने च धर्मेशः तदा जातकः गज-स्वामि-सिंहासनानां च प्राप्तिं करोति ।

## राजयोग

**योगानां स्यादमीषां प्रचुरबलयुतो योऽधिपस्तद्दशायां**
**लब्धिश्चान्तर्दशायामथ गुरुभृगुजौ वाहनाधीशयुक्तौ ।**
**केन्द्रे याने त्रिकोणे त्वथ गुरुकवियुग्वाहनस्थानगो वा**
**भाग्याधीशः स्वराशौ भवति नरपतिर्वाहन- व्यूहनाथः ॥ ३ ॥**

**अन्वयः-** अमीषां योगानां प्रचुरबलयुतः यः अधिपः तद्-दशायामअन्तर्दशायां च (सुख-सम्पत्तेः) लब्धिः स्यात् । अर्थात् योगफलस्य-लाभवान् भवति । अथ वाहनाधीशयुक्तौ गुरुभृगुजौ केन्द्रे अयाने त्रिकोणे (भवेतां) वा स्वराशौभवेत्तदा वाहनव्यूहनाथः नरपतिः च स्यात्।

**व्याख्या-** **अमीषां योगानां** (पूर्वश्लोके प्रदत्तयोगानां) **प्रचुरबलयुतः** - अधिकबली **यः अधिपः** - स्वामी **तद्-दशायां** - ग्रहदशायाम् **अन्तदर्शायां** - ग्रहान्तर्दशायां च (सुखसम्पत्तेः) **लब्धिः** - प्राप्तिः स्यात् । अथ **वाहनाधीशयुक्तौ**- चतुर्थेशयुक्तौ **गुरुभृगुजौ** - बृहस्पतिशुक्रौ **केन्द्रे** - केन्द्रस्थाने **अयाने** - एकादशे **त्रिकोणे**

– त्रिकोणस्थाने (भवेतां) वा **स्वराशौ** – निजराशौ **भवति** – भवेत् तदा **वाहनव्यूहनाथः** – यानसमूहानामधिपतिः **नरपतिः** – नृपश्च **स्यात्** – भवति ।

**भावार्थः-** अग्रिम(पूर्व)श्लोके प्रदत्तानाम् अमीषा योगानां (मध्ये) अधिकबलशाली यः अधिपतिः (योगाधीशः) तद् दशान्तर्दशायां सुखसम्पत्तेः प्राप्तिर्भवति अर्थात् योगफलस्य लाभो भवति । अथ चतुर्थेशयुक्तौ गुरुशुक्रौ केन्द्रे एकादशे वा त्रिकोणे भवेतां वा स्वराशौ भवेतां तदा जातकः वाहनसमूहानामधिपतिः नरपतिश्च भवति ।

## कर्मभावफलम्

**कर्मस्थे क्षेत्रचिन्ता त्रिकभवनगते सौख्यचिन्ता महीजे**
**वागीशे यानभूषावसनहयभवा चामरच्छत्रचिन्ता ।**
**प्रालेयांशौ सिते स्यादथ मदनगते वाक्यतौ पुत्रचिन्ता**
**सन्तानस्थानयाते हिमकरतनये बुद्धिजाऽथ त्रिकोणे ॥ ४ ॥**

**अन्वयः-** महीजे कर्मस्थे क्षेत्रचिन्ता त्रिकभवनगते सौख्यचिन्ता स्यात् । वागीशे (त्रिकस्थे) यानभूषावसनहयभवा (चिन्ता स्यात्) प्रालेयांशौ वा सिते (त्रिकस्थे) चामरच्छत्रचिन्ता स्यात् । अथ वाक्यतौ मदनगते पुत्रचिन्ता स्यात्। हिमकरतनये – सन्तानस्थानयाते बुद्धिजा चिन्ता स्यात् । अथ त्रिकोणे (इत्यस्य अग्रिमश्लोकेन सम्बन्धः)

**व्याख्या-** **महीजे** – भौमे **कर्मस्थे** – दशमस्थे **क्षेत्रचिन्ता** – कृषि-सम्बन्धि-चिन्ता, **त्रिकभवनगते** – त्रिक (६, ८, १२) स्थानगते **सौख्यचिन्ता-विषय**-सुखचिन्ता स्यात् । **वागीशे** – गुरौ (त्रिकस्थे) **यानभूषावसनहयभवा**-वाहनालङ्कारवस्त्राश्वजनिता चिन्ता स्यात् । **प्रालेयांशौ**-चन्द्रे वा **सिते**- शुक्रे (त्रिकस्थे) सति **चामरच्छत्रचिन्ता** – रोमगुच्छक (बालव्यजन) – छायामित्र (पटोटज) चिन्ता स्यात् । **अथ**-अनन्तरं **वाक्पतौ** – गुरौ **मदनगते** – सप्तमस्थे **पुत्रचिन्ता** – सन्तानचिन्ता स्यात् । **हिमकरतनये**- बुधे **सन्तानस्थानयाते**-पञ्चमस्थानगते सति बुद्धिसम्बन्धि-चिन्ता स्यात् (भवति) । अथ **त्रिकोणे** (इत्यस्य अग्रिमश्लोकेन सम्बन्धः) ।

**भावार्थः-** भौमे कर्मस्थानगते सति कृषि-सम्बन्धिचिन्ता, गुरौ त्रिकस्थानगते सति वाहन-अलङ्कार-वस्त्र-अश्वादिनां चिन्ता, चन्द्रे वा शुक्रे त्रिके गते सति चामरच्छत्र-चिन्ता, अनन्तरं गुरौ सप्तमस्थे सति पुत्र-चिन्ता, बुधे पञ्चमस्थे सति बुद्धिजा चिन्ता भवति ।

**मार्तण्डे तातबन्ध्वोरथ सुतनवमद्यूनगे दानवेज्ये**
**यात्राचिन्ता नराणामथ नवमसूते पुत्रजा वासवेज्ये ।**
**कर्माधीशे विवीर्यो यदि जनुषि तदा सर्वकर्मास्पदं नो**
**गेरे स्वीये यदाऽसौ शुभविहगयुतो मानवो मानशीलः ॥ ५ ॥**

**अन्वयः-** अथ मार्तण्डे (त्रिकोणे) तातबन्ध्वोः चिन्ता (स्यात्) अथ दानवेज्ये सुतनवमधूनगे नराणां यात्राचिन्ता (भवति)। अथ वासवेज्ये नवम सूते (सति) पुत्रजा (चिन्ता स्यात्) यदि जनुषि कर्माधीशः विवीर्ये (स्यात्तदा) नरः सर्वकर्मास्पदं नो यदा असौ शुभविहगयुतः स्वीये गेहे भवेत्तदा मानवः मानशीलः स्यात्।

**व्याख्या-** **अथ मार्तण्डे** – सूर्ये (त्रिकोणे – अस्य पूर्वश्लोकेन सम्बन्धः) **तातबन्ध्वोः** – पितृभ्रातृचिन्ता स्यात् ।अथ **दानवेज्ये** – शुक्रे **सुतनवमद्यूनगे**-पञ्चमनवमसप्तमगे **नराणां** – मानवानां **यात्राचिन्ता** – प्रस्थानचिन्ता भवति। **अथ** – अनन्तरं **वासवेज्ये** – गुरौ **नवमसुते** – भाग्यपञ्चमस्थे सति **पुत्रजा**-सन्तानसम्बन्धि-चिन्ता स्यात्। **यदि**-यदा **जनुषि** – जन्मकाले **कर्माधीशः** – दशमेशः **विवीर्ये** – बलहीनः स्यात्तदा नरः **सर्वकर्मास्पदं** – निखिलकर्मस्थानं न, अर्थात् कार्यसाधने न क्षमो भवति । **यदा असौ दशमेशः** – कर्मेशः **शुभविहगयुतः** – शुभग्रहयुक्तः **स्वीये गृहे** – निजगृहे भवेत्तदा **मानवः मानशीलः** – मानी स्यादिति ।

**भावार्थः-** अथ सूर्ये त्रिकोणे सति तातबन्ध्वोः चिन्ता स्यात् । अथ शुक्रे पञ्चमनवमसप्तम स्थानगति नराणां यात्राचिन्ता

भवति । अथ गुरौ नवमसुते सति पुत्रजा चिन्ता यदि जन्मकाले दशमेशः बलहीनःस्यात्तदा नरः निखिलकर्मस्थानं न अर्थात् कार्यसाधने न क्षमो भवति । यदा असौ दशमेशः शुभग्रहयुक्तः निजगृहे भवेत तदा मानवः मानशीलो भवति ।

## लाभभावविचारः

**शुभग्रहे शुभदृष्टे लाभेशे लाभगे तदा ।**

**सन्मार्गेणार्थलाभः स्यादन्यथाऽशुभ-मार्गतः ॥ ६ ॥**

**अन्वयः-** लाभेशे शुभग्रहे (युते) शुभदृष्टे (वा) लाभगे तदा (जनुषि) सन्मार्गेणार्थलाभः स्यात् अन्यथा अशुभ-मार्गतः (अर्थलाभः स्यात्) ।

**व्याख्या-** **लाभेशे** - एकादशे **शुभग्रहे** - शुभग्रहस्थिते (युते) **शुभदृष्टे**-शुभग्रहावलोकिते **लाभगे**-लाभस्थाने **तदा** - तस्मिन्काले (जनुषि) **सन्मार्गेणार्थलाभः** -सन्मार्गप्रभावात् धनलाभः **स्यात्** - भवति । **अन्यथा** (पापयुते दृष्टे वा) **अशुभमार्गतः** - असन्मार्गेण (तस्करादि-कर्मणा) **अर्थ**-लाभो भवति ।

**भावार्थः-** एकादशस्थाने शुभग्रहस्य स्थितिः वा शुभग्रहस्य दृष्टिर्भवेत् तथा च लाभेशे लाभस्थाने याते तदा जन्मकाले सन्मागेणार्थलाभः स्यात् किन्तु यदि पापग्रहयुते दृष्टे वा लाभेशे सति असन्मार्गेण अर्थात् अपवित्रकर्मणा (तस्करादि कर्मणा) धनलाभो भवति ।

**लाभेशे केन्द्रकोणे वा शुभे वर्गेऽथवा निजे ।**

**तदा लाभप्रदो योगः पापाक्रान्ते तु बाधकः ॥ ७ ॥**

**अन्वयः-** लाभेशे केन्द्रेकोणे वा शुभे वर्गे (स्थिते) अथवा निजे (सति) तदा लाभप्रदः योगः (स्यात्) (लाभेशे) पापाक्रान्ते तु बाधकः (भवति) ।

**व्याख्या-** **लाभेशे** - एकादशेशे **केन्द्रे**-केन्द्र (१, ४, ७, १०) स्थाने **कोणे**-त्रिकोण (५, ९) स्थाने **वा शुभे वर्गे**-शुभग्रहाणां षड्वर्गे (स्थिते) **अथवा निजे**-स्वगृहे गते (सति) **तदा लाभप्रदः योगः** - कर्मसाफल्ययोगः (स्यात्) (लाभेशे) **पापाक्रान्ते** - पापग्रहयुते (षड्वर्गे) **तु बाधकः** - लाभप्राप्तौ हानिकारकयोगो भवति।

**भावार्थः-** लाभेशे केन्द्रस्थाने वा त्रिकोणस्थाने वा शुभग्रहाणां षड्वर्गे वा निजे- स्वस्थ षड्वर्गे (गृहे वा) गते सति तदा लाभप्रदयोगो भवति । किन्तु लाभेशे पापाक्रान्ते षड्वर्गे तु लाभप्राप्तौ बाधकयोगो भवति ।

## द्वादशभावस्य फलम्

**लग्नस्थे रिष्फनाथे भवति सुवचनो मानवो रूपवान् वा**

**स्वर्क्षे कार्पण्यबुद्धि-र्बहुतरपशुमान् ग्रामयुक्तः सदा स्यात् ।**

**धर्मे तीर्थावलोकी बहुलवृषमतिः क्रूरयुक्ते स पापी**

**मिथ्या कोशान्तकृत् स्यान्नियतमिदमिति ज्ञेयमेवं सुधिभिः ॥ ८ ॥**

**अन्वयः-** रिष्फनाथे लग्नस्थे (सति) मानवः सुवचनः रूपवान् च (स्यात्) । (द्वादशेशे) स्वर्क्षे (सति) कार्पण्यबुद्धिः बहुतरपशुमान् सदा ग्रामयुक्तः च स्यात् । (तथा व्ययेशे) धर्मे (सति) तीर्थावलोकी बहुलवृषमतिः (च स्यात्) । (अथ) क्रूरयुक्ते (सति) सः पापी, मिथ्याकोशान्तकृत् (च स्यात्) एवं सुधिभिः नियतमिदं (फलं) ज्ञेयम् ।

**व्याख्या-** **रिष्फनाथे**-द्वादशेशे **लग्नस्थे** - प्रथमभावगते (सति) **मानवः** - नरः **सुवचनः** - मधुरवाक् **रूपवान्** - सुन्दराकृतिवान् च (स्यात्) । (द्वादशेशे) **स्वर्क्षे** - निजगृहे (सति) मानवः **कार्पण्यबुद्धिः** - दीनतायुक्तमतिः **बहुतरपशुमान्** - अधिकपशुयुक्तः **सदा**-सर्वदा **ग्रामयुक्तः** - ग्रामाधिकारयुक्तश्च (स्यात्)

। (तथा व्ययेशे) **धर्मे** – नवमस्थानगते (सति) **तीर्थावलोकी** – तीर्थस्थान-भ्रमणशील: **बहुलवृषमति:** – अतिधर्म – बुद्धियुक्तश्च (स्यात्) । **अथ क्रूरयुक्ते** – पापग्रहयुक्ते सति **स:** – जातक: **पापी**–पापकर्मा **मिथ्याकोशान्तकृत्** – मृषा रक्षितधननाशकर: च स्यात् । **एवं** – अनेन **प्रकारेण सुधिभि:** – विद्वज्जनै: (ज्योतिर्विदै:) नियतमिदं – निश्चितमित्थं (फलं) **ज्ञेयं**– कथनीयम् ।

**भावार्थ:–** द्वादशेशे लग्नस्थे सति मानव: मधुरभाषी स्वरूपवान् च भवति । व्ययेशे निजगृहे सति मानव: कार्पण्यबुद्धियुक्त: बहुपशुयुक्तश्च स्यात् । तथा च सदा ग्रामाधिकारयुक्तश्च भवति । तथैव व्ययेशे नवमस्थान – गते सति नर: तीर्थाटनप्रिय: (धर्मस्थानावलोकी) अतिधर्मबुद्धियुक्तश्च स्यात् । अथ पापग्रहयुक्ते (व्ययेशे) सति स: जातक: पापकर्मा मिथ्या रक्षितधननाशकर: च स्यात् । इत्थं दैवज्ञै: नियतमिदं फलं ज्ञेयम् इति ।

## स्वाध्याय:

**१. अधस्तनेषु प्रश्नेषु योग्यमुत्तरं चित्वा लिखत ।**

(१) गुरुदृष्टभाग्येशो लग्ने भवति तदा नर: कीदृशो भवति ?

(क) गुरुतुल्य: (ख) राजतुल्य: (ग) देववन्द्य: (घ) भूपवन्द्य:

(२) वाहनेशे कस्मिन्स्थाने सति हीनानां वाहनानां प्राप्तिर्भवति ?

(क) सप्तमस्थाने (ख) अष्टमस्थाने (ग) नवमस्थाने (घ) चतुर्थस्थाने

(३) सुखेश: कस्मिन् स्थाने स्यात् तदा मनुज: भाग्यहीनत्वं प्राप्नोति।

(क) लग्नस्थ: (ख) केन्द्रस्थ: (ग) अष्टमस्थ: (घ) त्रिकोणस्थ:

(४) भाग्याधीशस्य कुत्र स्थिति: जातकं नरपतिवाहनव्यूहनाथं करोति ?

(क) निजराशौ (ख) स्वोच्चराशौ (ग) मित्रगृहे (घ) शत्रुगृहे

(५) कर्मस्थे महीजे सति किं भवति ?

(क) सौख्यचिन्ता (ख) रोगचिन्ता (ग) शरीरचिन्ता (घ) क्षेत्रचिन्ता

(६) वाक्पतौ कस्मिन्स्थाने गते सति पुत्रचिन्ता भवति ?

(क) पराक्रमे गते (ख) पञ्चमे गते (ग) मदनगते (घ) कर्मस्थानगते

(७) दानवेज्ये सूतनवमद्यूनगे गते सति का चिन्ता भवति ?

(क) सौख्यचिन्ता (ख) पुत्रचिन्ता (ग) पुत्रजाचिन्ता (घ) यात्राचिन्ता

(८) सूर्ये कस्मिन्स्थाने स्थिते सति तातबन्ध्वो: चिन्ता स्यात् ?

(क) केन्द्रे (ख) त्रिके (ग) त्रिकोणे (घ) त्रिषडाये

(९) दशमेश: शुभग्रहयुक्त: वा निजगृहे भवेत्तदा मानुषो किदृशो भवति ?

(क) दानशील: (ख) मानशील: (ग) लाभशील: (घ) चारित्र्यशील:

(१०) व्ययेशे नवमस्थानगते सति जातको किदृशो भवति ?

(क) धनप्रिय: (ख) विद्याप्रिय: (ग) ग्रामाटनप्रिय: (घ) तीर्थाटनप्रिय:

**२. एकैक-वाक्येनोत्तराणि लिखन्तु ।**

(१) मनुज: कदा भाग्यराहित्यं व्रजति?

(२) होरागमज्ञै: नवमपतौ लाभगे सति किं फलं गदितम् ?

(३) जातकः कस्मिन्योगे राजस्वामिसिंहासनानामधिपतिर्भवति ?

(४) सुखसम्पत्तेः लब्धिः कदा भविष्यति ?

(५) जनुषि कर्माधीशः विवीर्ये स्यात्तदा किं फलमुक्तम् ?

(६) जातकः कदा सन्मार्गेणार्थलाभकर्ता भवेत् ?

(७) रिष्फनाथे लग्नस्थे गते सति जातकः कीदृशो भवति ?

**३. श्लोकपूर्तिं कृत्वा भावार्थो लेख्यः ।**

(१) भाग्येशो मूर्तिवर्ती ................. ।

(२) हीनानां वाहनानां ....................... ।

(३) मार्तण्डे तातबन्ध्वोरथ ...................... ।

**४. अ-विभागेन सह ब-विभागस्य संयोजन कुरुत ।**

| अ | ब |
|---|---|
| (१) रन्ध्रस्थानम् | (१) प्रथमम् |
| (२) मूर्तिस्थानम् | (२) पञ्चमम् |
| (३) भाग्यस्थानम् | (३) द्वादशम् |
| (४) कर्मस्थानम् | (४) अष्टमम् |
| (५) व्ययस्थानम् | (५) नवमम् |
| | (६) दशमम् |

**५. टिप्पणी लेख्या ।**

(१) भाग्यभावफलम्

(२) कर्मभावफलम्

(३) एकादशभावफलम्

**६. विस्तरेणोत्तराणि लिखत ।**

(१) ग्रन्थानुसारं योगानां स्यादमीषां .............. श्लोकार्थो लेखाः ।

(२) लाभप्रदयोगस्य बाधकयोगस्य च वर्णनं कुरुत ।

(३) द्वादशभावस्य फलं ग्रन्थोक्तदिशा लिखत ।

(४) भाग्यवृद्धिकारकयोगानां वर्णनं कुरुत ।

(५) कर्मभावस्याशुभयोगाः लिखत ।

**अध्यापकानां प्रवृत्तिः**

- राज्ञां नेतॄणां च जन्माङ्गचक्राणि प्रदर्शयत ।

**छात्राणां प्रवृत्तिः**

- विविधग्रन्थानुसारेण कर्मभावस्यान्य-(वाक्कीलादि) योगानां ज्ञानं सम्यक्तया गृहीतव्यम् ।

●

# ६ तन्वादिद्वादशभावस्थ-सूर्यचन्द्रयोः फलानि

## प्रास्ताविकम्

अन्तरिक्षे स्थितानां सूर्य-चन्द्र-शुक्रादीनां ग्रहाणां प्रभावः पृथिव्याः पदार्थेषु भवति । अवकाशस्थितानां ग्रहाणां स्थिरता, गतिः, एवञ्च दिशा इत्येतासां प्रभावः पृथिव्यां स्थितभौतिकपरिवर्तने कारणभूतोऽस्ति ।

रात्रिन्दिवं, ऋतुपरिवर्तनं, समुद्रे जलाधिक्य न्यूनत्वेवार्धक्ये च इत्यादिकं आकाशे स्थित-ग्रहाणां स्थितिं गतिं च आलम्बते । यदि पृथिव्यां स्थितभौतिकपरिबलेषु सम्भूतः प्रभावः दृश्यते चेत् मानुष्यस्य मनस्शरीरयोः ग्रहाणां स्थितेः प्रभावोऽपि भवितुमर्हति । इति प्राचीनाः ऋषयः आमनन्ति स्म । तस्मिन् काले तत्कालिनसाधनैः गहनचिन्तनेनावलोकनेन च ज्योतिषशास्त्रस्यास्य रचना अजायत । तद्वदेव ज्योतिषशास्त्रे सूर्यचन्द्रयोः फलवर्णनं प्रति गच्छामः ।

## 1. तन्वादि द्वादशभावस्थसूर्यफलानि

**तनुस्थो रविस्तुङ्गयष्टिं विधत्ते मनः संतपेद्दारदायादिवर्गात्**

**वपुः पीड्यते वातपित्तेन नित्यं स वै पर्यटन् ह्रासवृद्धिं प्रयाति ॥ १ ॥**

**अन्वयः-** तनुस्थः रविः तुङ्गयष्टिं विधत्ते, दारदायादवर्गात् मनः संतपेत् । नित्यं वपुः वातपित्तेन पीड्यते, सः वै पर्यटन् ह्रास वृद्धिं प्रयाति ।

**व्याख्या-** **तनुस्थः** - लग्नस्थः **रविः** - सूर्यः **तुङ्गयष्टिं** - उच्चरूपं **विधते** - विदधाति **दारदायादवर्गात्** - स्त्री-पुत्रादि समुहात् **मनः** - चेतः **संतपेत्** - संतापं प्राप्नुयात् **नित्यं** - सदैव **वपुः** शरीरम् **वातपित्तेन** - वायुयुक्तपित्तेन **पीड्यते** - पीडां ददाति **सः** - पुरुषः **पर्यटन्** - देशान्तरं भ्रमन् **ह्रासवृद्धिं** - न्यूनाधिकत्वम् **प्रयाति** - प्राप्नोति ।

**भावार्थः-** यस्य मनुष्यस्य लग्नस्थाने सूर्यः भवेत् सः नरः उच्चरूपं विदधाति । स्त्रीपुत्रादिवर्गात् तस्य मनः संतापं प्राप्नोति । सदैव तस्य शरीरं वातपित्तादि-रोगैः सन्तप्तं भवति । यतो हि सः देशान्तरेषु भ्रमति, किन्तु धनलाभे न्यूनाधिकत्वं भवति ।

**धने यस्य भानुः स भाग्याधिकः स्याच्चतुष्पात्सुखं सद्व्यये स्वं च याति ।**

**कुटुम्बे कलिर्जायया जायतेऽपि क्रिया निष्फ़ला याति लाभस्य हेतोः ॥ २ ॥**

**अन्वयः-** यस्य धने भानुः स्यात्, सः भाग्याधिकः स्यात्, चतुष्पात् सुखं स्यात्, स्वं च सद् व्यये याति, जायया कुटुम्बे अपि कलिः जायते । लाभस्य हेतोः क्रिया निष्फला याति ।

**व्याख्या-** **यस्य** - नरस्य **धने** - द्वितीयस्थाने **भानुः** - सूर्यः **स्यात्** - भवेत् **सः** - पुरुषः **भाग्याधिकः** - अतिभाग्यवान् **चतुष्पात्** - गजाश्वादी **सुखं** - सौख्यं **स्वं** - द्रव्यं **सद् व्यये** - धर्मादिविषये **याति** - एति **जायया** - भार्यया **कुटुम्बे** - स्वबन्धुविषये **अपि** - च **कलिः** - कलहः **जायते** - भवति **लाभस्य हेतोः** - लाभार्थं **क्रिया** - चेष्टा **निष्फला** - निरर्थका **याति** - प्राप्नोति ।

**भावार्थः-** यस्य नरस्य द्वितीयस्थाने सूर्यः भवेत् सः नरः श्रेष्ठभाग्यवान् भवति । सः गजाश्वादि सौख्यं प्राप्नोति। तस्य द्रव्यस्य धर्मादिकार्ये व्ययो भवति । भार्यया (निमित्तभूतया) स्वबन्धुविषये कलहो भवति । तथा प्रागलभ्या क्रिया अपि निष्फलतां प्राप्नोति । अर्थात् यत्नात् कृतोऽपि उद्यमः स्वाहंकारेण निष्फलः भवति।

**तृतीये यदाऽहर्मणिर्जन्मकाले प्रतापाधिकं विक्रमं चातनोति ।**

**तदा सोदरैस्तप्यते तीर्थचारी सदाऽरिक्षयः संगरे शं नारेशात् ॥ ३ ॥**

**अन्वयः-** जन्मकाले यदा अहर्मणिः तृतीये (भवेत्) तदा (तस्य) प्रतापाधिकं विक्रमं च आतनोति । सोदरैः तप्यते, तीर्थचारी (जायते) संगरे सदा अरिक्षयः, नरेशात् (तस्य) शं स्यात् ।

**व्याख्या-** **जन्मकाले** - जन्मसमये **अहर्मणिः** - सूर्यः **तृतीये** - तृतीयस्थाने **तदा** - चेत् **प्रतापाधिकं** - पराक्रमाधिकं **विक्रमं च** - प्रतापं **आतनोति** - प्राप्नोति **सोदरैः** - भ्रातृभिः **तप्यते** - संतापं (प्राप्नोति) **तीर्थचारी** - तीर्थगमनशीलः **संगरे** - युद्धे **सदा** - सदैव **अरिक्षयः** - रिपुनाशः **नरेशात्** - भूभृतः **शं** - कल्याणं **स्यात्** - प्राप्नोति ।

**भावार्थः-** यस्य मनुष्यस्य जन्मकाले तृतीयस्थाने सूर्यः स्यात् । सः नरः महापराक्रमी (महायोध्द्धा) भवति । भ्रातृभिः कष्टमाप्नोति । तीर्थ-गमनशीलो भवति । युद्धे सदैव तस्य रिपूणां नाशो भवति तथा नृपात् सः सुखं प्राप्नोति ।

**तुरीये दिनेशेऽतिशोभाधिकारी जनः संलभेद्विग्रहं बन्धुतोऽपि ।**

**प्रवासी विपक्षाहवे मानभङ्गं कदाचिन्न शान्तं भवेत्तस्य चेतः ॥ ४ ॥**

**अन्वयः-** दिनेशे तुरीये जनः अतिशोभाधिकारी (स्यात्) बन्धुतोऽपि विग्रहं संलभेत् । प्रवासी (स्यात्) विपक्षाहवे मानभङ्गं (प्राप्नुयात्) तस्य चेतः कदाचित् शान्तं न भवेत् ।

**व्याख्या-** **दिनेशे** - सूर्ये **तुरीये** - चतुर्थस्थाने **जनः** - नरः **अतिशोभाधिकारी** - कान्तियुक्तः **बन्धुतोऽपि** - भ्रातृवर्गादपि **विग्रहं** - कलहं **संलभेत्** - आप्नोति **प्रवासी** - विदेशगमनशीलः **विपक्षाहवे** - शत्रुसंग्रामे **मानभङ्गं** - अपमानं (प्राप्नुयात्) **तस्य** - नरस्य **चेतः** - मनः **कदाचित्** - कदाचन **शान्तं** - शमितं **न भवेत्** - न स्यात् ।

**भावार्थः-** यस्य जातकस्य चतुर्थस्थाने सूर्यः स्यात् । सः नरः अत्यन्त कान्तियुक्तो भवति । बन्धुवर्गात् कलहमाप्नोति। सः विदेशगमनशीलो भवति । युद्धे शत्रुवर्गात् अपमानितो भवति । तथा तस्य मनः सदैव व्याकुलं भवति।

**सुतस्थानगे पूर्वजापत्यतापी कुशाग्रा मतिर्भास्करे मन्त्रविद्या ।**

**रतिर्वन्चने संचकोऽपि प्रमादी मृतिः क्रोडरोगादिजा भावनीया ॥ ५ ॥**

**अन्वयः-** भास्करे सुतस्थानगे (नरः) पूर्वजापत्यतापी (स्यात्) मतिः कुशाग्रा, मन्त्रिविद्या (स्यात्) (तस्य) रतिः वञ्चने, संचकः (स्यात्) प्रमादी (स्यात्) (तस्य) मृतिः क्रोडरोगादिजा भावनीया ।

**व्याख्या-** **भास्करे** - सूर्ये **सुतस्थानगे** - पञ्चमस्थाने **पूर्वजापत्यतापी** - प्रथमपुत्रात् कष्टं प्रप्नोति **मतिः कुशाग्रा** - बुद्धिःअत्युत्तमा **मन्त्रविद्या** - श्रुतिशास्त्र ज्ञः **रतिः** - प्रीतिः **वञ्चने** - पुरुषप्रतारणे **संचकः** द्रव्यसंचयकर्ता **प्रमादी** - असावधानः (आलस्यात्) **मृतिः** - मृत्युः **क्रोडरोगादिजा** - कुक्षिरोगादिजा **भावनीया**- चिन्तनीया।

**भावार्थः-** यस्य जातकस्य पञ्चमस्थाने सूर्यः स्यात् । सः नरः प्रथमपुत्रात् कष्टं प्राप्नोति । तस्य मतिः कुशाग्रा भवति। सः नीतिशास्त्रज्ञो भवति । वञ्चने सः अत्यानन्दं लभते । सः द्रव्यस्य संग्रहं करोति । तथा प्रमादी सन् जीवति । तस्य मृत्युः कुक्षिरोगात् भवति । अर्थात् कुक्षिरोगः अस्य मृत्योः कारणं भवति ।

**रिपुध्वंसकृद्भास्करो यस्य षष्ठे तनोति व्ययं राजतो मित्रतो वा ।**

**कुले मातुरापच्चतुष्पादतो वा प्रयाणे निषादैर्विषादं करोति ॥ ६ ॥**

**अन्वयः-** भास्करः यस्य षष्ठे (स्यात्) रिपुध्वन्सकृत्, राजतः मित्रतो वा व्ययं तनोति । मातुः कुले आपत् (स्यात्) वा चतुष्पादतः आपत् (स्यात्) प्रयाणे निषादैः विषादं करोति ।

**व्याख्या-** **भास्करः** - सूर्यः **यस्य** - नरस्य **षष्ठे** - रिपुभवने **रिपुध्वन्स्कृत्** - शत्रुघाति **राजतः** - नृपात् **मित्रतः** - सखातः **व्ययं** - द्रव्यनाशं **तनोति** - विस्तारयति **मातुः कुले** - मातृवंशे **आपत्** - विपत्तिः **वा** - अथवा **चतुष्पादतः** - अश्वादिषु **आपत्** - विपत्तिः **प्रयाणे** - यात्रायां **निषादैः** - भिल्लैः **विषादं** - दु:खं **करोति** - भवति ।

**भावार्थः-** यस्य जातकस्य रिपुभवने भास्करः स्यात् । सः शत्रुघाती भवति । सः राजदण्डनिमित्तात् मित्रहेतोः वा द्रव्यस्य व्ययं करोति । अस्य मातुलादयः पीडाग्रस्ताः भवन्ति । अथवा अश्वादिचतुष्पादतः सः पीडितो भवति । यात्रकाले भिल्लैः विषादम् आप्नोति ।

**द्युनाथो यदा द्युनजातो नरस्य प्रियातापनं पिण्डपीडा च चिन्ता ।**

**भवेत्तुच्छलब्धिः क्रये विक्रयेऽपि प्रतिस्पर्धया नैति निद्रां कदाचित् ॥ ७ ॥**

**अन्वयः-** द्युनाथः यदा नरस्य द्युनजातो भवेत्, प्रियातापनं पिण्डपीडा, च भवेत् । क्रये - विक्रय अपि तुच्छलब्धिः भवेत् । प्रतिस्पर्धया कदाचित् निद्रां न एति ।

**व्याख्या-** **द्युनाथः** - सूर्यः **यदा** - जन्मसमये **नरस्य** - जनस्य **द्युनजातः** - सप्तमभावे **भवेत्** - स्यात् **प्रियातापनं** - स्त्रीक्लेशः **पिण्डपीडा** - गात्रकष्टं **च** - तथा **भवेत्** - स्यात् **क्रये विक्रये** - वाणिज्ये **अपि** - च **तुच्छलब्धिः** - स्वल्पलाभः **भवेत्** - स्यात् **प्रतिस्पर्धया** - प्रतिवादीर्ष्यया **कदाचित्** - कदाचन **निद्रां** - शयनं **न एति** - न लभते ।

**भावार्थः-** यस्य जातकस्य सप्तमभावे सूर्यः स्यात् । सः नरः स्त्रीवर्गात् कष्टम् प्राप्नोति । शरीरपीडां तथा मानसिकचिन्ताग्रस्तो भवति । वाणिज्ये स्वल्पलाभो भवति । तथा प्रतिवादी ईर्ष्यया सुखेन निद्रां न लभेत।

**क्रियालम्पटं त्वष्टमे कष्टभाजं विदेशीयदारान् भजेद्वाऽप्यवस्तु ।**

**वसुक्षीणता दस्युतो वा विलम्बाद्विपद् गुह्यता भानरुग्रं विधत्ते ॥ ८ ॥**

**अन्वयः-** अष्टमे तु भानुः क्रियालम्पटं कष्टभाजं विधत्ते । विदेशीयदारान्, अवस्तु अपि भजेत् । अविलंबात् दस्युतः वसुक्षीणता भवेत् । भानुः उग्रां विपद् गुह्यता वा विधत्ते ।

**व्याख्या-** **अष्टमे** - मृतिभावे **भानुः** - सूर्यः **क्रियालम्पटं** - व्यवहारेधूर्तः **कष्टभाजं** - दु:खभाजं **विधते** - करोति **विदेशीयदारान्** - गणिका **अवस्तु** - अभक्ष्यम् **अपि** - च **भजेत्** - भक्षेत् **अविलंबात्** - शीघ्रं **दस्युतः** - चौरात् **वसुक्षीणता** - द्रव्यरहीनता **भवेत्** - स्यात् **भानुः** - सूर्यः **उग्रां** - कठिनां **विपद्** - आपद् **गुह्यता** - गुप्तता **वा** - अथवा **विधत्ते** - प्राप्नोति ।

**भावार्थः-** यस्य जातकस्य अष्टमभावे सूर्यः स्यात् । सः नरः व्यवहारेः अतिधूर्तः भवति । सः सदैव कष्टभाग् भवति । तस्य सम्बन्धः गणिकाभिः सह भवति । अभक्ष्य-वस्तूनि अत्ति । अस्य धनं शीध्रं नष्टं भवति। तथा कठिनां पीडां प्राप्नोति ।

**दिवानायके दृष्टता कोणयाते न चाप्नोति चिन्ताविरामं च चेतः ।**

**तपश्चर्यायाऽनिच्छयाऽपि प्रयाति क्रियातुङ्गतां तप्यते सोदरेण ॥ ९ ॥**

**अन्वयः -** दिवानायके कोणयाते दृष्टता (जायते) (अस्य) चिंता विरामः चेतः न च आप्नोति । अनिच्छयापि तपश्चर्यया क्रियातुंगतां प्रयाति, सोदरेण तप्यते ।

**व्याख्या-** **दिवानायके** - सूर्ये **कोणयाते** - नवमस्थे **दृष्टता** - अश्वमता **चिन्ताविरामं** - व्याधिविरामं **चेतः** - मनः **न** - नो **आप्नोति** - प्राप्नोति **अनिच्छयापि** - मनोभावरहितयापि **तपश्चर्यया** - तपसा **क्रियातुङ्गतां**

– व्यवहारेण पूज्यतां **प्रयाति** – गच्छति **सोदरेण** – भ्रात्रा **तप्यते** – संतप्तो भवति ।

**भावार्थः**- यस्य जातकस्य नवमस्थाने सूर्यः भवेत् सः नरः अश्वसमो भवति । सदेव तस्य चेतः चिंतायुक्तं भवति । मनोभावरहिततपसा क्रियातुङ्गतां प्राप्नोति । अर्थात् दाम्भिकत्वेऽपि लोकमान्यो भवति । तथा भ्रातृवर्गात् सन्तप्तो भवति ।

**प्रयातोंऽशुमान् यस्य मेषूरणेऽस्य श्रमः सिद्धिदो राजतुल्यो नरस्य ।**

**जनन्यास्तथा यातनामातनोति क्लमः संक्रमेद्वल्लभैर्विप्रयोगः ॥ १० ॥**

**अन्वयः**- अंशुमान् यस्य नरस्य मेषूरणे प्रयातः (तस्य) श्रमः राजतुल्यः सिद्धिदः (स्यात्) जनन्याः यातनां आतनोति, (तस्य) वल्लभैः विप्रयोगः, तथा क्लमः संक्रमेत् ।

**व्याख्या**- **अंशुमान्** – सूर्यः **यस्य नरस्य** – मनुष्यस्य **मेषूरणे** – दशमस्थाने **प्रयातः** – स्थितः **श्रमः** – पराक्रमः **राजतुल्यः** – नृपवत् **सिद्धिदः** – सिद्धिप्रदः **जनन्याः** – मातुः **यातनां** – पीडां **आतनोति** – लभते **वल्लभैः** – मित्रकलत्रादिभिः **विप्रयोगः** – वियोगः **तथा** – च **क्लमः** – ग्लानिः **संक्रमेत्** – संभवेत्।

**भावार्थः**- यस्य जातकस्य दशमस्थाने सूर्यः भवेत् तस्य नरस्य पराक्रमः नृपवत् सिद्धिप्रदः भवति । मातुः पीडां प्राप्नोति । मित्रकलत्रादिभिः वियोगं प्राप्नोति । अतः सः मनोव्यग्रतां अनुभवति ।

**रवौ संलभेत्स्वं च लाभोपयाते नृपद्वारतो राजमुद्राधिकारात् ।**

**प्रतापानाले शत्रवः संपतन्ति श्रियोऽनेकधा दुःखमंगोद्भवानाम् ॥**

**अन्वयः**- रवौ लाभोपयाते (सति) नृप द्वारतः, राजमुद्राधिकारात् च अनेकधा श्रियः संल्लभेत् । (तस्य) प्रतापानले शत्रवः सम्पतन्ति, अङ्गोद्भवानां दुखं (च) (स्यात्) ।

**व्याख्या**- **रवौ** – भानौ **लाभोपयाते** – लाभभावे सति **नृप द्वारतः** – राजमार्गात् **राजमुद्राधिकारात्** – राजदत्तं मुद्राधिकारात् **अनेकधा** – बहुविधा **श्रियः** – लक्ष्मीः **संल्लभेत्** – आप्नोति **प्रतापानले** – प्रतापाग्रौ **शत्रवः** – रिपवः **सम्पतन्ति** – नश्यन्ति **अङ्गोद्भवानां** – पुत्रपौत्रादीनां **दुःखं** – कष्टं भवति ।

**भावार्थः**- यस्य जातकस्य एकादशस्थाने सूर्यः भवेत् सः नरः राजमार्गात् राजमुद्राधिकारात् च विपुलाम् लक्ष्मीं प्राप्नोति । तस्य प्रतापाग्नौ शत्रवः नष्टाः भवन्ति । तथा पुत्रपौत्रेभ्यः सः कष्टं लभते ।

**रविर्द्वादशे नेत्ररोगं करोति विपक्षाहवे जायतेऽसौ जयश्रीः ।**

**स्थितिर्लब्धया लीयते देहदुःखं पितृव्यापदो हानिरध्वप्रदेशे ॥ १२॥**

**अन्वयः**- असौ रविः द्वादशे नेत्ररोगं करोति, विपक्षाहवे जयश्रीः जायते, लब्धया स्थितिः, देहदुःखं लीयते, पितृव्यापदः, अध्वप्रदेश हानिः ।

**व्याख्या**- **रविः** – सूर्यः **द्वादशे** – द्वादशस्थाने **नेत्ररोगं** – द्रष्टिनाशं **करोति** – भवति **विपक्षाहवे** – शत्रुसंगरे **जयश्रीः** – विजयः **लब्धया** – इच्छुकः **स्थितिः** – जायते **देहदुःखं** – शरीरपीडां **लीयते** – नश्यति **पितृव्यापदः** – पितृपक्षात् **अध्वप्रदेशे** – यात्रायां मार्गे **हानिः** – क्षतिः ।

**भावार्थः**- यस्य जातकस्य द्वादशभावे सूर्यः भवेत् सः नेत्ररोगी भवति । शत्रुसंग्रामे विजयी भवति । लाभस्य कामनया एकस्मिन्नेव स्थाने निवसति । अस्य शारीरिकपीडां नश्यति । पितृपक्षात् कलहं प्राप्नोति । यात्रायां मार्गे धनादिकं नष्टं भवति ।

## 2. तन्वादिद्वादशभावस्थचन्द्रफलानि

**विधुर्गोकुलीराजगः सन्वपुस्थो धनाध्यक्षलावण्यमानन्दपूर्णम् ।**

**विधत्तेऽधनं क्षीणदेहं दरिद्रं जडं श्रोत्रहीनं नरं शेषलग्ने ॥ १ ॥**

**अन्वयः-** विधुः गोकुलीराजगः (सन्) वपुस्थः धनाध्यक्षलावण्यम् आनन्दपूर्णं (नरं) विधत्ते । शेषलग्ने (नरं) अधनं क्षीणदेहं द्ररिद्रं जडं श्रोत्रहीनं (च) विधते ।

**व्याख्या-** **विधुः** - चन्द्रः **गोकुलीराजगः** - वृषकर्कमेषस्थः **वपुस्थः** - तनुभावस्थितः **धनाध्यक्षलावण्यं** - धनपतित्वं सौन्दर्यं **आनन्दपूर्णं** - परमानन्दप्राप्तिः **विधत्ते** - करोति **शेषलग्ने** - उपयुक्तराश्यादन्यराशौ **अधनं** - धनहीनम् **क्षीणदेहं** - कृशकायं **द्ररिद्रं** - धनहीनम् **जडं** - जडत्वं **श्रोत्रहीनं** - कर्णविहीनं **विधत्ते** - करोति ।

**भावार्थः-** यदि जातकस्य जन्मकाले चन्द्रः वृषकर्कमेषस्थराशिषु स्थित्वा तनुभावे तिष्ठति तदा तस्मै नराय धनाध्यक्षत्वम् , सौन्दर्यमानन्दपूर्णं जीवनं च प्रददाति । किन्तु स एव चन्द्रः अन्यभावे स्थास्यति तदा जातकम् अधनं, कृशकायं, द्ररिद्रं, जडबुद्धिमन्तं, कर्णहीनं नत्वं च विधते ।

**हिमांशौ वसुस्थानगे धान्यलाभः शरीरेऽतिसौख्यं विलासोऽङ्गनानाम्**

**कुटुम्बे रतिर्जायते तस्य तुच्छं वशं दर्शने याति देवांगनाऽपि ॥ २ ॥**

**अन्वयः-** हिमांशो वस्तुस्थानगे धान्यलाभः (स्यात्) शरीरे अतिसौख्यं, (तस्य) अंगनानां विलासः, कुटुम्बे रतिः जायते । तस्य दर्शने देवांगनापि वशं याति तुच्छम् ।

**व्याख्या-** **हिमांशौ** - चन्द्र **वसुस्थानगे** - द्वितीयस्थे **धान्यलाभः** - अन्नप्राप्तिः **शरीरे** - तनौ **अतिसौख्यं** - बहुलाभं **अंगनानां विलासः** - कलत्रानां लीला **कुटुम्बे रतिः** - परिवारे प्रीतिः च **जायते** - भवति **तस्य** - जातकस्य **दर्शने** - द्रष्टे सति **तुच्छम्** - हीनं **देवाङ्गनापि** - अप्सरा अपि **वशं** - मोहितं **याति** - प्राप्नोति ।

**भावार्थः-** चन्द्रे द्वितीयस्थानस्थिते सति (जातकस्य) धान्यलाभः, शारीरिकसौख्यवृद्धिः, स्त्रीणां विलासः स्वकुटुम्बे प्रीतिः च जायते । तथा च तस्य जातकस्य दर्शनेन तुच्छदेवांगना अपि वशं प्राप्नोति इति ।

**विधौ विक्रमे विक्रमेणैति वित्तं तपस्वी भवेद् भामिनीरञ्जितोऽपि ।**

**कियच्चिंतयेत्साहजं तस्य शर्म प्रतापोज्वलो धर्मिणो वैजयन्त्या ॥ ३ ॥**

**अन्वयः-** विधौ विक्रमे (सति) विक्रमेण वित्तम् एति । भामिनीरंजितः अपि तपस्वी भवेत् । (तस्य) धर्मिणः वैजयन्त्या प्रतापोज्वलः (स्यात्) तस्य कियत् साहजं शर्म चिन्तयेत् ।

**व्याख्या-** **विधौ** - चन्द्रे **विक्रमे** - तृतीये **विक्रमेण** - पराक्रमेण **वित्तं** - धनम् **एति** - प्राप्नोति **भामिनीरंजितः** - स्त्रीभिर्युक्तोऽपि **तपस्वी** - तापसः **भवेत्** - भवति **धर्मिण** - धार्मिकः **वैजयन्त्या** - धर्मध्वजयो **प्रतापोज्वलः** - उज्वलयशः प्रसरेत् **तस्य** - नरस्य **कियत् साहजं** - तृतीयभावजन्यं **शर्म** - सुखं **चिन्तयेत्** - विचारयेत् ।

**भावार्थ-** तृतीयभावे चन्द्र सति जातकः स्वपराक्रमेण वित्तं (धनार्जनं) करोति । सः जातकः स्त्रीरंजितोभूत्वाऽपि तपस्वी भवति । तस्य धर्मयुक्त-धर्मध्वजया उज्वलयशः प्रसरेत् । इति तृतीयस्थानजन्यं सुखं (फलं) विचारणीयम् ।

**यदा बन्धुगो बान्धवैरत्रिजन्मा नृपद्वारि सर्वाधिकारी सदैव ।**

**वयस्याग्रिमे तादृशं नैव सौख्यं सुतस्त्रीगणात्तोषमायाति सम्यक् ॥ ४ ॥**

**अन्वयः-** यदा अत्रिजन्मा बन्धुगः (स्यात्) (तदा) बान्धवैः नृपद्वारी सदैव सर्वाधिकारी (विधीयते) । अग्रिमे वयसि तादृशं सम्यक् सौख्यं नैव (जायते) । (सः) सुत-स्त्रीगणात् तोषम् आयाति ।

**व्याख्या-** **यदा** - जन्मलग्ने **अत्रिजन्मा** - चन्द्रः **बन्धुगः** - चतुर्थस्थाने **बान्धवैः** - बन्धुभिः **नृपद्वारी** - राज्यतः **सदैव** - सर्वदा **सर्वाधिकारी** - अधिकारेण पूर्णः **अग्रिमे** - प्रथमे **वयसि** - वर्षे (अवस्थायां) **तादृशं**

– तादृक् **सम्यक्** – सामान्यम् **सौख्यं** – सुखं **नैव** – न एव **सुत-स्त्रीगणात्** – पुत्रकलत्रसमूहात् **तोषं** संतोषं **आयाति** – प्राप्नोति

**भावार्थः**– यदा अत्रिपुत्रश्चन्द्रः चतुर्थभवनगतः तदा सः जातकः बान्धवैर्युक्तः सदैव राजद्वारे सर्वाधिकारी च भवति। तथा च प्रथमवयसि (बाल्यकाले) (पूर्वोक्त फलसदृशं) सम्यक् सौख्यं नैव जायते । तद्वदेव पुत्रकलत्रादिभिरपि पूर्ण सन्तोषं नैवाऽऽप्नोति ।

**यदा पञ्चमे यस्य नक्षत्रनाथो ददातीह संतानसंतोषमेव ।**

**मतिं निर्मलां रत्नलाभं च भूमिं कुसीदेन नानाप्तयो व्यावसायात् ॥ ५ ॥**

**अन्वयः** – यदा यस्य नक्षत्रनाथः पञ्चमे (स्यात्) (तदा) (तस्य) इह सन्तानसन्तोषमेव ददाति । निर्मलां मतिं रत्नलाभें भूमिं च (ददाति) (तथा च) कुसीदेन व्यवसायात् नानाप्तयः च स्यात् ।

**व्याख्या**– **यदा** – यस्मिन् काले **यस्य** – जातकस्य **नक्षत्रनाथः** – चन्द्रः **पञ्चमे** – पञ्चमभावे **इह** – अत्र **सन्तानसन्तोषमेव** – पुत्रसुखं **ददाति** – प्रददाति **निर्मलां मतिं** – शुद्धबुद्धिं **रत्नलाभं** – माणेकादि रत्नानां लाभं **भूमिं** – क्षितिम् **च** – ददाति **कुसीदेन** – व्याजेन **व्यावसायात्** – वाणिज्यप्रवृत्त्या **नानाप्तयः** – अनेकविधलाभश्च भवति ।

**भावार्थः**– यस्मिन्काले जातकस्य चन्द्रः पञ्चमभावे भवेत्तदा तस्यात्र सन्तानसुखं, निर्मलबुद्धिं रत्नलाभं अवनिलाभं च करोति । तदुपरि व्याजवृत्या व्यवसायकारणेन अनेकविधम् अर्जनमपि भवति ।

**रिपौ राजते विग्रहेणापि राजा जितास्तेऽपि भूयो विधौ संभवन्ति ।**

**तदग्रेऽरयो निष्प्रभा भूयसोऽपि प्रतापोज्वलो मातृशीलो न तद्वत् ॥ ६ ॥**

**अन्वयः**– विधौ रिपौ (स्थिते) सति राजा विग्रहेण अपि प्रतापोज्वलः (सन्) राजते । (तेन) अरयः जिताः अपि तदग्रे भूयसः अपि निष्प्रभाः (जायन्ते) । तद्वत् (सः) मातृशीलः न भवति ।

**व्याख्या**– **विधौ** – चन्द्रः **रिपौ** – शत्रुभवने **राजा** – नृपः **विग्रहेण** – विरोधात् **अपि** – च **प्रतापोज्वलः** – तेजसाकान्तियुक्तः **राजते** – शोभते **अरयः** – शत्रवः **जिताः** – अभिभूताः **अपि** –च **तदग्रे** – तस्य पुरः **भूयसः** – नृपाः **अपि** – च **निष्प्रभाः** – निस्तेजयुक्ताः **तद्वत्** –तथैव **मातृशीलः** – मातृभक्तः **न** – नो **भवति** – स्यात् ।

**भावार्थः**– शत्रुभवने चन्द्रे स्थिते सति राजविग्रहेण अपि जातकः स्वतेजसा कान्तियुक्तो भूत्वा (जगति) शोभते । जातकेन पराजिताः शत्रवः अपि तदग्रे अतीव निस्तेजयुक्ताः भवन्ति (जायन्ते वा) किन्तु प्रतापोज्वलः सः मातृभक्तो न भवति ।

**ददेद्दारशं सप्तमे शीतरश्मिर्धनित्वं भवेदध्ववाणिज्यतोऽपि ।**

**रतिं स्त्रीजने मिष्टभुग्लुब्धचेताः कृशः कृष्णपक्षे विपक्षाभिभूतः ॥ ७ ॥**

**अन्वयः**– सप्तमे शीतरश्मिः दारशं ददेत्, अध्व वाणिज्यतः अपि धनित्वं भवेत् । (सः) कृष्णपक्षे स्त्रीजने रतिं (प्राप्नुयात्), सः मिष्टभुक्, लुब्धचेताः, कृशः विपक्षाभिभूतः (स्यात्) ।

**व्याख्या**– **सप्तमे** – सप्तमस्थाने **शीतरश्मिः** – चन्द्रः **दारशं** – स्त्रीसुखं **ददेत्** – ददाति **अध्व वाणिज्यतः** – विदेशव्यापारात् **अपि** – च **धनित्वं** – धनलाभः **भवेत्** – भवति **कृष्णपक्षे** – द्वितीयपक्षे **स्त्रीजने** – स्त्रीभाषणे **रतिं** – प्रीतिं **सः** – नरः **मिष्टभुक्** – मिष्टान्नभोजी **लुब्धचेताः** – लुब्धवृत्तिः **कृशः** – शरीरः **विपक्षाभिभूतः** – शत्रुणा जितः स्यात् ।

**भावार्थः**– यस्य जन्मकाले सप्तमस्थः चन्द्रो भवति सः जनः स्त्रीसुखं विदेशे वाणिज्यकर्मणा धनलाभः प्राप्नोति । विशेषतः कृष्णपक्षे स्त्रीभाषणे आसक्ति रतः मिष्टान्नभोजे प्रीतिः लुब्धचित्तवृत्तिः, कृशशरीरः तथा शत्रुणा जीतो भवति ।

**सभा विद्यते भैषजी तस्य गेहे पचेत्कर्हिचित्क्वाथमुदोदकानि ।**

**महाव्याधयो भीतयो वारिभूताः शशी क्लेशकृत्संकटान्यष्टमस्थः ॥ ८ ॥**

**अन्वयः-** शशी (यस्य) अष्टमस्थः (स्यात्) तस्य गेहे भैषजी सभा विद्यते, कर्हिचित् क्वाथमुदगोदकानि (पचेत्)। अरिभूताः महाव्याधयः भीतयः संकटानि वा (भवन्ति) (अयं शशी) क्लेशकृत् भवति ।

**व्याख्या-** **शशी** - चन्द्रः **अष्टमस्थः** - निधनस्थः **तस्य** - नरस्य **गेहे** - गृहे **भैषजी सभा** - वैद्यानामागमनं **विद्यते** - भवति **कर्हिचित्** - कदाचन **क्वाथमुदोदकानि** - ज्वरादिसति तन्निवारणाय **अरिभूताः** - शत्रुरूपाः **महाव्याधयः** - महादुःखानि **भीतयः** - भयम् **संकटानि** - दुःखानि (आपत्) **वा** - अथवा **क्लेशकृत्** - कलहः कृत् **भवति** - स्यात् ।

**भावार्थः-** यस्य जातकस्य जन्मकाले चन्द्रः अष्टमस्थः तदा तस्य गृहे वैद्यानामावागमनं सदैव भवति तथा च तस्य गृहे सर्वदा एव क्वाथस्य मुद्रादिधान्यानां पाचनक्रिया भवति । अर्थात् तस्य गृहे ज्वरादिरोगवशात् तादृशं भवति । तथा च जलोदररोगः राजरोगः जलभीतिः महत्संकटानि दुर्जनैः बन्धनादिभिश्च दुःखावाप्तिर्भवति ।

**तपोभावगस्तारकेशो जनस्य प्रजाश्च द्विजा वन्दिनस्तं स्तुवन्ति ।**

**भवत्येव भाग्याधिको यौवनादेः शरीरे सुखं चन्द्रवत्साहसं च ॥ ९ ॥**

**अन्वयः-** (यस्य) जनस्य तारकेशः तपोभावगः (अस्ति), तं प्रजाः, द्विजाः, वन्दिनश्च स्तुवन्ति । (सः) यौवनादेः भाग्याधिकः भवति । (तस्य) शरीरे सुखं चन्द्रवत् साहसं च भवति एव ।

**व्याख्या-** **जनस्य** - नरस्य **तारकेशः** - चन्द्रः **तपोभावगः** - नवमस्थाने **तं** - जनं **प्रजाः** - इतरजनाः **द्विजाः** - ब्राह्मणाः **वन्दिनश्च** - वन्दनीयः **स्तुवन्ति** - प्रार्थयन्ति **यौवनादेः** - शौर्यादेः **भाग्याधिकः** - भाग्यमधिकम् **भवति** - स्यात् **शरीरे** - देहे **सुखं** - सौख्यं **चन्द्रवत् साहसं** - चन्द्रतुल्यं साहसं **च भवति** - प्राप्नोति **एव** - इति ।

**भावार्थः-** यस्य नवमभावे चन्द्रः स्यात् तं जनं ब्राह्मण-क्षत्रिय-वैश्य-वन्दि जनाश्च स्तुवन्ति । तदुपरि समाजस्यान्यजनाः अपि स्तुतिं, गुणवर्णनं च कुर्वन्ति । तस्य यौवनशौर्य - धन-शील-व्यवहारादिगुणैः भाग्यवृद्धिर्जायते । तथा च शारीरिकसुखेन सम्पन्नः चन्द्रतुल्यं साहसं च अवाप्नोति ।

**सुखं बान्धवेभ्यः खगे धर्मकर्मा समुद्रांगजे शं नरेशादितोऽपि ।**

**नवीनांगनावैभवे सुप्रियत्वं पुरोजातके सौख्यमल्पं करोति ॥ १० ॥**

**अन्वयः-** जातके खगे समुद्रांगजे (स्थिते) धर्मकर्मा, बान्धवेभ्यः सुखं, नरेशादितः अपि शं, नवीनांगना वैभवे सुप्रियत्वं (च) (लभते) पुरा अल्पं सौख्यं करोति ।

**व्याख्या-** **जातके** - जन्मकाले **खगे** - दशमस्थाने **समुद्रांगजे** - चन्द्रः **धर्मकर्मा** - धर्मकर्मयुक्तः **बान्धवेभ्यः** - बन्धुभिः **सुखं** - सौख्यं **नरेशादितः** - नृपेणापि **अपि** - च **शं** - कल्याणं **नवीनांगना** - नवीनास्त्रीभिः **वैभवे** - एश्वर्ये **सुप्रियत्वं** - प्रीतिं (लभते) **पुरोजातके** - प्रथमपत्रे, **अल्पं सौख्यं** - स्वल्पसुखं **करोति** - मिलति ।

**भावार्थः-** यदि जन्मकाले चन्द्रः दशमस्थः तदा सः जनः धर्मकर्मयुक्तः बन्धुभिः सुखप्राप्तकर्ता, नृपेणापि कल्याणमवाप्नोति । नवीनास्त्रीभिः सुप्रियत्वं प्राप्नोति । किन्तु तं जनं प्रथमसन्तानेन अथवा भृत्यैः स्वप्नसुखं मिलति ।

**लभेद् भूमिपादिन्दुना लाभगेन प्रतिष्ठाधिकाराम्बराणि क्रमेण ।**

**श्रियोऽथ स्त्रियोऽन्तःपुरे विश्रमन्ति क्रिया वैकृती कन्यकावस्तुलाभः ॥ ११ ॥**

**अन्वयः-** लाभगेन इन्दुना भूमिपात् क्रमेण प्रतिष्ठाधिकाराम्बराणि लभेद् । अथ (तस्य) अन्तःपुरे श्रियः स्त्रियः (च) विश्रमन्ति । (तस्य) क्रिया वैकृतिः (जायते) कन्यका, वस्तुलाभः (भवति) ।

**व्याख्या-** **लाभगेन** – एकादशभावस्थेन **इन्दुना** – चन्द्रः **भूमिपात्** – राज्ञः **क्रमेण** – क्रमशः **प्रतिष्ठाधिकाराम्बराणि** – प्रतिष्ठा – अधिकारः – वस्त्रादिकं च **लभेद्** – प्राप्नोति **अथ अन्तःपुरे श्रियः** – लक्ष्मीः **स्त्रियः** – स्त्रीया **विश्रमन्ति** – तिष्ठन्ति **क्रिया वैकृती** – कार्यस्य विकारः (जायते) – **कन्यका** – कन्यायाः **वस्तुलाभः** – उत्तमवस्तुनश्च लाभो (भवति)

**भावार्थः-** यदि जातकस्य एकादशभावे चन्द्रः स्यात्तदा सः जनः राज्ञः क्रमशः प्रतिष्ठा, अधिकारः, वस्त्रादिकं च प्राप्नोति । तस्य गृहे स्त्रीणां धनं च सदैव स्थिरं स्यात् । तं नैक वस्तुभिः लाभो भवति किन्तु सः जनः यस्य कार्यस्य प्रारम्भं करोति तत्र विकारम् आयाति । तथापि कन्यायाः उत्तमवस्तुनश्च लाभो भवति ।

**शशी द्वादशे शत्रुनेत्रादिचिन्ता विचिन्त्या सदा सद्व्ययो मंगलेन ।**
**पितृव्यादिमात्रादितोऽन्तविषादो न चाप्नोति कामं प्रियाल्पप्रियत्वम् ॥ १२ ॥**

**अन्वयः-** शशी द्वादशे (स्यात्) (तदा) शत्रुनेत्रादि चिन्ता विचिन्त्या, (तस्य) सदा मंगलेन सद् व्ययः स्यात् । पितृव्यादि मात्रादितः अन्तः विषादः, प्रियाल्पप्रियत्वं (स्यात्) कामं न च आप्नोति ।

**व्याख्या-** **शशी** – चन्द्रः **द्वादशे** – द्वादशस्थाने **शत्रुनेत्रादिचिन्ता** – शत्रुनेत्रभयादिचिन्ता **विचिन्त्या** – चिन्तनीया **सदा** – नित्यं **मंगलेन सद् व्ययः** – विवाहादिमांगलिककार्येषु धनव्यय : स्यात् **पितृव्यादि** – पितृव्यापरिवारजनानां **मात्रादितः** – मातृ-भ्रातृ-पुत्रादिभिः **अन्तः विषादः** – मनसि दुःखं **प्रियाल्पप्रियत्वं** – स्त्रीणां स्वल्पस्नेहः **कामं** – कार्य पूर्णं **न च आप्नोति** – न प्राप्नोति ।

**भावार्थः-** यदि द्वादशस्थाने चन्द्रः भवेत्तदा तं मानवं शत्रुभयाच्चिन्ता नेत्रविकारादिरोगाश्च पीडयन्ति । तदुपरि विवाहादिमांगलिककार्येषु तस्य धनव्ययो भवति । तथा च तं पितृव्यापरिवारजनानां कारणेन चित्त विषादो भवति । अत एव पितृव्य-मातृ-भ्रातृ-पुत्रादिभिः साकं स्वल्पस्नेहः करणीयः, स्त्रीणां प्रति प्रीतिः स्वल्पस्नेहः तथा येन वांछितः फले न्यूनता नागच्छेत् ।

## स्वाध्यायः

१. **अधस्तनेषु प्रश्नेषु योग्यमुत्तरं चित्वा लिखत ।**

(१) लग्ने यदि सूर्यश्चेत् कीदृशी पीडा भवति ?

(क) वातपित्तम् (ख) कफपित्तम् (ग) वातकफ़म् (घ) त्रिदोषम्

(२) भानुः धने स्यात् तदा किं सुखं प्राप्यते ?

(क) स्त्रीसुखम् (ख) जनकसुखम् (ग) गजाश्वादिसुखम् (घ) कुटुम्बसुखम्

(३) तृतीयस्थाने सूर्यः कस्मै सुखं ददाति ?

(क) भ्रात्रे (ख) नृपाय (ग) विप्राय (घ) सचिवाय

(४) नवमस्थानस्थित सूर्यः कं पीडयति ?

(क) जनकम् (ख) गुरुम् (ग) सहोदरम् (घ) स्वात्मानम्

(५) द्वादशस्थानस्थितः सूर्यः कं दोषं जनयति ?

(क) पादस्य (ख) नेत्रस्य (ग) हस्तस्य (घ) हृदयस्य

(६) चतुर्थस्थानस्थित चन्द्रः जातकाय राजद्वारे किं ददाति ?

(क) सर्वस्वम् (ख) भाग्याधिकारम् (ग) सर्वाधिकारम् (घ) सर्वविधमन्नम्

(७) पञ्चमे नक्षत्रनाथः किं ददाति ?

(क) पुत्रसुखम् (ख) बन्धुसुखम् (ग) पुत्रदुःखम् (घ) बन्धुदुःखम्

(८) षष्ठस्थाने विद्यमानः चन्द्रः किं प्रयच्छति ?

(क) वीरत्वम् (ख) विजयम् (ग) दुःखम् (घ) रोगम्

(९) सप्तमस्थानस्थितः नक्षत्रपतिः शत्रुणा किं लभते ?

(क) विजयः (ख) हानिः (ग) लाभः (घ) पराजयः

(१०) अष्टमस्थानस्थितः विधुः किं फ़लं ददाति ?

(क) महाव्याधिः (ख) अल्पायुः (ग) दीर्घायुः (घ) मध्यायुः

**२. एकैक-वाक्येनोत्तराणि लिखन्तु ।**

(१) कुटुम्बे कलिः केन कारणेन जायते ?

(२) नरः भाग्याधिकः कदा भवति ?

(३) मनुष्यः शत्रुघाती कदा भवति ?

(४) उत्तमस्त्रिसुखं जनः कदा प्राप्नोति ?

(५) जातकः शत्रुभयं कदा आप्नोति ?

(६) नरः कदा परदेशात् पुनः नागच्छति ?

(७) मनुष्यः बुद्धिमान् कदा भवति ?

**३. श्लोकपूर्तिं कृत्वा भावार्थो लेख्यः ।**

(१) तनुस्था रविस्तु .......................... प्रयाति ॥

(२) रवौ संलभेत्स ......................... गोद्भवानाम् ॥

(३) यदा बन्धुगो ......................... सम्यक् ॥

(४) तपोभावग ......................... साहसं च ॥

**४. अ-विभागेन सह ब-विभागेन सह सुयोजयतु ।**

| अ | ब |
|---|---|
| (१) तुंगयष्टिम् | (१) तनुस्थः सूर्यः |
| (२) भाग्याधिकम् | (२) धने भानुः |
| (३) प्रतापाधिकम् | (३) तृतीये अहर्मणिः |
| (४) शत्रुनेत्रादि चिन्ता | (४) लग्ने चन्द्रः |
| (५) सन्तानसंतोषमेव | (५) पञ्चमे चन्द्रः |
| (६) कर्णविहीनम् | (६) द्वादशे शशी |

**५. टिप्पणी लेख्या ।**

(१) सूर्यस्य त्रिकोणफलम् ।

(२) लाभभावस्थितचन्द्रफलम् ।

(३) तृतीयस्थानस्थितचन्द्रफलम् ।

(४) सप्तमस्थानस्थितसूर्यफलम् ।

**६. विस्तरेणोत्तराणि लिखत ।**

(१) द्वितीयस्थाने सूर्यस्य फलं लिखत ।

(२) अष्टमस्थाने विद्यमानः सूर्यस्य फलं वर्णयत ।

(३) पञ्चमभावगतः चन्द्रफ़लवर्णनं कुरुत ।

(४) व्ययस्थाने स्थितस्य चन्द्रस्य फलं विस्तरेण लिखत ।

(५) लग्नस्थः शशिफलं चर्चयत ।

**अध्यापकानां कृते**

- नभोमण्डलस्थितसूर्यचन्द्रयोर्विषये अन्यशास्त्राऽऽधारितं ज्ञानं प्रदेयम् ।

**छात्राणां प्रवृत्ति**

- सूर्यचन्द्रयोः विविधसंज्ञाः संशोध्य लेख्या ।

●

| ७ | तन्वादिद्वादशभावस्थ-भौमबुधयोः फलानि |
|---|---|

## प्रास्ताविकम्

भारते भारतीयपरम्परायाः प्राचीनशास्त्राणामेकं ज्योतिषशास्त्रमस्ति । पृथिव्याः भौतिक-रासायणिक-जैविकविषयाः अन्तरिक्षस्थितग्रहाणां स्थितिगतिभ्यां सह संयोजिताःसन्ति । निश्चितवैज्ञानिकपृथक्करणानाम् अद्भुतपद्धत्या एवञ्च सूक्ष्मगाणितिकगणनां कृत्वा पृथिव्यां जायमानविविधधटनासन्दर्भे तथा च मानवानां जीवनसन्दर्भे भूत-भविष्यकालाभ्यां सह संलग्नविषयेषु ग्रहाणां फलं दरीदृश्यते । इत्थं ज्योतिषशास्त्रमेकमद्वितीयं विज्ञानमस्ति ।

अतो वयं प्राचीनार्वाचीनयोः उभयोः विज्ञानानां महत्तां स्वीकृत्य तेषां मतान्तरेण समन्वयेन च ज्योतिषशास्त्रे भौमबुधग्रहफलसन्दर्भे अभ्यासं करिष्यामः ।

**विलग्ने कुजे दण्डलोहाग्निभीतिस्तपेन्मानसं केसरी किं द्वितीयः ।**

**कलत्रादिघातः शिरोनेत्रपीडा विपाके फलानां सदैवोपसर्गः ॥ १ ॥**

**अन्वयः-** कुजे विलग्ने (स्थिते) दण्डलोहाग्निभीतिः (स्यात्) (तस्य) मानसं तपेत्, कलत्रादिघातः, शिरोनेत्रपीडा, फलानां विपाके, सदा एव उपसर्गः (स्यात्) (अन्यः) किं द्वितीयः केसरी (स्यात्) ।

**व्याख्या-** **कुजे** - भौमे **विलग्ने** - जन्मलग्ने **दण्डलोहाग्निभीतिः** - घातादिदण्डः (लोहधातुत): अग्रभयः) **मानसम्** - मनः **तपेत्** - संतापः **कलत्रादिघातः** - स्त्रीः आदिनाशः **शिरोनेत्रपडी** - मस्तिष्क - नेत्रादिपीडा **फ़लानां** - मनोरथानां **विपाके** - परिणामे **सदा एव** - सदैव **उपसर्गः** - विध्नः **किं** - तथापि **द्वितीयः** - अन्यः **केसरी** - सिंहः स्यात् ।

**भावार्थः-** लग्ने भौमे सति दण्डः, लोहः, अग्निः भयं स्यात् । स्त्रीपुत्रादिनाशः, मस्तिष्कपीडा, नेत्रादिपीडा च भवत्येव । सर्वकार्य-सिध्यर्थे सदैव विघ्नो भवेत् । अत एव मनसि संतापं जायते । तदुपरि द्वितीयः सिंहवत् उद्यमी भवति ।

**भवेत्तस्य किं विद्यमाने कुटुम्बे धनेऽङ्गारके यस्य लब्धे धने किम् ।**

**यथा त्रायते मर्कटः कण्ठहारं पुनः सम्मुखं को भवेद्वादभग्नः ॥ २ ॥**

**अन्वयः-** यस्य धने अङ्गारके (स्थिते) तस्य विद्यमाने कुटुम्बे किं भवेत् । धने लब्धे किं (स्यात्), यथा मर्कटः कण्ठहारं त्रायते । वादभग्नः कः पुनः (तस्य) सम्मुखं भवेत् ।

**व्याख्या-** **यस्य** - नरस्य **धने** - द्वितीयस्थाने **अङ्गारके** - भौमे **विद्यमाने** - प्राप्ते सति **कुटुम्बे** - स्वजने **किं** - फलम् **भवेत्** - स्यात् **धने** - द्रव्ये **लब्धे** - प्राप्ते **किं** - फलम् स्यात् **यथा मर्कटः** - वानरः **कण्ठहारं** - गलाभूषणं **त्रायते** - रक्षति **वादभग्नः** - पराजितः **कः** - जनः **पुनः सम्मुखं** - पुनः पुरस्सरं **भवेत्** - स्यात् ।

**भावार्थः-** द्वितीयभावे भौमः भवेत् तर्हि किं फलम् ? तस्य द्रव्यप्राप्ते सति किं भवति ? यथा वानरः कण्ठे समारोपितं गुञ्जादिरचितहारं रक्षति । तथैव सोऽपि कृपणो धनं रक्षति । न हि तद् धनं कदाचिदपि कुटुम्बोपयोगाय प्रददाति । तदुपरि तेन पराजितः जनः पुनः कदाऽपि विवादार्थं सम्मुखं नायाति ।

**कुतो बाहुवीर्यं कुतो बाहुलक्ष्मीस्तृतीयो न चेन्मङ्गलो मानवानाम् ।**

**सहोत्थव्यथा भण्यते केन तेषां तपश्चर्यया चोपहास्यः कथं स्यात् ॥ ३ ॥**

**अन्वयः-** मंगलः तृतीयः न चेत् (तर्हि) मानवानां बाहुवीर्यं कुतः, बाहुलक्ष्मी (वा) कुतः तेषां सहोत्थव्यथा केन भण्यते, तपश्चर्यया उपहास्यः कथं स्यात् ।

**व्याख्या-** **मंगलः** - भौमः **तृतीये** - सहजस्थानस्थितो **न चेत्** - न स्यात् (तर्हि) **मानवानां** - जनानां **बाहुवीर्यं** - बाहुबलं **कुतः** - कस्मात् **बाहुलक्ष्मीः** - स्वभुजोपार्जितं द्रव्यं **कुतः** - कस्मात् **तेषां** - सहजानां **सहोत्थव्यथा** - भ्रातृपीडा **केन भण्यते** - कया रीत्या स्यात् **तपश्चर्यया** - तपः कृत्वा **उपहास्यः** - विनोदयुक्तः **कथं** - केन प्रकारेण **स्यात्** - भवति ।

**भावार्थः-** भौमः तृतीयस्थाने न भवति चेत् तदा मानवानां बाहुबलं कथं स्यात् । स्वभुजोपार्जितं द्रव्यम्, एवं च भ्रातृपीडा केन जायते । पुनः तपश्चर्यया उपहासयोग्यो भवति ।

**यदा भूसुतः संभवेत्तुर्यभावे तदा किं ग्रहाः सानुकूला जनानाम् ।**

**सुहृद्वर्गसौख्यं न किंचिद्विचिन्त्यं कृपावस्त्रभूमीर्लभेद्भूमिपालात् ॥ ४ ॥**

**अन्वयः-** भूसुतः यदा (यस्य) तुर्यभावे संभवेत्, तदा जनानां सानुकूला ग्रहाः किम्, (तस्य) सुहृद्वर्ग-सौख्यं किञ्चित् न विचिन्त्यम् (सः) भूमिपालात् कृपावस्त्रभूमीः लभेत् ।

**व्याख्या-** **भूसुतः** - भौमः **तुर्यभावे** - चतुर्थस्थाने **संभवेत्** - भवति **तदा** - तर्हि **जनानां** - मानवानां **सानुकूला** - अनुकूलाः **ग्रहाः** - सूर्यादयः **किम् सुहृद्वर्ग** - मित्रवर्गः **सौख्यं** - सुखं **किञ्चित्** - अल्पं **न** - नहि **विचिन्त्यम्** - ज्ञेयम् **भूमिपालात्** - राज्ञया **कृपावस्त्रभूमीः** - कृपया वस्त्रं, भूमिं **लभेत्** - प्राप्यते ।

**भावार्थः-** यदा चतुर्थस्थाने भौमः भवेत् तदा जनानां ग्रहाः सानुकूलाः शुभफ़लदाः भवन्ति । तेन किं फ़लम् ? एवं च मित्रवर्गात् जनितं सुखं न स्यात् । राज्ञः कृपपा दया, वस्त्रं, भूमिश्च प्राप्यते ।

**कुजे पञ्चमे जाठराग्निर्बलीयान्नजातं नु जातं निहन्त्येक एव ।**

**तदानीमनल्पा मतिः किल्विषेऽपि स्वयं दुग्धवत्तप्यतेऽन्तः सदैव ॥ ५॥**

**अन्वयः-** कुजे पञ्चमे (सति) जाठराग्निः बलीयान् (भवति) तदानीं किल्विषे अपि (तस्य) मतिः अनल्पा भवेत् (सः) सदैव स्वयं दुग्धवत् अन्तः तप्यते, एक एव (कुजः) न जाते जातं (च) संतानं निहन्ति नु।

**व्याख्या-** **कुजे** - भौमे **पञ्चमे** - सुतस्थाने **जाठराग्निः** - उदराग्निः **बलीयान्** - प्रबलः **तदानीं** - पश्चात् **किल्विषे** - पापे **अपि** - च **मतिः** - बुद्धिः **अनल्पा भवेत् अधिका** - स्यात् **सदैव** - सर्वदा **स्वयं** - जनः **दुग्धवत्** - पयोवत् **अन्तः** - हृदयः **तप्यते** - तप्यति **एक** - एकः **एव** - च **न** - नो **जाते** - अपत्यं **जातं** - उत्पन्नं **संतानं** - पुत्रं **निहन्ति** - घातयन्ति एव।

**भावार्थः-** पञ्चमस्थाने भौमः चेत् उदराग्निः प्रबलो भवति । तदानीं पापे अपि अनल्पा मतिः स्यात्। स्वयं चान्तर्मनसि दुग्धवत् तप्यते । सदैव व्याकुलो भवति । एवं च पञ्चमस्थाने कुजो स्यात्तदा जातकस्य अपत्यानि नश्यन्ति ।

**न तिष्ठन्ति षष्ठेऽरयोऽङ्गारके वै तदङ्गेरिताः संगरे शक्तिमन्तः ।**

**मनीषी सुखी मातुलेयो न तद्वद्विलीयेत वित्तं लभेताऽपि भूरि ॥ ६ ॥**

**अन्वयः-** षष्ठे अङ्गारके (सति) शक्तिमन्तः (अपि) (तस्य) अरयः तंदगैरिताः संगरे न तिष्ठन्ति वै, (सः) मनीषी (स्यात्) तद्वत् (तस्य) मातुलेयः न सुखी (स्यात्) (तस्य) वित्तं विलीयेत अपि (पुनः) भूरि वित्तं लभेत ॥ ६ ॥

**व्याख्या-** **षष्ठे** – रिपुभवने **अङ्गारके** – भौमे (सति) **शक्तिमन्तः** – बलवन्त **अरयः** – शत्रवः (अपि) **तदङ्गेरिताः** – अमात्यादिभिः प्रोत्साहिताः **संगरे** – संग्रामे **न** – नो **तिष्ठन्ति** – स्थास्यन्ति **मनीषी** – बुद्धिमान् **तद्वत्** – तुल्यमेव फ़लं **मातुलेयः** – मातृभ्रातरः **न** – नो **सुखी** – सौख्यं **वित्तं** – धनं **विलीयेत** – नश्येत् **अपि** –पुनः **भूरि** – अनेकविधं **वित्तं** – धनं **लभेत** – प्राप्नुयात्।

**भावर्थः-** षष्ठमस्थाने भौमे स्थिते सति मानवः शक्तिमान् भवति । तथा च तस्य अमात्यादिभिः प्रोत्साहिताः शत्रवोऽपि संग्रामे न तिष्ठन्ति । तदुपरि योगेऽस्मिन् जातकः बुद्धिमान् सुखी मातुलसुखञ्च न लभते । किन्तु वित्ते नष्टे सति पुनः वित्तमवाप्रोति ।

**अनुद्धारभूतेन पाणिग्रहेण प्रयाणेन वाणिज्यतो नो निवृत्तिः ।**

**मुहुर्भंगदः स्पर्धिनां मेदिनीजः प्रहारार्दनैः सप्तमे दंपतिघ्नः ॥ ७ ॥**

**अन्वयः-** (यस्य जातकस्य) मेदिनीजः सप्तमे (स्थितः) (तदा) अनुद्धारभूतेन पाणिग्रहेण वाणिज्यतः प्रयाणेन निवृत्तिः न स्यात्, स्पर्धिनां मुहुर्भंगदः प्रहारार्दनैः स्यात्, दम्पतिघ्नः (च) स्यात् ।

**व्याख्या-** **(यस्य** – जातकस्य**) मेदिनीजः** – भौमः **सप्तमे** – सप्तमस्थाने सति **अनुद्धारभूतेन पाणिग्रहेण** – विवाहाभावात् सः विवाहार्थं **वाणिज्यतः** – वाणिज्यार्थं च (विदेशं) **प्रयाणेन** – यात्रया च **निवृत्तिः न** – पुनः आगमनं न भवति (वा विलंबेनागमनं भवति) **स्पर्धिनां** – स्पर्धकर्तृणां **प्रहारार्दनैः** – घातादिभिः **मुहुर्भंगदः** – पौनः पुन्येन (पराजितो) तथा **दंपतिघ्नः** – स्त्रीपुरुषयोर्द्वयोः परस्परं विनाशको भवति इत्यर्थः।

**भावार्थः-** यस्य सप्तमस्थाने मंगलस्य स्थितिर्भवति सः जनः विवादवशाद् शत्रुभिर्ताडनादिना पौनः पुन्येन पराजितो भवति तथा च तस्य स्त्रीपुरुषयोर्विनाशः (अर्थात् पुरुषस्य सप्तमे कुजः भार्यायाः कृते घातकः स्त्रीयाश्च सप्तमे कुजः भर्तृघ्नो भवति) जातकः विवाहार्थं वाणिज्यार्थं वा विदेशयात्रां करोति किन्तु द्वयोर्लाभानन्तरमपि बहुकालानन्तरं स्वदेशगमने समर्थो भवति । (अर्थात् बहुकालपर्यन्तं विदेशे एव तिष्ठति) ।

**शुभास्तस्य किं खेचराः कुर्युरन्ये विधानेऽपि चेदष्टमे भूमिसूनुः ।**

**सखा किं न शत्रूयते सत्कृतोऽपि प्रयत्ने कृते भूयते चोपसर्गः ॥ ८ ॥**

**अन्वयः-** भूमिसूनुः अष्टमे चेत् (तदा) विधाने अपि अन्ये शुभाः खेचराः तस्य किं कुर्युः, सत्कृतः अपि सखा किं न शत्रूयते, प्रयत्ने कृते च उपसर्गैः भूयते ।

**व्याख्या-** **भूमिसूनुः** – भौमः **अष्टमे** – निधने **चेत्** – भवेत् **विधाने** – भाग्ये **अपि** – च **अन्ये शुभाः** – अन्यशुभकर्तारः **खेचराः** – ग्रहाः **तस्य** – नरस्य **किं** – किम् **कुर्युः** – कुर्वन्ति **सत्कृतः** – मानितः **अपि** – च **सखा** – मित्रम् **किं न शत्रूयते** – शत्रुरिव आचरति **प्रयत्ने कृते** – यत्ने कृते सति **उपसर्गैः** – विघ्नैः **भूयते** – संभवति ।

**भावार्थः-** अष्टमे भौमे स्थिते सति तस्य भाग्ये अन्ये शुभाः ग्रहाः किं कुर्युः ? किमपि कर्तुं न प्रभवति । कारणं यत् कुजस्य दुष्टफलदत्वात् शुभाफलप्रतिबन्धकत्वात् च मानिति मित्रमपि शत्रुरिवाचरति । प्रयत्नेकृते (प्रारब्धकार्ये) अपि विघ्नानि आयान्त्येव ।

**महोग्रा मतिर्भाग्यवित्तं महोग्रं तपो भाग्यगो मंगलस्तं करोति ।**

**भवेन्नादिमः श्यालकः सोदरो वा कुतो विक्रमस्तुच्छलाभो विपाके ॥ ९ ॥**

**अन्वयः-** (यस्य) तपोभावगः, मंगलः (तस्य) महोग्रा मतिः (भवति) भाग्यगः मंगलः (तस्य) महोग्रं तपः (करोति) तं भाग्यवित्तं (च) करोति (तस्य) आदिमः श्यालकः वा न भवेत्, विक्रमः कुतः (स्यात्) विपाके (तस्य) तुच्छलाभः (स्यात्) ।

**व्याख्या-** **तपोभावगः** – नवमस्थाने **मंगलः** – भौमः **महोग्रा** – तीक्ष्णा **मतिः** – बुद्धि **महोग्रं** – अतिवोग्रम् **तपः**

– तपसा **भाग्यवित्तं** – भाग्यं धनं च **करोति** – विदधाति **आदिमः** – प्रथमः **श्यालकः** – वनिताभ्राता **सोदरः** – भ्राता **वा** – अथवा **न** – नो **भवेत्** – स्यात् **विक्रमः** – क्रियमाणः **कुतः** – कस्मात् **विपाके** – फलकाले **तुच्छलाभः** – स्वल्पो लाभः स्यादिति ।

**भावार्थः-** नवमभावस्थितो भौमः मानवं तीक्ष्णबुद्धिमान्, अतीवोग्रतपसा भाग्यं वित्तं च प्रददाति । तथा च तस्य अग्रजभ्राता श्यालको वा न भवति । तर्हि प्रभावस्तु कथं भवेत् तदुपरि फलप्राप्तिरपि स्वल्पा भवति ।

**कुले तस्य किं मंगलं मंगलो नो जनैर्भूयते मध्यभावे यदि स्यात् ।**

**स्वतः सिद्ध एवावतंसीयतेऽसौ वराकोऽपि कण्ठीरवः किं द्वितीयः ॥ १० ॥**

**अन्वयः-** यदि मंगलः मध्यभावे स्यात् (तदा) तस्य कुले किं मंगलं न (स्यात्) (सः) जनैः भूयते, (असौ) स्वतः सिद्ध एव अवतंसीयते, असौ वराकोऽपि किं द्वितीयः कण्ठीरवः ।

**व्याख्या-** **यदि** – यदा **मंगलः** – भौमः **मध्यभावे** – दशमस्थाने **स्यात्** – भवेत् **तस्य कुले** – तेषां कुले **किं मंगलं** – माङ्गलिकं **न** – नो **जनैः** – नरैः **भूयते** – भवति **स्वतः** – स्वयं **सिद्धम्** – कार्यं **एव** – च **अवतंसीयते** – लोकेषु मण्डलायते **असौ** – नरः **वराकोऽपि** – अवरोऽपि **किं** – किम् **द्वितीयः** – अन्यः (शोचनीयः) **कण्ठीरवः** – सिंहः इति ।

**भावार्थः-** यदि दशमस्थाने नो मंगलः तस्य कुले किमपि मंगलं न स्यात् । सः जनः स्वतः सिद्धपुरुषामिव लोकेषु स्वख्यातिवर्द्धनाय यतते । तथा च सः वराकोऽपि किं द्वितीयः सिंहो भवति ।

**कुजः पीडयेल्लाभगोऽपत्यशत्रून्भवेत्संमुखो दुर्मुखोऽपि प्रतापात् ।**

**धनं वर्द्धते गोधनैर्वाहनैर्वा सकृच्छून्यतार्थे च पैशून्यभावात् ॥ ११ ॥**

**अन्वयः-** लाभगः कुजः अपत्यशत्रून् पीडयेत्, दुर्मुखः अपि प्रतापात् सम्मुखो भवेत् । (तस्य) धनं गोधनैः वाहनैः वा वर्द्धते, पैशून्यभावात् अर्थे सकृत् शून्यतां च स्यात् ।

**व्याख्या-** **लाभगः** – एकादशस्थाने **कुजः** – भौमः **अपत्यशत्रून्** – अपत्यान् शत्रून् **पीडयेत्** – पीडां करोति **दुर्मुखः** – मूर्खः **अपि** – च **प्रतापात्** – तेजसः अधिकत्वात् **सम्मुखो** – पुरतः **भवेत्** – स्यात् **धनं** – वित्तं **गोधनैः** – गोऽश्वादिभिः **वाहनैः** – यानैः **वा** – अथवा **वर्द्धते** –वर्धयति **पैशून्यभावात्** – पशुवत् व्यवहरेत्तदा **अर्थे** – धनार्थे **सकृत्** – एकवारं **शून्यतां** – शून्यत्वम् **च स्यात्** – भवेत् ।

**भावार्थः-** लाभस्थाने कुजे सति जनः स्वपत्यान् शत्रून् च घ्नन्ति (पीडयन्ति वा) । तथा च स्वप्रभावात् सम्मुखो भवेत्तदा गोधनैः अथवा यानैश्च स्वं धनं वर्धयति । किन्तु पैशून्यम् (पशुवत् व्यवहारेत्तदा) स्वे धने शून्यत्वम् अवाप्नोति ।

**शताक्षोपि तत्सक्षतो लौहघातैः कुजो द्वादशोऽर्थस्य नाशं करोति ।**

**मृषा किंवदन्ती भयं दस्युतो वा कलिं पारधीहेतुदुःखं विचिन्त्यम् ॥ १२ ॥**

**अन्वयः-** द्वादशः कुजः अर्थस्य नाशं करोति, अपि शताक्षः लोहघातैः सक्षतः (स्यात्) (येन) मृषा किंवदन्ती, दस्युतः भयं, कलिः वा (भवति) तस्य पारधीहेतु–दुःखं विचिन्त्यम् ।

**व्याख्या-** **द्वादशः** – द्वादशस्थाने **कुजः** – भौमः **अर्थस्य** – धनस्य **नाशं** – नष्टं **करोति** – भवति **अपि** – तथा **शताक्षः** – इन्द्रः **लोहघातैः** – शस्त्रप्रहारैः **सक्षतः** – व्रणं **मृषा** – मिथ्या **किंवदन्ती** – जनश्रुतिः **दस्युतः** – चौरात् **भयं** – भीतिः **कलिः** – कलहः **वा** – अथवा **पारधीहेतुः** – भृत्यजनितः **दुःखं** – कष्टं **विचिन्त्यम्** – विचारणीयम् ।

**भावर्थः-** व्ययस्थाने भौमः द्रव्यस्य नाशं करोति । तथा इन्द्रः लोहघातैः व्रणं करोति । अपि च तस्य मिथ्या जनश्रुतिः, चौराद् भयं, परस्परकलहः तथा च भृत्याः तस्य दुःखस्य कारणानि भवन्ति ।

## 2. तन्वादिभावस्थ-बुधफलानि

**बुधो मूर्तिगो मार्जयेदन्यरिष्टं वरिष्ठा धियो वैखरीवृत्तिभाजः ।**

**जना दिव्यचामीकरीभूतदेहाश्चिकित्साविदो दुश्चिकित्स्या भवन्ति ॥ १ ॥**

**अन्वयः-** मूर्तिगः बुधः अन्यरिष्टं मार्जयेत्, (ते) जनाः वरिष्ठधिया वैखरीवृत्तिभाजः दिव्यचामीकरी भूतदेहाः (स्युः) (स्वयं) चिकित्साविदः (कृते अपि) दुश्चिकित्स्या भवन्ति ।

**व्याख्या-** **मूर्तिगः** - लग्नस्थः **बुधः** - ज्ञः **अन्यरिष्टं** - अन्यग्रहजनितं दोषं **मार्जयेत्** - नाशयेत् **जनाः** - मनुष्याः **वरिष्ठाधिया** - श्रेष्ठाःधियः **वैखरीवृत्तिभाजः** - लेखनव्यवहारेण जीवननिर्वाहकाः (लेखकाः) **दिव्यचामीकरी** - कान्तियुक्तः **भूतदेहाः** - उत्तमशरीरयुक्ताः **चिकित्साविदः** - भिषक् विद्याकुशलाः (वैद्याः) **दुश्चिकित्स्याः** - स्वस्यरोगिनदाने दुःसाध्याः **भवन्ति** - जायन्ते ।

**भावार्थः-** येषां मनुष्याणां लग्नस्थाने बुधः भवेत् तेषां अन्यग्रहजनिताः दोषाः नष्टाः भवन्ति । ते जनाः उत्तमबुद्धिवन्तः भवन्ति । तथा सुवर्णवत् आकृतिवन्तः तथा पुस्तकादिलेखनेन आजीविका-निर्वाहकाः भवन्ति । ते भिषग्विद्यायां निपुणाः भवन्ति, किन्तु यदि स्वयं रोगाग्रस्ताः भवेयुः तदा तेषां चिकित्सा दुःसाध्याः भवति ।

**धने बुद्धिमान्बोधने बाहुतेजाः सभासंगतो भासते व्यास एव ।**

**पृथूदारता कल्पवृक्षस्य तद्वद्बुधैर्भण्यते भोगतः षट्पदोऽयम् ॥ २ ॥**

**अन्वय :-** धने बोधने (सति) (जनः) बुद्धिमान् बाहुतेजाः (जायते) सभासंगतः (सः) व्यास एव भासते । कल्पवृक्षस्य तद्वद् पृथूदारता (अपि) अयं भोगतः षट्पदः बुधैः भण्यते ।

**व्याख्या-** **धने** - द्वितीयस्थाने **बोधने** - बुधे **बुद्धिमान्** - मेधावान् **बाहुतेजाः** - भुजप्रतापवान् **सभासंगतः** - विद्वत्समाजे **व्यास एव** - व्यासवत् **भासते** - द्योतते **कल्पवृक्षस्य तद्वद्** - देवतरुवत् **पृथूदारता** - औदार्यगुणयुक्तः **अयं** - मनुष्यः **भोगतः षट्पदः** - भ्रमरवत् (इव) सर्वभोगरसग्राही **बुधैः** - पण्ड्तैः **भण्यते** - वर्ण्यते ।

**भावार्थः-** यस्य मनुष्यस्य द्वितीयस्थाने बुधः भवेत् सः नरः ज्ञानवान्, भुजप्रतापवान् भवति । सः विद्वत्समाजे व्यासवत् शोभते । एवं देवतरुवत् औदार्यगुणयुक्तो भवति । अयं मनुष्यः भ्रमरवत् सर्वभोगरसग्राही भवति इति पण्डितैः वर्ण्यते ।

**वणिङ्मित्रतापण्यकृद्वृत्तिशीलो वशित्त्वं धियो दुर्वशानामुपैति ।**

**विनीतोऽतिभोगं भजेत्संन्यसेद्वातृतीयेऽनुजैराश्रितो ज्ञे लतावान् ॥ ३ ॥**

**अन्वयः-** ज्ञे तृतीये वणिङ् मित्रतापण्यकृद्वृत्तिशीलः विनीतः (जायते (सः) दुर्वशानां धियः वशित्वम् उपैति, (सः) अतिभोगं भजेत् वा संन्यसेत्, लतावान् (इव) अनुजैः आश्रितः (भवति) ।

**व्याख्या-** **ज्ञे** - बुधे **तृतीये** - तृतीयस्थाने **वणिङ्** - आपणिकः **मित्रता** - मैत्री **पण्यकृद्वृत्तिशीलः** - क्रयविक्रयकृत् व्यवहारशीलः **विनीतः** -शीलवान् **दुर्वशानां** - दुष्टानां **धियः** - बुद्ध्यः **वशीत्वं** - वशकारित्वं **उपैति** - करोति **अतिभोगं** - बहुविषयानुभवं **भजेत्** - भुज्यात् **संन्यसेत्** - विषयान् त्यजेत् **लतावान्** - वल्लीयुक्तः **अनुजैः** - भातृभिः **आश्रितः** - आश्रययुक्तः जायते ।

**भावार्थः-** यस्य नरस्य तृतीयस्थाने बुधः भवेत् सः नरः व्यापारीजनस्य मित्रतया पण्यकृद् वृतिशीलः भवति । सः शीलवान् तथा दुष्टानां दुर्बुद्धिं वशं करोति । सः बहुविषयानुभवं भुज्यात् अथवा विषयान् त्यजेत् अर्थात् सः विषयभोगी अथवा संन्यासी भवति । सः भ्रातृभिः लता इव आश्रितो भवति ।

**चतुर्थे चरेच्चन्द्रजश्चारुमित्रो विशेषाधिकृद् भूमिनाथो गणस्य ।**

**भवेल्लेखको लिख्यते वा तदुक्तं तदाशापरैः पैतृकं नो धनं च ॥ ४ ॥**

**अन्वयः-** (यदि) चन्द्रजः चतुर्थे चरेत् (तदा) (सः) चारुमित्रः भवेत्, विशेषाधिकृत् (भवेत्) गणस्य भूमिनाथः लेखकः (भवेत्) वा तदुक्तं तदाशापरैः लिख्यते, पैतृकं धनं च नो (भवेत्) ।

**व्याख्या-** **चन्द्रजः** - बुधः **चतुर्थे** - चतुर्थस्थाने **चरेत्** - गच्छेत् **चारुमित्रः** - सुमित्रः **भवेत्** - स्यात् **विशेषाधिकृत्** - विशेषाधिकारियुक्त (प्रधानः) **गणस्य** - समूहस्य **भूमिनाथः** - राजा (गणाध्यक्षः) **लेखकः** - लिपिकरः **वा** - अथवा **तदुक्तं** - तद्भाषितं **तदाशापरैः** - तदाश्रितान्यलेखाधिकारिभिः, **लिख्यते** - लेखनं क्रियते **पैतृकं धनं** - पित्रोपार्जितं द्रव्यं **च** - तथा **नो** - न ।

**भावार्थः-** यस्य मनुष्यस्य चतुर्थस्थाने बुधः भवेत् सः नरः चारुमित्रयुक्तः भवति । सः प्रधानः उतवा गणाध्यक्षो भवति । सः लिपिकरः अथवा तन्मुखनिर्गतं तदाश्रितान्यलेखाधिकारिभिः अनुलिख्यते । सः पित्रोपार्जित-धनं न प्राप्नोति ।

**वयस्यादिमे पुत्रगर्भो न तिष्ठेद्भवेत्तस्य मेधाऽर्थसंपादयित्री ।**

**बुधैर्भण्यते पञ्चमे रौहिणेये कियद्विध्यते कैतवस्याभिचारम् ॥ ५ ॥**

**अन्वयः-** रौहिणेये पञ्चमे (स्थिते) (सति) आदिमे वयसि पुत्रगर्भो न तिष्ठेत्, तस्य मेधा अर्थसंपादयित्री (भवेत्) कैतवस्य अभिचारं कियद् विद्यते ।

**व्याख्या-** **रौहिणेये** - बुधे **पञ्चमे** - पञ्चमस्थाने **आदिमे** - प्रथमे **वयसि** - अवस्थायां **पुत्रगर्भो** - सुतगर्भः **न** - नो **तिष्ठेत्** - उपतिष्ठेत् **तस्य** - नरस्य **मेधा** - बुद्धिः **अर्थसंपादयित्री** - द्रव्यार्जने चतुरा **कैतवस्य** - कपटस्य **अभिचारं** - मारणोच्चाटनादिकं **कियद्** - परिमितं **विद्यते** - वर्तते ।

**भावार्थः-** यस्य मनुष्यस्य पञ्चमस्थाने बुधः भवेत् सः नरः प्रथमे वयसि पुत्रवान् न भवति । तस्य बुद्धिः द्रव्यार्जने चतुरा भवति । तथा सः नरः मारणोच्चाटनादिकं (छलकपटज्ञो) भवति ।

**विरोधो जनानां निरोधो रिपूणां प्रबोधो यतीनां च रोधोऽनिलानाम् ।**

**बुधे सद्भये व्यावहारो निधीनां बलादर्थकृत्संभवेच्छत्रुभावे ॥ ६ ॥**

**अन्वयः-** बुधे शत्रुभावे (स्थिते) जनानां विरोधः, रिपूणां निरोधः, यतीनां प्रबोधः, अनिलानां रोधः, सद्भये निधीनां व्यावहारः, बलात् अर्थकृत् संभवेत् ।

**व्याख्या-** **बुधे** - सौम्ये **शत्रुभावे** - षष्ठे स्थाने **जनानां** - मनुष्याणां **विरोधः** - वैरः **रिपूणां** - शत्रूणां **निरोधः** - अवरोधः **यतीनां** - संन्यासिनां **प्रबोधः** - ज्ञानं संभवेत् **अनिलानां** - वायूनां **रोधः** - अवरोधः **सद्भये** - सन्मार्गे **निधीनां** - द्रव्याकराणां **व्यवहारः** - व्यवहारं करोति **बलात्** - सामर्थ्यात् **अर्थकृत्** - द्रव्योपार्जकः **संभवेत्** - जायेत ।

**भावार्थः-** यस्य षष्ठेस्थाने बुधः भवेत् सः नरः जनैः सह वैरं विदधाति । शत्रून् अवरुणद्धिः । संन्यासिनः सकाशात् ज्ञानार्जनं करोति । अस्मै वायुरोगः उदररोगो वा संभवेत् । अस्य नरस्य धनकोशस्य उपयोगः सन्मार्गे भवति । तथा सः स्वसामर्थ्यात् द्रव्यं अर्जयति ।

**सुतः शीतगोः सप्तमे शं युवत्या विधत्ते तथा तुच्छवीर्यं च भोगे ।**

**अनस्तंगतो हेमवद्देहशोभां न शक्नोति तत्संपदो वानुकर्तुम् ॥ ७ ॥**

**अन्वयः-** अनस्तंगतः शीतगोः सुतः सप्तमे (स्थिते) युवत्याः शं विधत्ते तथा भोगे तुच्छवीर्यं (भवति), हेमवत् देहशोभां च (करोति) तत्संपदः वा अनुकर्तुं (कश्चित्) न शक्नोति ।

**व्याख्या-** **अनस्तंगतः** - उदितः **शीतगोः** - चन्द्रस्य **सुतः** - पुत्रः **सप्तमे** - सप्तमस्थाने **युवत्याः** - स्त्रियः **शं** - सुखं **विधत्ते** - विदधाति **तथा** - च **भोगे** - रतिसुखे **तुच्छवीर्यं** - शून्यवीर्यं **हेमवत्** - सुवर्णवत् **देहशोभां** - शरीरशोभां **च** - तथा **तत्संपदः** - तस्य श्रियः **वा** - अथवा **अनुकर्तुं** - अनुविधातुं **न शक्नोति** - न समर्थो भवेत् ।

**भावार्थः-** यस्य मानवस्य सप्तमस्थाने अनस्तंगतः बुधः भवेत् तस्मै स्त्रीसुखं मिलति । किन्तु रतिसमये तस्य वीर्यं निर्बलं भवति । तस्य देहशोभा सुवर्णतुल्या भवति । तथा तस्य लक्ष्म्याः तुलनायां जनाः अन्याः असमर्थाः भवन्ति । अर्थात् सः अति धनवान् भवति इति ।

**शतं जीविनो रन्ध्रगे राजपुत्रे भवन्तीह देशान्तरे विश्रुतास्ते ।**

**निधानं नृपाद्विक्रयाद्वा लभन्ते युवत्युद्भवं क्रीडनं प्रीतिमन्तः ॥ ८ ॥**

**अन्वयः-** रन्ध्रगे राजपुत्रे (सति) शतंजीविनः (तथा) इह देशान्तरे (च) विश्रुताः भवन्ति, ते प्रीतिमन्तः नृपात् वा विक्रयात् निधानं लभन्ते, युवत्युद्भवं क्रीडनं (लभन्ते) ।

**व्याख्या-** **रन्ध्रगे** - अष्टमे **राजपुत्रे** - चन्द्रसुते **शतंजीविनः** - शतायुषः **इह** - अस्मिन् (स्वदेशे) **देशान्तरे** - विदेशे **विश्रुताः** - प्रसिद्धाः **भवन्ति** - जायन्ते **प्रीतिमन्तः** - प्रेमयुक्ता आसन् **नृपात्** - नरेशात् **वा** - अथवा **विक्रयात्** - व्यापारात् **निधानं** - द्रव्यसञ्चयं **लभन्ते** - प्राप्नुवन्ति **युवत्युद्भवं क्रीडनं** - स्त्रीकेली-क्रीडनम् ।

**भावार्थः-** येषां जन्म-लग्नात् अष्टमस्थाने बुधः भवेत् ते शतायुः अर्थात् दीर्घायुः भवन्ति । स्वदेशे विदेशे च ते विख्याताः भवन्ति । सः प्रसन्नचित्तः सन् नृपसकाशात् अथवा व्यापारात् प्रचुरं धनं प्राप्नोति । तथा स्त्रीसुखमपि लभते ।

**बुधे धर्मगे धर्मशीलोऽतिधीमान्भवेद्दीक्षितः स्वर्धुनीस्नातको वा ।**

**कुलोद्योतकृद्भानुवद्भूमिपालात् प्रतापाधिको बाधको दुर्मुखानाम् ॥ ९ ॥**

**अन्वयः-** बुधे धर्मगे धर्मशीलः, अतिधीमान्, दीक्षितः वा स्वर्धुनीस्नातकः भवेत् । भानुवत् कुलोद्योतकृत्, भूमिपालात् प्रतापाधिकः दुर्मुखानां बाधकः (भवति) ।

**व्याख्या-** **बुधे** - सोम्ये **धर्मगे** - नवमस्थाने **धर्मशीलः** - धर्मात्मा **अतिधीमान्** - अतिबुद्धिमान् **दीक्षितः** - सोमपानविशिष्टयागकर्ता **वा** - अथवा **स्वर्धुनीस्नातकः** - गङ्गास्नानव्रती **भवेत्** - स्यात् **भानुवत्** - सूर्यवत् **कुलोद्योतकृत्** - कुलप्रकाशकः **भूमिपालात्** - नृपात् **प्रतापाधिकात्** - प्रभावाधिकात् **दुर्मुखानां** - दुष्टानां **बाधकः** - अवरोधकः ।

**भावार्थः-** यस्य मनुष्यस्य नवमभावे बुधः भवेत् सः धर्मात्मा, बुद्धिमान्, सोमयागपान कर्ता अथवा गङ्गास्नानव्रती तथा भानुवत् कुलोद्योतकृत् भवति । सः नृपात् अपि अधिकः प्रतापी भवति । अतः दृष्टानां कृते बाधको भवति ।

**मितं संवदेन्नो मितं संलभेत प्रसादादिवैकारिसौराजवृत्तिः ।**

**बुधे कर्मगे पूजनीयो विशेषात्पितुः संपदो नीतिदण्डाधिकारात् ॥ १० ॥**

**अन्वयः-** बुधे कर्मगे (सति) (सः) पितुः संपदः नीतिदण्डाधिकारात् (च) विशेषात् पूजनीयः (स्यात्) (सः) प्रसादादिवैकारि सौराजवृत्तिः (स्यात्) (सः) मितं संवदेत्, नो मितं संलभेत (अपितु विशिष्टं लभेत)।

**व्याख्या-** **बुधे** - सौम्ये **कर्मगे** - दशमस्थाने **पितुः संपदः** - जनकस्य धनं (पैतृकात् धनात्) **नीतिदण्डाधिकारात्** - राजकीयाधिकारात् **विशेषात्** - वैशिष्ट्यात् **पूजनीयः** - लोकमान्यः **प्रसादादिवैकारि** - ग्रहानुग्रहवती **सौराजवृत्तिः** - शुभराज्यत्वे **मितं संवदेत्** - मितभाषी स्यात् **नो** - न **मितं** - स्वल्पं **संलभेत** - प्राप्नुयात्।

**भावार्थः-** यस्य जन्म लग्नात् दशमस्थाने बुधः भवते सः पैतृकं धनं प्राप्नोति । तथा नीतिदण्डाधिकारात् (नृपवत्) क्षमा तथा दण्डप्रदानकर्ता भवति । अतः सः लोकमान्यो भवति । सः मितभाषी भवति । किन्तु तस्य ऐश्वर्यं स्वल्पं न भवति । अर्थात् सः ऐश्वर्यवान् धनवान् च भवति ।

**विना लाभभावे स्थितं भेशजातं न लाभो न लावण्यमानृण्यमस्ति ।**

**कुतः कन्यकोद्वाहदानं च देयं कथं भूसुरास्त्यक्त-तृष्णा भवन्ति ॥ ११ ॥**

**अन्वयः-** भेशजातं लाभभावे स्थितं विना न लाभः, न लावण्यं आनृण्यं च अस्ति । (तस्य) कन्यकोद्वाहदानं देयं कुतः (स्यात्) (तेन) भूसुराः त्यक्ततृष्णा कथं भवन्ति ।

**व्याख्या-** **भेशजातं** - बुधः **लाभभावे स्थितं** - एकादशभावे **विना** - रहितं **न लाभः** -न द्रव्यलाभः **न लावण्यं** - न सौन्दर्यं **आनृण्यं** - ऋणराहित्यं **च** - तथा **अस्ति** - वर्तते **कन्यकोद्वाहदानं** - पुत्र्याः विवाहदानं **देयं** - दातुं योग्यं (द्रव्यं) **कुतः** - कथं स्यात् **भूसुराः** - विप्राः **त्यक्ततृष्णा** - तृष्णारहिताः (असंतुष्टाः) **कथं** - कया रीत्या **भवन्ति** - जायन्ते ।

**भावार्थः-** यस्य एकादशस्थाने बुधः न स्यात् तस्मै द्रव्यलाभं, सौन्दर्यं, ऋणराहित्यं च कथं भवेत् ? तस्य पुत्र्याः विवाहकरणसामर्थ्ये दातुं योग्यं द्रव्यं कथं स्यात् ? विप्राः तस्मात् संतुष्टाः कथं भवेयुः ?

**न चेद्वादशे यस्य शीतांशुजातः कथं तद्गृहं भूमिदेवा भजन्ति ।**

**रणे वैरिणो भीतिमायान्ति कस्माद्धिरण्यादिकोशं शठः कोऽनुभूयात् ॥ १२ ॥**

**अन्वयः-** शीतांशुजातः यस्य द्वादशे न चेद् तद्गृहे भूमिदेवाः कथं भजन्ति । वैरिणः कस्मात् भीतिम् आयान्ति, कः शठः हिरण्यादिकोशम् अनुभूयात् ।

**व्याख्या-** **शीतांशुजातः** - बुधः **यस्य** - नरस्य **द्वादशे** - द्वादशस्थाने **न चेद्** - नोचेत् **तद्गृहं** - तस्य गृहं **भूमिदेवाः** - ब्राह्मणाः **कथं भजन्ति** - कथं समागच्छन्ति **वैरिणः** - शत्रवः **कस्मात्** - कारणात् **भीतिम्** - भयं **आयान्ति** - प्राप्नुवन्ति **कः शठः** - धूर्तः **हिरण्यादिकोशम्** - द्रव्यकोशं **अनुभूयात्** - उपभोगं कुर्यात् ।

**भावार्थः-** यस्य द्वादशस्थाने बुधः न स्यात् तस्यगृहे ब्राह्मणाः कथं समागच्छेयुः रणे शत्रवः कस्मात् भयं प्राप्नुयुः । कः धूर्तः अस्य द्रव्यकोशस्य उपभोगं करिष्यति । अपि तु बुधे व्यये सति उक्तफलं मिलति ।

## स्वाध्यायः

**१. अधस्तनेषु प्रश्नेषु योग्यमुत्तरं चित्वा लिखत ।**

(१) कुजे लग्ने सति कस्य भीतिः स्यात् ?

(क) अग्नेः (ख) नृपस्य (ग) शत्रोः (घ) भ्रातुः

(२) पञ्चमस्थानस्थितः भौमः किं प्रबलं कुरुते ?

(क) लाभम् (ख) ज्ञानम् (ग) पराक्रमम् (घ) जठराग्निम्

(३) षष्ठस्थः भौमः किं ददाति ?

(क) भाग्यम् (ख) शक्तिम् (ग) शत्रुपीडाम् (घ) दौर्भाग्यम्

(४) अष्टमस्थानस्थितः भौमः किं यच्छति ?

(क) कुभाग्यम् (ख) सन्तापम् (ग) दुःखम् (घ) सुखम्

(५) लाभस्थाने विद्यमानः भौमः किं ददाति ?

(क) पुत्रसुखम् (ख) स्त्रीसुखम् (ग) धनसुखम् (घ) वाहनसुखम्

(६) लग्ने स्थितः बुधः कस्य नाशं करोति ?

(क) अरिष्टस्य (ख) स्वस्य (ग) पुत्रस्य (घ) कुटुम्बस्य

(७) बुधः चतुर्थे किं ददाति ?

(क) व्ययम् (ख) रोगम् (ग) चारुमित्रम् (घ) कुटुम्बम्

(८) तारातनये पञ्चमे जाते प्रथमगर्भे किं भविष्यति ?

(क) एका बालिका (ख) एकः बालकः (ग) युग्मबालकौ (घ) पुत्राहित्यम्

(९) धर्मगः बुधः किं ददाति ?

(क) धर्महीनताम् (ख) धार्मिकताम् (ग) धर्मसुखम् (घ) धर्मनाशम्

(१०) बुधः व्ययभावे कस्य व्ययं करोति ?

(क) शत्रूणाम् (ख) स्त्रीणाम् (ग) स्वस्य (घ) कुटुम्बस्य

**२. एकैकवाक्येनोत्तराणि लिखन्तु ।**

(१) मङ्गलः धनहानिं कदा करोति ?

(२) दण्डलोहाग्निभीतिः कदा जायते ?

(३) नरः उपहासयोग्यो कदा भवति ?

(४) भूमिपालात् किं प्राप्नोति ?

(५) अन्यग्रहजनितं दोषं कः मार्जयति ?

(६) कदा पुत्रगर्भो न तिष्ठेत् ?

(७) मनुष्यः कदा दीर्घायुः भवति ?

**३. श्लोकपूर्तिं कृत्वा भावार्थो लेख्यः ।**

(१) कुतो बाहुवीर्यं ........................,. कथं स्यात् ॥

(२) महोग्रा ........................,. विपाके ॥

(३) बुधो मूर्तिगो ........................,. भवन्ति ॥

(४) मितं ........................,. नीतिदण्डाधिकारात् ॥

**४. अ-विभागेन सह ब-विभागेन सह सुयोजयतु ।**

| अ | ब |
|---|---|
| (१) अरिष्टं मार्जनम् | (१) विलग्ने कुजे |
| (२) चारुमित्रम् | (२) षष्ठे अंगारके |
| (३) अतिधीमान् | (३) पञ्चमे कुजे |
| (४) जाठराग्निः बलवर्द्धनम् | (४) लग्नस्थः बुधः |
| (५) शक्तिमन्तम् | (५) चतुर्थस्थाने बुधः |
| (६) दण्डलोहाग्निभीतिम् | (६) रौहिणेये नवमे |

५. **टिप्पणी लेख्या ।**

(१) मातृस्थाने भौमफलम्

(२) पञ्चमस्थाने बुधफलम्

(३) कर्मस्थाने बुधफलम्

(४) व्ययस्थाने भोमफलम्

६. **विस्तरेणोत्तराणि लिखत ।**

(१) प्रथमभावस्थं भौमफलं यथा ग्रन्थोक्तदिशा कुरुत ।

(२) अष्टमभावस्थितभौमफलं देवगिरायां लिखत ।

(३) चतुर्थभावे बुधफल-वर्णनं विधेयम् ।

(४) दशमस्थानस्थितं बुधफलं चर्चयत ।

(५) तृतीयस्थाने भौमफलं विस्तारेण लिखत ।

**अध्यापकानां कृते**

- माङ्गलिकदोषयुक्तजनानां कुण्डल्याः प्रत्यक्षदर्शनेन ज्ञानं प्रदेयम् ।

**छात्राणां प्रवृत्ति**

- पराक्रमार्थम् एवं च व्यापारार्थं भौमबुधयोः विशेषतया चिन्तनं करणीयम् ।

# ८ तन्वादिद्वादशभावस्थ गुरुशुक्रयोः फलानि

## प्रास्ताविकम्

वयम् अन्तरिक्षे दृश्यमानपदार्थानां विषये पूर्वं ज्ञातवन्तः । रात्रौ गगने विविधप्रकारस्य तारकाणाम् आस्तरणं आस्तरितमिव दृश्यते । सम्पूर्णव्योममण्डलं तारकाच्छादितं दृश्यते इति । व्योम्नि दृश्यमाण पृथ्विकेन्द्रित-अनन्तशक्तियुक्तम् एनं काल्पनिकगोलाकारं वयं गगनाच्छादित आस्तरणत्वेन विद्मः प्रकरणेऽस्मिन् गगनस्थ-गुरुशुक्रयोः फलविषयकं अभ्यासं करिष्यामः ।

## 1. तन्वादिद्वादशभावस्थ-गुरुफलानि

**गुरुत्वं गुणैर्लग्नगे देवपूज्ये सुवेषी सुखी दिव्यदेहोऽल्पवीर्यः ।**

**गतिर्भाविनी पारलोकी विचिन्त्या वसूनि व्ययं संबलेन व्रजन्ति ॥ १ ॥**

**अन्वयः-** देवपूज्य लग्नगे गुणैः गुरुत्वं (भवेत्) (सः) सुवेषी सुखी दिव्यदेहः, अल्पवीर्यः (च (स्यात्) (तस्य) भाविनी पारलोकी गतिः विचिन्त्या, वसूनि संबलेन व्ययं व्रजन्ति ।

**व्याख्या-** **देवपूज्ये** - गुरौ **लग्नगे** - लग्नस्थाने **गुणैः** - गुणद्वारा **गुरुत्वं** - बहुमान्यत्वं **सुवेषी** - सुवस्त्रालंकारेण शोभाढ्यः **सुखी** - विषादरहितः **दिव्यदेहः** -सुन्दरशरीरम् **अल्पवीर्यः** - अल्पबलः **भाविनी** - भविष्यति **पारलोकी गतिः** - स्वर्गवासरूपा अवनि **विचिन्त्या** - चिन्तनीया **वसूनि** - धनानि **संबलेन** - स्वस्य बलेन (उपभोगेन) **व्ययं** - नाशं **व्रजन्ति** - गच्छन्ति ।

**भावार्थः-** यस्य जातकस्य लग्नस्थाने बृहस्पतिः भवेत् सः नरः गुणैः गुरुत्वं प्राप्नोति (अर्थात् लोकमान्यो भवति)। सुन्दरवस्त्रैः आभूषणैः च भूषितः तथा सुखी भवति तस्य शरीरं सुन्दरं भवति । तथा अल्पवीर्यो भवति। मरणान्तरं सः शुभगतिं प्राप्नोति । तथा तस्य धनस्य व्ययः उपभोगेन भवति ।

**कवित्वे मतिर्दण्डनेतृत्वशक्तिर्मुखेदोषधृक् शीघ्रभोगार्त एव ।**

**कुटुम्बे गुरौ कष्टतो द्रव्यलब्धिः सदा नो धनं विश्रमेद्यत्नतोऽपि ॥ २ ॥**

**अन्वयः-** गुरौ कुटुम्बे (स्थिते) कवित्वे मतिः, दण्डनेतृत्वशक्तिः, मुखे दोषधृक्, शीघ्रभोगार्त एव (स्यात्) (तस्य) कष्टतः द्रव्यलब्धिः (स्यात्) सदा यत्नतः अपि धनं नो विश्रमेत् ।

**व्याख्या-** **गुरौ** - बृहस्पतौ **कुटुम्बे** - द्वितीयस्थाने **कवित्वे मतिः** - काव्यकरणे बुद्धिः **दण्डनेतृत्वशक्तिः** - नृपाधिकारः (सामर्थ्यात्) **मुखे** - आनने **दोषधृक्** - दोषयुक्तः **शीघ्रभोगार्त** - अल्पवीर्यवान् **कष्टतः** - प्रयासेन **द्रव्यलब्धिः** - धनार्जनः **सदा** - सर्वदा **यत्नतः** - प्रयत्नेन **अपि** - च **धनं** - वित्तं **नो न विश्रमेत्** - संस्थापितं स्यात्।

**भावार्थः-** यस्य जातकस्य द्वितीयभावे बृहस्पतिः भवेत् सः नरः कविः भवति । तथा राजप्रबन्धं कर्तुं सामर्थ्यवान् भवति । तस्य मुखं रोगग्रस्तं भवति । सः अल्पवीर्यवान् तथा कष्टेन धनार्जनं करोति । किन्तु यत्नेनाऽपि सर्वदा धन-रहितो भवति ।

**भवेद्यस्य दुश्चिक्यगो देवमन्त्रीलघूनां लघीयान् सुखं सोदराणाम् ।**

**कृतघ्नो भवेन्मित्रसार्थे न मैत्रीललाटोदयेऽप्यर्थलाभो न तद्वत् ॥ ३ ॥**

**अन्वयः-** यस्य देवमन्त्री दुश्चिक्यगः भवेत् (सः) लघूनां लघीयान् (स्यात्) (तस्य) सोदराणां सुखं (भवेत्) (सः) कृतघ्नः (स्यात्) (तस्य) मित्रसार्थे मैत्री न (स्यात्) ललाटोदये अपि तद्वत् (तस्य) अर्थलाभः न (भवेत्) ।

**व्याख्या-** **यस्य** - नरस्य **देवमन्त्री** - गुरुः **दुश्चिक्यगः** - तृतीयस्थः **भवेत्** - संभवेत् **लघूनां** - क्षुद्राणां **लघीयान्** - अतिक्षुद्रः **सोदराणां** - भ्रातृणां **सुखं** - सौख्यं **कृतघ्नः** - कृतहन्ता **मित्रसार्थे** - सखिभिः सह **मैत्री** - मित्रता **न** - न स्यात् **ललाटोदये** - भाग्योदयेन **अपि** - तथा **तद्वत्** - भाग्योदयवत् **अर्थलाभः** - धनलाभः **न** - नो भवेत् ।

**भावार्थः-** यस्य नरस्य तृतीयस्थाने गुरुः भवेत् सः नरः क्षुद्राणामपि अतिक्षुद्रः भवति । सः सहोदरैः सुखं विन्दति। सः कृतज्ञः भवति । सः मित्रता रहितो भवति । भाग्योदयादपि यथार्थं सः द्रव्यलाभं न प्राप्नोति अर्थात् सदैव धन रहितो भवति ।

**गृहद्वारतः श्रूयते वाजिह्रेषाद्विजोच्चारितो वेदघोषोऽपि तद्वत् ।**

**प्रतिस्पर्द्धिनः कुर्वते पारिचार्य्यं चतुर्थे गुरौ तप्तमन्तर्गतं च ॥ ४ ॥**

**अन्वयः-** चतुर्थे गुरौ गृहद्वारतः वाजिह्रेषा, तद्वत् द्विजोच्चारितो वेदघोषः अपि श्रूयते । प्रतिस्पर्द्धिनः (तस्य) पारिचार्य्यं कुर्वते (तथापि) अन्तर्गतं च तप्तं भवति ।

**व्याख्या-** **चतुर्थे** - चतुर्थभावे **गुरौ** - इज्ये **गृहद्वारतः** - सदनद्वारतः **वाजिह्रेषा** - अश्वानां कण्ठात् (विनिर्गत शब्दः) **तद्वत्** - तथैव **द्विजोच्चारितः** - विप्रोच्चारितः **वेदघोषः** - मन्त्रध्वनिः **अपि** - च **श्रूयते** - श्रवणं क्रीयते **प्रतिस्पर्द्धिनः** - शत्रवः **पारिचार्य्यं** - सेवार्थं **(सेवायं) कुर्वते** - करोति **अन्तर्गतं** - अन्तः करणं **च** - तथा **तप्तं** - सन्तप्तं (सन्तापं) **भवति** - स्यात् ।

**भावार्थः-** यस्य नरस्य चतुर्थस्थाने गुरुः भवेत् तस्य गृहद्वारात् अश्वानां शब्दः तथा वेदघोषः श्रूयते । शत्रवः तस्य सेवां कुर्वन्ति । किन्तु असन्तोषात् तस्य अन्तः करणं सन्तप्तं भवति । अर्थात् संतापं अनुभवति ।

**विलासे मतिर्बुद्धिगे देवपूज्ये भवेज्जल्पकः कल्पको लेखको वा ।**

**निदाने सुते विद्यमानेऽतिभूतिः फलोपद्रवः पक्वकाले फलस्य ॥ ५ ॥**

**अन्वयः-** देवपुज्ये बुद्धिगे विलासे मतिः भवेत् , (सः) जल्पकः कल्पकः लेखकः वा भवेत् । सुते विद्यमाने अपि निदाने भूतिः (स्यात्) फलस्य पक्वकाले फलोपद्रवः (स्यात्) ।

**व्याख्या-** **देवपुज्ये** - गुरुः **बुद्धिगे** - पञ्चमस्थे **विलासे** - भोगे **मतिः** - बुद्धिः **भवेत्** - स्यात् **जल्पकः** - वाचालः वक्ता **कल्पकः** - तार्किकः **लेखकः** - लेखनकर्ता **वा** - अथवा **भवेत्** - स्यात् **सुते** - पुत्रे **विद्यमाने** - सहायभूते **अपि** - तथा **निदाने** - परिणतस्य **भूतिः** - समृद्धि **फलस्य पक्वकाले** - परिणामस्य सिद्धावस्थायां **फलोपद्रवः** - कार्यहानिः स्यात् ।

**भावार्थः-** यस्य नरस्य पञ्चमस्थाने गुरुः भवेत् तस्य बुद्धिः भोगे भवति । सः वाचालः, तार्किकः तथा लेखको भवति । कार्यस्य परिणामकाले विघ्नाः समागच्छन्ति किन्तु पुत्रे विद्यमाने सति सः धनवान् भवति ।

**रुजार्तो जनन्या रुजः संभवेयू रिपौ वाक्पतौ शत्रुहन्तृत्वमेति ।**

**बलादुद्धतः को रणे तस्य जेता महिष्यादिशर्मा न तन्मातुलानाम् ॥ ६ ॥**

**अन्वयः-** वाक्पतौ रिपौ (स्थिते) रुजार्तः (भवति) शतृहन्तृत्वम् एति, बलात् उद्धतः (भवति) तस्य रणे को जेता (स्यात्) महिष्यादि शर्मा (भवति) तत् मातुलानां न (भवेत्) जनन्याः रुजः (च) संभवेयुः ।

**व्याख्या-** **वाक्पतौ** - जीवे **रिपौ** - षष्ठ स्थाने **रुजार्त** - रोगपीडितः **शतृहन्तृत्वम्** - शत्रुहननसामर्थ्यम् **एति** - प्रप्नोति **बलात्** - पराक्रमात् **उद्धतः** - उत्थितः **तस्य** - नरस्य **रणे** - संग्रामे **को** - कः **जेता**

– विजयी **महिष्यादि** – गो– आश्वादि पशूनां **शर्मा** – सुखम् तत् – सुखं **मातुलानां** – मातृभ्रातृणां **न** – नो **जनन्याः** – मातुः **रुजः** – रोगः **संभवेयुः** – स्युः ।

**भावार्थः–** यस्य षष्ठेस्थाने जीवः भवेत् सः नरः रोगार्तः भवति । सः शत्रुनाशकः रणे सर्वदा जेता च भवति । सः पशुसुखं विन्दति । किन्तु मातुलानां सुखं न प्रप्नोति । तथा तस्य जननी रोगार्त्ता भवति ।

**मतिस्तस्य बह्वी विभूतिश्च बह्वीरतिर्वै भवेद्भामिनीनामबह्वी ।**

**गुरुर्गर्वकृद्यस्य जामित्रभावे सपिंडाधिकोऽखंडकंदर्प एव ॥ ७ ॥**

**अन्वयः–** यस्य जामित्रभावे गुरुः (स्यात्) तस्य मतिः बह्वी, विभुतिश्चबह्वी (भवेत्) । भामिनीनां वैभवे रतिः अबहवी (स्यात्) सः सपिंडाधिकः अखंडकंदर्पः गर्वकृत् एवं (भवेत्) ।

**व्याख्या–** **यस्य** – नरस्य **जामित्रभावे** – सप्तमे **गुरुः** – बृहस्पतिः **तस्य** – नरस्य **मतिः** – बुद्धिः **बह्वी** – बहुला **विभुतिश्च बह्वी** – धनादिसमृद्धिः **भामिनीनां** – कामिनीनां **वैभवे** – सौन्दर्ये **रतिः** – प्रीतिः **अबह्वी** – स्वल्पा **सः** – नरः **सपिंडाधिकः** – गोत्रजैः सबलः **अखंडकंदर्पः** – सौन्दर्यादिगुणपूर्णः कामः **गर्वकृत्** – अभिमानी **एवं** – हि स्यात् ।

**भावार्थः–** यस्य सप्तमस्थाने बृहस्पतिः भवेत् सः नरः तीक्ष्णबुद्धिमान् तथा बहुधनवान् भवति । तस्य कामिनीनां सौन्दर्ये प्रीतिः स्वल्पा भवति । स्वज्ञातौ सः श्रेष्ठः भवति । सः कामदेववत् रूपवान् भवति । तथा अभिमानी भवति ।

**चिरं नो वसेत्पैतृके चैव गेहे चिरस्थायि नो तद्गृहं तस्य देहम् ।**

**चिरं नो भवेत्तस्य नीरोगमंगं गुरुर्मृत्युगो यस्य वैकुण्ठगन्ता ॥ ८ ॥**

**अन्वयः–** गुरुः यस्य मृत्युगः (सः) पैतृके गेहे चिरं न एव वसेत्, तद्गृहं तस्य देहे च चिरस्थायि न (भवेत्), तस्य अङ्ग चिरं नीरोगं न भवेत् । (सः) वैकुण्ठगंता (स्यात्) ।

**व्याख्या–** **गुरुः** – बृहस्पतिः **यस्य** – नरस्य **मृत्युगः** – अष्टमस्थः **पैतृके गेहे** – पितृगृहे **चिरं** – चिरकालं **न** – नो **वसेत्** – न तिष्ठेत् **तद्गृहं** – तस्य सदने **तस्य देहे** – शरीरे **च** – तता **चिरस्थायि** –बहुकालं (एकस्थलवासी) **न** – नो **(भवेत्) तस्य** – नरस्य **अंग** – शरीरं **चिरं** – चिरकालं **नीरोगं** – रोगरहितं **न** – नो **भवेत्** – स्यात् **वैकुण्ठगंता** – विष्णुलोकगामी स्यात् ।

**भावार्थः–** यस्य नरस्य अष्टमभावे बृहस्पतिः भवेत् सः नरः पितृगृहे बहुकालं यावत् न तिष्ठति । तस्य शरीरं रोगरहितं न भवति । अर्थात् अयं रोगी भवति । देहत्यागानन्तरं सः विष्णुलोकं याति ।

**चतुर्भूमिकं तद्गृहं तस्य भूमीपतेर्वल्लभो वल्लभा भूमिदेवाः ।**

**गुरौ धर्मगे बान्धवाः स्युर्विनीताः सदाऽऽलस्यता धर्मवैगुण्यकारी ॥ ९ ॥**

**अन्वयः–** गुरौ धर्मगे तद्गृहं चतुर्भूमिकं (स्यात्) भूमिपतेः वल्लभः (स्यात्) भूमिदेवाः वल्लभाः (स्युः) बान्धवाः विनीताः स्युः (सः) आलस्यतः सदा धर्मवैगुण्यकारी (भवति) ।

**व्याख्या–** **गुरौ** – बृहस्पतौ **धर्मगे** – नवमे **तद्गृहं** – तस्य गृहं **चतुर्भूमिकं** – चतुःशालं **भूमिपतेः** – नृपस्य **वल्लभः** – प्रियः **भूमिदेवाः** – ब्राह्मणाः **वल्लभाः** – प्रियाः **बांधवाः** – भ्रातरः **विनीताः** – नम्राः **स्युः** – भवेयुः **आलस्यतः** – प्रमादात् **सदा** – नित्यम् **धर्मवैगुण्यकारी** – संध्यावंदनादि नित्यकर्मणोऽपि लोपकरः स्यात् ।

**भावार्थः–** यस्य नरस्य नवमस्थाने बृहस्पतिः भवेत् तस्य गृहं चतुर्भूमिकं भवति । सः नृपस्य प्रियः भवति । ब्राह्मणाः तस्य प्रियतराः भवन्ति । तस्य भ्रातरः विनम्राः भवन्ति । किन्तु प्रमादात् सर्वदा अयं संध्यावंदनादि कर्माणि न करोति ।

**ध्वजा मण्डपे मन्दिरं चित्रशालं पितुः पूर्वजेभ्योऽपि तेजोऽधिकत्वम् ।**

**न तुष्टो भवेच्छर्मणा पुत्रकाणां पचेत्प्रत्यहं प्रस्थसामुद्रमन्नम् ॥ १० ॥**

**अन्वयः-** (गुरौ कर्मगे सति) मंडपे ध्वजा, मंदिरे चित्रशाला, पितुः पूर्वजेभ्यः अपि तेजोधिकत्वं (स्यात्) पुत्रकाणां शर्मणा तुष्टः न (भवेत्) प्रत्यहं प्रस्थसामुद्रं अन्नं पचेत् ।

**व्याख्या-** (**गुरौ** - बृहस्पतौ **कर्मगे** - दशमस्थे चेत्) **मंडपे ध्वजा** - ध्वजाशोभिते **मंदिरे चित्रशाला** - नानाविश्वचित्रयुक्तं गृहं **पितुः** - जनकस्य **पूर्वजेभ्यः** - पितृभ्यः **अपि** - तथा **तेजोधिकत्वं** - अधिकतेजस्वित्वं **पुत्रकाणां** - कुपुत्राणां **शर्मणा** - सुखेन **तुष्टः** - संतोषः **न** - नो **प्रत्यहं** - प्रतिदिनं **प्रस्थसामुद्रं** - षोडश- पलपरिमितं लवणं **अन्नं** - भोजनं **पचेत्** - संपचेत् ।

**भावार्थः-** यस्य नरस्य जन्मलग्नात् दशमभावे बृहस्पतिः भवेत् तस्य गृहं ध्वजायुक्तं भवति । तस्य देवमन्दिरम् अथवा गृहं नानाचित्रयुक्तं भवति । तस्य प्रतापः पितृभ्यः अपि अधिकः भवति । अयं कुपुत्राणां सुखेन सुखी न भवति । अर्थात् दुष्ट-पुत्रवान् भवति । प्रतदिनं तस्य गृहे भोजनार्थं षोडशपलपरिमितस्य लवणस्य उपयोगो भवति । अर्थात् तस्य गृहे बहवः जनाः भोजनं कुर्वन्ति इति ।

**अकुप्यं च लाभे गुरौ किन्न लभ्यं वदन्तीष्टधीमन्तमन्ये मुनीन्द्राः ।**

**पितुर्भारभृत्स्वांगजास्तस्य पञ्च परार्थस्तदर्थो न चेद्वैभवाय ॥ ११ ॥**

**अन्वयः-** गुरौ लाभे तस्य किं अकुप्यं न लभ्यं (स्यात्) अन्ये मुनीन्द्राः अष्टधीमन्तं वदन्ति, पितुः भारभृत् (भवति) तस्य स्वांगजाः पञ्च, चेत् तदर्थः (तदा) परार्थः वैभवाय न (स्यात्) ।

**व्याख्या-** **गुरौ** - बृहस्पतौ **लाभे** - एकादशस्थे **तस्य** - नरस्य **किं** - किम् **अकुप्यं** - स्वर्णरुप्यादि **न** - नो **लभ्यं** - प्राप्यं **अन्ये** - प्रसिद्धाः **मुनीन्द्राः** - इन्द्रादयः **अष्टधीमंतं** - अष्टावधानं (बुद्धिमान्) **वदन्ति** - कथयन्ति **पितुः** - तातस्य **भारभृत्** - पोषकः **तस्य** - नरस्य **स्वांगजाः** - औरसपुत्राः **पञ्च** - पञ्च **चेत्** - तर्हि **तदर्थः** - तत् धनम् **परार्थः** - अन्यभोगाय **वैभवाय** - दानधर्मोभोगार्थं **न** - न भवेत् ।

**भावार्थः-** यस्य नरस्य लाभस्थाने गुरुः भवेत् सः नरः सुवर्णादि वस्तूनि अवश्यं प्राप्नोति । प्रसिद्धाः इन्द्रादयः मुनयः वदन्ति यत् अयं बुद्धिमान् भवति । तथा पितुः पोषकोऽपि भवति । सः पञ्चपुत्रवान् भवति । किन्तु तस्य धनस्य व्ययं दानकर्मणि एव भवति ।

**यशः कीदृशं सद् व्यये साभिमाने मतिः कीदृशी वञ्चना चेत्परेषाम् ।**

**विधिः कीदृशोऽर्थस्य नाशो हि येन त्रयस्ते भवेयुर्व्यये यस्य जीवः ॥ १२ ॥**

**अन्वयः-** यस्य व्यये जीवः (तस्य) साभिमाने सद् व्यये (सति) यशः कीदृशं, परेषां वञ्चना चेत् मतिः कीदृशी (भवति), येन अर्थस्य नाशः, विधिः कीदृशः (स्यात्) ते त्रयः भवेयुः ।

**व्याख्या-** **यस्य** - नरस्य **व्यये** - द्वादशे **जीवः** - गुरुः **साभिमाने** - सगर्वे **सद् व्यये** -सत् कार्ये **यशः कीदृशं** - लाभः कीदृशः **परेषां** - अन्येषां **वञ्चना** - वञ्चककार्ये **चेत्** - तदा **मतिः कीदृशी** - बुद्धिः कीदृशः **येन** - उपरयुक्ताः त्रयः **अर्थस्य** - धनस्य **नाशः** - हानिः **विधिः कीदृशः** - सत्कार्यः कीदृशं **ते त्रयः** - व्ययः परवञ्चकता द्रव्यत्यागः **भवेयुः** - स्युः ।

**भावार्थः-** यस्य नरस्य द्वादशभावे गुरुः भवेत् धनस्य व्ययः शुभकर्मणि भवेत्तथापि अभिमानत्वात् यशो-रहितो भवति। सः अन्यान् जनान् वञ्चयति । अतः सः कथं उत्तमबुद्धिमान् स्यात्। अर्थात् सः कुबुद्धिमान् भवति । अस्य सदैव द्रव्यस्य नाशः एव भवति ।

## 2. तन्वादिद्वादशभावस्थ शुक्रफलानि

**समीचीनमङ्गं समीचीनसङ्गः समीचीनबहवङ्गनाभोगयुक्तः ।**

**समीचीनकर्मा समीचीनशर्मा समीचीनशुक्रो यदा लग्नवर्ती ॥ १ ॥**

**अन्वयः-** यदा समीचीन शुक्रः लग्नवर्ती (चेत्) (तदा) समीचीनं अंग, समीचीनः संगः, समीचीनबह्वंगना भोगयुक्तः समीचीनकर्मा, समीचीनशर्मा (च) स्यात् ।

**व्याख्या-** **यदा** - जन्मकाले **समीचीन** - षड् बलयुक्तानि-समीचीनानि **शुक्रः** - भृगुः **लग्नवर्ती** - लग्ने चेत् (तस्य) **समीचीनं** - सुन्दरं **अंगं** - शरीरं **समीचीनः संगः** - उत्तमः सत्पुरुषाणां संगः **समीचीनबह्वंगना** - सौन्दर्यादि गुणयुक्तानां बहुस्त्रीणां **भोगयुक्तः** - भोगरतः **समीचीनकर्मा** - उत्तम-कर्मयुक्तः **समीचीनशर्मा** -शुभकर्मा च स्यात् - भवेत् ।

**भावार्थः-** यदा जन्मकाले षड्बलैर्युक्तः शुक्रः यस्य मनुष्यस्य लग्ने स्थितो भवति सः नरः सुन्दराङ्गयुक्तः, सत्पुरुषाणां सङ्गी मृगनयनीतुल्य-बहुस्त्रीभिर्नित्यक्रीडारतः उत्तमकर्मकर्ता शुभकर्मयुक्तश्च भवति ।

**मुखं चारुभाषं मनीषाऽपि चार्वी मुखं चारु चारूणि वासांसि तस्य ।**

**कुटुम्बे स्थितः पूर्वदेवस्य पूज्यः कुटुम्बेन किं चारु चार्वंगिकामः ॥ २ ॥**

**अन्वयः-** (यस्य) कुटुम्बेस्थितः भृगुः (स्यात्तस्य) मुखं चारुभाषं मनीषा चार्वी (स्यात्) मुखं चारु, वासांसि चारुणि (स्युः), पूर्वदेवस्य पूज्यः (स्यात्) चार्वंगीकामः, कुटुम्बे चारु किं न (स्यात्) ।

**व्याख्या-** **कुटुम्बे स्थितः** - द्वितीयस्थितः **भृगुः** - शुक्रः **मुखं चारुभाषं** - सुन्दरवाणीयुक्तं (मधुरभाषी) **मनीषा चार्वी** - उत्तमबुद्धिः **मुखं चारु** - सुन्दरमुखं **वासांसि चारूणि** - सुन्दराणि वस्त्राणि **पूर्वदेवस्य पूज्यः** - कौटुम्बिकपरंपरापालनकर्ता **चार्वंगिकामः** - सुन्दराङ्गनाभिः (अभिलाशायुक्तश्च) **कुटुम्बे चारुः** - परिवारे शोभमानः भवति ।

**भावार्थः-** यस्य जन्मकाले द्वितीयस्थः शुक्रो भवति सः जातकः सुन्दरवाणीयुक्तः, तीव्रबुद्धियुक्तः, सुन्दराननयुक्तः, सुन्दरवस्त्रपरिधानकर्ता कौटुम्बिकपरंपरापालनकर्ता, कुटुम्बे शोभायमानः, सुन्दराङ्गनाभिः अभिलशायुक्तश्च भवति ।

**रतिः स्त्रीजने तस्य नो बंधुनाशो भृगुर्यस्य दुश्चिक्यगो दानवानाम् ।**

**न पूर्णो भवेपुत्रसौख्येऽपि सेनापतिः कातरो दानसंग्रामकाले ॥ ३ ॥**

**अन्वयः-** यस्य दानवानां गुरुः दुश्चिक्यगः (स्यात्) तस्य स्त्रीजने रतिः न, बंधुनाशः, पुत्रः सौख्ये अपि पूर्णः न भवेत्, (सः) सेनापति अपि दानसंग्रामकाले कातरः (स्यात्) ।

**व्याख्या-** (**यस्य** - नरस्य) **दानवानां** - असुराणां **गुरुः** - शुक्रः **दुश्चिक्यगः** - तृतीयस्थः चेत् **तस्य** - जनस्य **स्त्रीजने** - स्त्रीभिः **रतिः नो** - प्रीतिः न **बंधुनाशः** - भ्रातृनाशः (स्यात्) **पुत्रसौख्ये** - सुखे सुतः **अपि** - च **पूर्णः** - संपूर्णः मनोरथः **न भवेत्** - न स्यात् **सेनापति** - सेनानायकः **अपि** - च **दानसंग्रामकाले** - दानसंगरसमये **कातरः** - अशूरो भवेत् ।

**भावार्थः-** यस्य जातकस्य तृतीयस्थः शुक्रः चेत् तस्य नरस्य स्त्रीजने आसक्तिः न भवति अस्य बान्धवानां नाशो भवेत् । तृतीयभावगतः शुक्रः पुत्रःदाता किन्तु नरस्य मनस्संतुष्टिः न स्यात् । शुक्रप्रभावात् जातकः सेनापतिः भवत्येव किन्तु दाने तथा संगरे काले कातरो भवति अर्थात् अशूरो भवेत् ।

**महित्वेऽधिको यस्य तुर्येऽसुरेज्यो जनैः किं जनैश्चापरै रुष्टतुष्टैः**

**कियत्पोषयेज्जन्मतः संजनन्या अधीनार्पितोपायनैरेव पूर्णः ॥ ४ ॥**

**अन्वयः-** यस्य तुर्ये असुरेज्यः, (सः) जनैः महित्वे अधिकः, अपरैः जनैः रुष्टतुष्टैः किं (स्यात्) अधिनार्पितोपायनैरेव पूर्णः (भवेत्) जन्मतः संजनन्याः पोषयेत् ।

**व्याख्या-** **यस्य** –नरस्य **तुर्ये** – चतुर्थे **असुरेज्यः** – भृगुः **जनैः** – मनुष्यैः **महित्वे अधिकः** – महानतायाम् अधिकः स्यात् **अपरैः** – अन्यैः **जनैः** – मानवैः **रुष्टतुष्टैः** – प्रसन्नतायामप्रसन्नतायां वा **किं** – प्रभावः **अधिनार्पितोपायनैरेव** – अन्यजनैर्प्रदत्तं धनैः एव **पूर्णः** – तृप्तः (भवेत्) **जन्मतः** – जन्मकालात् **संजनन्याः** –मातुः **पोषयेत्** – अतिशयेन पोषणं कुर्यात् ।

**भावार्थः-** यस्य जातकस्य चतुर्थस्थाने भृगुः चेत् सः लोकपूज्यो भवति । तस्योपरि अन्यानां क्रोधस्य तुष्टेः वा प्रभावो न भवति । सः जन्मकालत एव मातृपोषणे रतो भवति । तस्य गृहं तु अन्यजनैर्प्रदत्तः धनराशिभिः आपूरितं भवति ।

**सपुत्रेऽपि किं यस्य शुक्रो न पुत्रे प्रयासेन कि यत्नसंपादितार्थः ।**

**व्युदर्कं विना मन्त्रमिष्टाशनाभ्यामधीतेन किं चेत्कवित्वे न शक्तिः ॥ ५ ॥**

**अन्वयः-** यस्य पुत्रे शुक्रः (तस्य) सपुत्रे अपि किं स्यात्, (येन) प्रयासेन सम्पादितोऽर्थः किं न, व्युदर्कं विना मन्त्रमिष्टाशनाभ्यां (किं फलं) कवित्वे शक्तिः न चेत् (तदा) अधीतेन किं (फलम्) ।

**व्याख्या-** **यस्य** – नरस्य **पुत्रे** – पञ्चमभावे **शुक्रः** – भृगुः चेत् **सपुत्रे** – पुत्रे सति **किं** – किम् न (अर्थात् पुत्रसुखं भवत्येव) (येन) **प्रयासेन** – परिश्रमेण **सम्पादितोऽर्थः** – द्रव्यप्राप्तिः कृता (तस्य) **किं** – (अर्थात् प्रयास साफ़ल्यम् भवत्येव) **व्युदर्कं विना** – उदरतृप्तिं विना **मन्त्रमिष्टाशनाभ्यां** – मन्त्रेण-मिष्टात्रेन च किं चेत् **कवित्वे** – काव्यरचनायां **शक्तिः** – सामर्थ्यं **न चेत्** – नो चेत् तदा **अधीतेन** – अध्ययनेन किं फलम् ।

**भावार्थः-** यस्य पञ्चमभावे शुक्रो भवति सपुत्रे सति किं न अर्थात् पुत्रसुखं भवत्येव, येन परिश्रमेण धनावाप्तिः कृता तस्य किं न अर्थात् प्रयाससाफल्यम् भवत्येव । तथा च उदरतृप्तिं विना मन्त्रेण मिष्टान्नभोजनेन च किं न । तथैव कवित्वशक्तिर्नस्यात्तर्हि अध्ययनेन किं न ।

**सदा दानवेज्ये सुधासिक्तशत्रुर्व्ययः शत्रुगे चोत्तमौ तौ भवेताम् ।**

**विपद्येत संपादितं चापि कृत्यं तपेन्मन्त्रतः पूज्यसौख्यं न धत्ते ॥ ६ ॥**

**अन्वयः-** दानवेज्ये शत्रुगे (सति) शत्रुः सुधासक्तिः (करोति) अपि च सदा व्ययः तौ उत्तमौ भवेताम् । (तेन) संपादितं कृत्यं विपध्येत, सः मंत्रतः तपेत् तथा पूज्यसौख्यं न धत्ते ।

**व्याख्या-** **दानवेज्ये** – शुक्रे **शत्रुगे** – षष्ठस्थेस्थिते चेत् **शत्रुः** – रिपुः **सुधासक्तिः** – अमृतसेचनः (सत्कारं करोति) तता **सदा व्ययः** – नित्यं द्रव्यस्य व्ययः च (धर्मादिकार्ये) **उत्तमौ** – उत्तमरीत्त्या **भवेताम्** – स्यात्ताम् तेन **संपादितं** – संपादितानि च **कृत्यं** – कार्याणि **विपध्येत** – नश्येत **सः मंत्रतः** – कुमन्त्रणा **तपेत्** – तपति एवं **पूज्यसौख्यं** – गुरूणां सुखं **न धत्ते** – न प्राप्नोति ।

**भावार्थः-** षष्ठस्थे शुक्रः चेत् तस्य शत्रवः अपि सत्कारं कुर्वन्ति तथा च तस्य द्रव्यं सत्कर्मण्युपयोगाय भवति । अर्थात् सत्कर्मणि द्रव्यस्य व्ययः । किन्तु तेन संपादित कार्याणि नश्यन्ति, कुमन्त्रणा संतापावाप्तिः एवं गुरुभिः (पूज्येः) सुखं नाप्नोति ।

**कलत्रे कलत्रात्सुखं नो कलत्रात् कलत्रं तु शुक्रे भवेद्रत्नगर्भम् ।**

**विलासाधिको गण्यते च प्रवासी प्रयासाल्पकः के न मुह्यन्ति तस्मात् ॥ ७ ॥**

**अन्वयः-** कलत्रे (स्थिते) शुक्रे कलत्रात् तु सुखं न (तथा) कलत्रात् रत्नगर्भं कलत्रं (भवेत्) । (तस्य) विलासाधिकः प्रवासी च गण्यते । प्रयासाल्पकः च, तस्मात् के न मुह्यन्ति ।

**व्याख्या-** **कलत्रे** - सप्तमस्थाने स्थिते **शुक्रे** - भृगुः **कलत्रात्** - कटिप्रदेशात् **तु सुखं न** - सौख्यं न स्यात् (तथा) **कलत्रात्** - भार्यायाः **रत्नगर्भं** - पुत्रः स्यात् **कलत्रं** - पुत्रः **विलासाधिकः** - भोगे रतः (विलासी) **प्रवासी** - विदेशगमनशीलो च **गण्यते** - मन्यते **प्रयासाल्पकः** - स्वप्लप्रयासयुक्तः **तस्मात्** - जनात् (बुद्धिचातुर्येण) **के न मुह्यन्ति** - सर्वान् मुह्यति ।

**भावार्थः-** सप्तमस्थे शुक्रे सति जातकः कटिप्रदेशात्तु सुखं नाप्नोति अर्थात् व्यथां प्राप्नोति । तथा तस्य भार्यया रत्नतुल्यपुत्रो (कलत्रं) भवेत् । सः विलासी, विदेशस्थितः तथा स्वल्पप्रयासयुक्तश्च स्यात् । तस्य चातुर्येण के न मुह्यन्ति अर्थात् सर्वे मुह्यन्ति ।

**जनः क्षुद्रवादी चिरं चारु जीवेच्चतुष्पात्सुखं दैत्यपूज्यो ददाति ।**
**जनुष्यष्टमे कष्टसाध्यो जयार्थः पुनर्वर्द्धते दीयमानं धनर्णम् ॥ ८ ॥**

**अन्वयः-** जनुषि अष्टमे (स्थितः) दैत्यपुज्यः चतुष्पात् सुखं ददाति । (जनः) क्षुद्रवादी (स्यात्) चारु चिरं जीवेत्, (तस्य) जयार्थः कष्ट्साध्यः (स्यात्) दीयमानं धनर्णे पुनः वर्धते ।

**व्याख्या-** **जनुषि** - जन्मकाले **अष्टमे** - निधनस्थाने **दैत्यपुज्यः** - शुक्रः चेत् **चतुष्पात्** - गोऽश्वादीनां **सुखं** - सौख्यं **ददाति** - प्राप्नोति **क्षुद्रवादी** - अधमवक्ता स्यात् **चारु** - सुखेन **चिरं** - दीर्घं **जीवेत्** - जीवति **जयार्थः** - विजयः धनं च **कष्ट्साध्यः** - यत्नसाध्यः भवति **दीयमानं** - दीयमानं **धन-ऋणम्** - द्रव्यऋणं **पुनः** - पौनः पुन्येत **वर्धते** - जायते ।

**भावार्थः-** जन्मसमये अष्टमे शुक्रः चेत् गोऽश्वादीनां सुखं प्रददाति । सः दुष्टवक्ता स्यात् । जातकः सुखेन दीर्घजीवी स्यात् । तं जनं जयः अर्थश्च कष्टेन लभ्यते । ऋणार्थाय प्रदत्तधनं पौनः पुण्येन वर्द्धते ।

**भृगौ त्रित्रिकोणे पुरे के न पौराः कुसीदेन ये वृद्धिमस्मै ददीरन् ।**
**गृहं ज्ञायते तस्य धर्मध्वजादेः सहोत्थादिसौख्यं शरीरे सुखं च ॥ ९॥**

**अन्वयः-** भृगौ त्रित्रिकोणे (स्थिते) (तस्य) पुरे के पौराः न ये अस्मै कुसीदेन वृद्धिं ददीरन्, तस्य गृहं धर्मध्वजादेः ज्ञायते, (तस्य) सहोत्थादिसौख्यं शरीरे सुखं च (स्यात्) ।

**व्याख्या-** **भृगौ** - शुक्रे **त्रित्रिकोणे** - नवमस्थानेस्थिते **पुरे** - नगरे **के पौराः** - पुरवासिनः **न** - नहि **ये अस्मै** - जने **कुसीदेन** - ऋणेन **वृद्धिं** - लाभः **ददीरन्** - ददन्ति **तस्य** - जातकस्य **गृहं** - भवनं **धर्मध्वजादेः** - धर्मपताकया **ज्ञायते** - प्रसिद्धिमवाप्नोति **सहोत्थादिसौख्यं** - भ्रातृभृत्यनां सुखं स्यात् **शरीर** - अङ्गे **सुखं** - सौख्यं च मिलति ।

**भावार्थः-** नवमस्थाने शुक्रः चेत् तस्य नगरे के पुरवासिनः न सन्ति ये अस्मै कुसीदेन वृद्धिं ददीरन् । अर्थात् कोऽपि अस्य ऋणात् मुक्तो न स्यात् । सः यज्ञादि धार्मिक-कार्याणि करोति । येन प्रसिद्धिं प्राप्नोति । एतस्मै भृत्यः एवं भ्रातृजनानां सुखं मिलति । तथा अतिरिक्तं शरीरसुखं च मिलति ।

**भृगुः कर्मगो गोत्रवीर्यं रुणद्धि क्षयार्थं भ्रमः किन्न आत्मीय एव ।**
**तुलामानतो हाटकं विप्रवृत्या जनाडम्बरैः प्रत्यहं वा विवादात् ॥ १० ॥**

**अन्वयः-** कर्मगः भृगुः (तस्य) गोत्रवीर्यं रुणद्धि, आत्मीयः एव भ्रमः (तस्य शरीर) क्षयार्थं किं न (स्यात्) प्रत्यहं विप्रवृत्या जनाडम्बरैः विवादाद वा तुलामानतः हाटकं (फलं प्राप्नुयात्) ।

**व्याख्या-** **कर्मगः** - दशमस्थः **भृगुः** - शुक्रः **गोत्रवीर्यं** - वंशबीजं **रुणद्धि** - अवरोधयति **आत्मीयः** -स्वकीयः एव **भ्रमः** - भ्रान्तिः (शरीरं) **क्षयार्थं** - नाशार्थं किं न स्यात् **प्रत्यहं** - प्रतिदिनं **विप्रवृत्या** - ब्रह्माणजीविकया **जनाडम्बरैः** -मिथ्यपटहैः (मिथ्यदर्पैः) **विवादाद** - विवादेन **वा** - किम् **तुलामानतः** - तुलापरिमितं **हाटकं** - स्वर्णादि फलं प्राप्नुयात् ।

**भावार्थः-** जनुषि दशमस्थः शुक्रः स्यात्तदा तस्य संतानोत्पत्तिमवरोधयति, तस्य चित्ते भ्रमः, शरीरस्य च क्षयः, ब्राह्मणवृत्याऽऽडम्बरेण विवादेन च द्रव्यप्राप्त्यादि (तुलापरिमितसुवर्णादि) फलानि प्राप्नोति ।

**भृगुर्लाभगो लाभदो यस्य लग्नात्सुरूपं महीपं च कुर्याच्च सम्यक् ।**

**लसत्कीर्तिसत्यानुरक्तं गुणाढयं महाभोगमैश्वर्ययुक्तं सुशीलम् ॥ ११ ॥**

**अन्वयः-** यस्य लग्नात् लाभगः भृगुः (स्यात्), नरः लाभदः (स्यात्), सुशीलं लसत्कीर्तिः सुरूपं महीपं च कुर्यात् । (तं) सत्यानुरक्तं गुणाढ्यं महाभोगं ऐश्वययुक्तं च सम्यक् कुर्यात् ।

**व्याख्या-** **यस्य** - नरस्य **लग्नात्** - प्रथमस्थानात् **लाभगः** - एकादशस्थाने **भृगुः** - शुक्रः (तं नरं) **लाभदः** - द्रव्यलाभकर्ता **सुशीलं** - सुगुणयुक्तं (शीलवान्) **लसत्कीर्तिः** - कीर्तियुक्तः **सुरूपं** - रूपवान् **महीपं** - नृपं च करोति **सत्यानुरक्तं** - सत्यानुरागी (सत्यवक्ता) **गुणाढ्यं** - गुणैर्युक्तं **महाभोगं** - महद्भोगशालिनं **ऐश्वययुक्तं** - विभूतियुक्तं च सम्यक् **कुर्यात्** - करोति ।

**भावार्थः-** यस्य लग्नात् एकादशस्थाने शुक्रः चेत् तं नरं द्रव्यलाभकर्तार, सुशीलं, कीर्तियुक्तं सुरूपवन्तं च नृपं कुर्यात् । तं जनं सत्यानुरक्तं, गुणैर्युक्तं, महाभोगशालिनम् ऐश्वर्ययुक्तं च कुर्यात् ।

**कदाप्येति वित्तं विलीयेत वित्तं सितो द्वादशे केलिसत्कर्मशर्मा ।**

**गुणानां च कीर्तेः क्षयं मित्रवैरं जनानां विरोधः सदाऽसौ करोति ॥ १२ ॥**

**अन्वय :-** (यदि) असौ सितः द्वादशे (स्यात्) (तदा) कदा अपि वित्तं एति, वित्तं विलीयेत । अपि (सः) केलि-सत्कर्म-शर्मा च (स्यात्) । तस्य गुणानां कीर्ते : च क्षयं, मित्रवैरं सदा जनानां विरोधं (च) करोति।

**व्याख्या-** **असौ** - यदा **सितः** - शुक्रः **द्वादशे** - द्वादशस्थाने (तदा) **कदा** - कदाचित् अपि **वित्तं** - धनं **एति**-प्राप्नोति **वित्तं** - धनं **विलीयेत** - विलीनमपि भवति **केलि-सत्कर्म शर्मा** - क्रीडया एवं सत्कर्मणा सुखं (च स्यात्) **गुणानां** -सद्प्रवृत्तीनां **कीर्ते : च** - ऐश्वर्यस्य च **क्षयं** - नाशं **मित्रवैरं** - बान्धवैः सह शत्रुतां **सदा** - सदैव **जनानां** - स्वजनानां **विरोधं** - कलहं **करोति** - च विदधाति ।

**भावार्थः-** यस्य जातकस्य द्वादशभावे शुक्रः स्यात्तदा जनः कदाचित् वित्ताप्तिं कदाचिच्च वित्तनाशं च करोति । अर्थात् पौनः पुन्येन धनाप्तिर्नाशिश्च स्यात् । सः क्रीडया सत्कर्मणा च सुखं प्राप्नुयात् । तस्य गुणानां कीर्तेश्चनाशः, मित्रैः सह वैरं, सदैव स्वजनानां विरोधश्च करोति ।

## स्वाध्यायः

**१. अधस्तनेषु प्रश्नेषु योग्यमुत्तरं चित्वा लिखत ।**

(१) चतुर्थस्थाने गुरुः चेत् गृहद्वारतः किं श्रूयते ?

(क) अमंगलधोषः (ख) गीतधोषः (ग) संगीतधोषः (घ) वेदधोषः

(२) गुरुः पञ्चमे किदृशीं बुद्धिं ददाति ?

(क) विलासबुद्धिम् (ख) साधुबुद्धिम् (ग) नीचबुद्धिम् (घ) कुबुद्धिम्

(३) षष्ठस्थाने गुरुः किं प्रददाति ?

(क) मोहम् (ख) लोभम् (ग) रोगम् (घ) भोगम्

(४) नवमस्थाने गुरुश्चेत् तस्य गृहं कीदृशं स्यात् ?

(क) चतुर्भूमिकम् (ख) द्विभूमिकम् (ग) एकभूमिकम् (घ) त्रिभूमिकम्

(५) द्वादशस्थ गुरुः किं फ़लम् ददाति ?

(क) शरीरव्ययम् (ख) रिपुनाशम् (ग) अर्थनाशम् (घ) दुःखम्

(६) भृगुः चतुर्थस्थाने चेत्तदा जातको कीदृशो भवति ?

(क) भ्रातृपूज्यः (ख) लोकपूज्यः (ग) मातृपूज्यः (घ) पितृपूज्यः

(७) कलत्रे भृगुः स्यात् तदा किं भवेत् ?

(क) कलत्रसुखम् (ख) कलत्रहानिः (ग) कलत्रदुःखम् (घ) कलत्राप्तिः

(८) अष्टमे शुक्रः किं ददाति ?

(क) पूर्णायुः (ख) स्वल्पायुः (ग) दीर्घायुः (घ) मध्यमायुः

(९) नवमस्थानस्थितः शुक्रः किं सुखं ददाति ?

(क) भ्रातृसुखम् (ख) शरीरसुखम् (ग) वाहनसुखम् (घ) पुत्रसुखम्

(१०) भृगुः कर्मस्थाने किं करोति ?

(क) विवादम् (ख) शत्रुनाशम् (ग) दुःखम् (घ) रोगम्

**२. एकैक-वाक्येनोत्तराणि लिखन्तु ।**

(१) नरः कदा कवित्वशक्तियुक्तो भवति ?

(२) मनुष्यः कदा क्षुद्रो भवति ?

(३) जातकः कदा रोगार्तःसन्नपि शत्रुनाशको भवति ?

(४) शुक्रः धनलाभं कदा करोति ?

(५) जनः शरीरसौन्दर्यं कदा प्राप्नोति ?

(६) मधुरवाक्युक्तः जातकः कदा भवति ?

(७) गुणानां किर्तेश्च नाशः कदा भवति ?

**३. श्लोकपूर्तिं कृत्वा भावार्थो लेख्यः ।**

(१) मतिस्तस्य ...................... खंडकंदर्प एव ।

(२) यशः कीदृशं ...................... यस्य जीवः ।

(३) समीचीनमङ्गं ............................ लग्नवर्ती ।

(४) भृगौ .............................. सुखं च ।

**४. अ-विभागेन सह ब-विभागेन सह सुयोजयतु ।**

| अ | ब |
|---|---|
| (१) द्रव्यलाभम् | (१) लग्नस्थाने गुरुः |
| (२) बन्धुनाशः | (२) षष्ठस्थाने जीवः |
| (३) चतुष्पात् सुखम् | (३) तृतीयस्थाने शुक्रः |
| (४) विरोधः | (४) अष्टमे शुक्रः |
| (५) रोगार्तः | (५) द्वादशे शुक्रः |
| (६) अल्पवीर्यवान् | (६) तृतीयस्थाने गुरुः |

**५. टिप्पणी लेख्या ।**

(१) त्रिकोणस्थानयोः गुरुफ़लम्

(२) व्ययभावगतस्य गुरोःफलम्

(३) शुक्रस्य अष्टमस्थानफलम्

(४) चतुर्थस्थानस्य शुक्रफलम्

**६. विस्तरेणोत्तराणि लिखत ।**

(१) त्रित्रिकोणे गुरोः फलानि लिखत ।

(२) द्वितीयभावस्य गुरोः फलवर्णनं कुरुत ।

(३) कलत्रविषयकं शुक्रस्य फलानि वर्णयत ।

(४) पञ्चमभावे संततिविषये शुक्रस्य फलं लिखत ।

(५) कर्मस्थाने गुरोः फलानि विवेचनीयानि ।

**अध्यापकानां कृते**

- कुण्डल्यां केन्द्रेस्थितयोः गुरुशुक्रयोः प्रत्यक्षोदाहरणैः छात्रेभ्यः ज्ञानं दातव्यम् ।

**छात्राणां प्रवृत्तिः**

- गुरुशक्रयोः त्रिकोणस्थमहत्त्वमन्यशास्त्रेषु कीदृशं प्रदत्तमस्ति तज्ज्ञातव्यम् ।

●

| ९ | तन्वादिद्वादशभावस्थ-शनिराह्वोः फलानि |
|---|---|

## प्रास्ताविकम्

ज्योतिषशास्त्रं मानवस्य आकांक्षां सदैव सर्वथा पूरयति । इदं शास्त्रं मानवम्प्रति तदीयं भविष्यं यथार्थं ज्ञापयति। कस्मिन् काले का घटना घटेत् ? कस्मिन् काले कासां कासाम् आपत्तीनाम् आगमनस्य संभावना:, कस्मिन् काले जातकस्य भाग्योदय: भविष्यति वा एतद् सर्वम् इदं शास्त्रं यथार्थं बोधयति । किन्तु एतेषां ज्ञानं विना ग्रहगणितमशक्यम् । एतदर्थं ग्रहाणां गणितं फलं च चिन्त्यम् । इत: पूर्वम् अस्माभि: सूर्यादिग्रहाणां फलं दृष्टं अधुना अस्मिन् प्रकरणे शनिराह्वो: फलं चर्चयाम: ।

**धनेनातिपूर्णोऽतितृष्णो विषादी तनुस्थेऽर्कजे स्थूलदृष्टिर्नरः स्यात् ।**

**विषं दृष्टिजं त्वाधिकृद् व्याधिबाधं स्वयं पीडितो मत्सरावेश एव ॥ १ ॥**

**अन्वयः-** तनुस्थे अर्कजे नर: घनेन अतिपूर्ण:, अतितृष्ण: विषादी स्थूल द्रष्टि: (स्यात्) तस्य द्रष्टिजं तु विषं (स्यात्) आधिकृत् व्याधिबाधं च (स्यात्), स्वयं मत्सरावेश: एव पीडित: स्यात् ।

**व्याख्या-** **तनुस्थे** - लग्नस्थाने सति **अर्कजे** - शनौ **नरः** - जन: **घनेन** - वित्तेन **अतिपूर्णः** - अतीव पूरित: **अतितृष्णः** -संतोषहीन: **विषादी** - शोकयुक्त: **स्थूल द्रष्टिः** - सूक्ष्मद्रष्टिरहित: (स्यात्) **तस्य द्रष्टिजं तु विषं** - द्रष्टौ एव गरलं (अर्थात् रिपुनाशकारिणीद्रष्टि:) **आधिकृत्** - मनस: पीडा **व्याधिबाधं** - कुष्ठरोगे तनव्यथा **स्वयं** - नर: **मत्सरावेशः** - क्रोधावेश: **एव** - च **पीडितः** - दु:खित: **स्यात्** - भवेत् ।

**भावार्थः-** यस्य जनुषि शनौ तनुस्थे चेत् स: धनेन अतिपूर्ण: स्यात् । एवं संतोषहीन: शोकयुक्त: स्यात् । सूक्ष्मविचाररहित: द्रष्ट्या एव शुत्रघ्न: (शत्रु शमनकर्ता) आधिव्याधिभिर्व्यथित: तथा च स्वयं क्रोधावेशेन - स्वयं पीडितो भवति ।

**सुखापेक्षया वर्जितोऽसौ कुटुम्बात् कुटुम्बे शनौ वस्तु किं किं न भुङ्क्ते ।**

**समं वक्ति मित्रेण तिक्तं वचोऽपि प्रसक्तिं विना लोहकं को लभेत ॥ २ ॥**

**अन्वयः-** कुटुम्बे (स्थिते सति) शनौ सुखापेक्षया कुटुम्बात् वर्जित: (स्यात्) असौ किं किं वस्तु न भुङ्क्ते , मित्रेण समं तिक्तं वच: अपि वक्ति:, प्रसक्तिं विना लोहकं क: लभेत् ।

**व्याख्या-** **कुटुम्बे** - द्वितीयस्थानस्थिते सति **शनौ** - मन्द: **सुखापेक्षया** - सुखलाभेच्छया **कुटुम्बात्** - स्वजनात् **वर्जितः** - विमुक्त: स्यात् (अर्थात् विदेश एव वसति) **असौ** - नर: किं किं **वस्तु** - पदार्थान् **न** - नो **भुङ्क्ते** - भोग्यं **मित्रेण** - सुहृदेन **समं** - साकं **तिक्तं** - दु:सहं **वचः** - वाक्यं **अपि** - च **वक्ति :** - वदति **प्रसक्तिं विना** - परिचर्यां विना **लोहकं** - धातुशस्त्रपातादि **कः** - जन: **लभेत** - प्राप्नुयात् ।

**भावार्थः-** यस्य द्वितीयस्थाने शनौ चेत् असौ पुरुष: सुखलाभेच्छया स्वजनात् दूर: अन्यदेशे स्थानं प्राप्नोति (वसति वा) । स: सर्वविषयाणां सम्पूर्णतया भोगं करोति । मित्रेण सह व्यर्थचर्चाम् एवं कटुभाषणं वदति । तथा अष्टधातु-हिरण्यादि-वस्तुत: वा शस्त्रादिभिश्च लाभं प्राप्नोति ।

**तृतीये शनौ शीतलं नैव चित्तं जनादुद्यमाज्जायते युक्तभाषी ।**

**अविघ्नं भवेत् कर्हिचिन्नैव भाग्यं दृढाशः सुखी दुर्मुखः सत्कृतोऽपि ॥ ३ ॥**

**अन्वयः-** तृतीये शनौ (सति) जनात् उद्यमात् (च) चित्तं शीतलं न एव जायते । (तस्य) भाग्यं कर्हिचित् अविघ्नं न एवं भवेत् । (सः) युक्तभाषी दृढाशः सुखी किन्तु सत्कृतः अपि दुर्मुखः (भवति) ।

**व्याख्या-** **तृतीये** - तृतीयस्थाने **शनौ** मन्दः **जनादुद्यमात्** - भ्रातृपराक्रमात् **चित्तं** - मनः **शीतलं** - शांतं न एव **जायते** - नैव भवति **भाग्यं** - दैवं **कर्हिचित्** - कदापि **अविघ्नं** - विघ्नरहितः न एवं **भवेत्** - नैव जायते **युक्तभाषी** - मितवक्ता **दृढाशः** - दृढाशायुक्तः सुखी **सत्कृतः** - सुकृतः **अपि** - च **दुर्मुखः** - कुहरो भवति ।

**भावार्थः-** यस्य तृतीयस्थाने शनौ चेत् नरः भ्रातृपराक्रमात् चित्तशान्तिं न प्राप्नोति । अर्थात् मनसि अशान्तिं वर्धते। तस्य भाग्योदयः विघ्नरहितः नैव भवति । अर्थात् अतीव परिश्रमेण एव भाग्यस्य उदयो भवति । सः मितभाषी, दृढाशायुक्तः अनलतृष्णः सुखी भवति । किन्तु सत्कारेणापि तस्य मुखं दुर्मुखं (कटुवचनयुक्तं) भवति ।

**चतुर्थे शनौ पैतृकं याति दूरं धनं मन्दिरं बन्धुवर्गापवादः ।**

**पितुश्चापि मातुश्च सन्तापकारी गृहे वाहने हानयो वातरोगी ॥ ४ ॥**

**अन्वयः-** चतुर्थे शनौ पैतृकं धनं मन्दिरं (च) दूरं याति । (तस्य) बन्धुवर्गापवादः, सः पितुः मातुः च अपि सन्तापकारी, गृहे वाहने च हानयः वातरोगी च (जायते) ।

**व्याख्या-** **चतुर्थे** - चतुर्थस्थाने **शनौ** - मन्दे **पैतृकं** - पितृसम्बन्धी **धनं** - वित्तं **मन्दिरं** - देवालयं (गृहं) **च** **दूरं** - सुदुरता **याति** -गच्छति **बन्धुवर्गापवादः** - भ्रातृभिस्सह विरोधः **पितुः** - जनकस्य **मातुः अपि** - जनन्याश्चापि **सन्तापकारी** - संन्ताप-कारकः स्यात् **गृहे** - तस्य गृहे **वाहने** -याने च एवं **हानयः** - क्षतयः स्यात् **वातरोगी** - वातजन्यः रोगयुक्तः च भवेत् ।

**भावार्थः-** यस्य चतुर्थस्थाने शनौ चेत् तेषां पैतृकं धनं गृहप्राप्तिश्च न भवति । अर्थात् नास्य स्वगृहं हस्तगतं भवति । तस्य भ्रातृ-बान्धवैः सह कलहो जायते । सः पितुः मातुः सन्तापकारकः एवं गृहवाहनादिकानां कृते हानिकारकः वातरोगी च भवति ।

**शनौ पञ्चमे च प्रजाहेतुदुःखी विभूतिश्चला तस्य बुद्धिर्न शुद्धा ।**

**रतिर्दैवते शब्दशास्त्रे न तद्वद् कलिर्मित्रतो मन्त्रतः क्रोडपीडा ॥ ५ ॥**

**अन्वयः-** पञ्चमे शनौ (सति) प्रजाहेतुदुःखी (स्यात्) तस्य विभूतिः चला, बुद्धिः शुद्धा न (स्यात्), दैवते शब्दशास्त्रे (च) रतिः न, मित्रतः कलिः, मन्त्रतः क्रोडपीडा च (भवति) ।

**व्याख्या-** **पञ्चमे** - पञ्चमस्थाने **शनौ** - मन्दे स्थिते सति **प्रजाहेतुदुःखी** - संताननिमित्त - क्लेशभागी (स्यात्) **तस्य** - नरस्य **विभूतिः** - ऐश्वर्यं **चला** - अस्थिरं **बुद्धिः** - मतिः **शुद्धा न** - स्यात् अपि तु कुटिल **दैवते** - देवविषये **शब्दशास्त्रे** - व्याकरणादिशास्त्रे (च) **रतिः** - प्रीतिः **मित्रतः** - मित्रात् **कलिः**- कलहः **मन्त्रतः** - विचारविनिमयात् **क्रोडपीडा** - कुक्षीपीडा (भवति) ।

**भावार्थः-** पञ्चमस्थाने शनिः चेत् नरः संतानकारणात् क्लेशभागी भवति । तस्य ऐश्वर्यादिकं अस्थिरं भवति, सः दृष्टबुद्धियुक्तः भवति । देवविषये वा वेदस्मृत्यादौ प्रीतिने भवति । मित्रेण सह सदैव कलहो भवति । स्वस्य मन्त्रविषये श्रद्धाभावात् सिद्धिः न भवति एव कुक्षीपीडा जायते ।

**अरेर्भूपतेश्चोरतो भीतयः किं यदीनस्य पुत्रो भवेद्यस्य शत्रौ ।**

**न युद्धे भवेत्सम्मुखे तस्य योद्धा महिष्यादिकं मातुलानां विनाशः ॥ ६ ॥**

**अन्वयः-** यस्य शत्रौ यदि इनस्य पुत्रः भवेत् (तस्य) अरेः भूपतेः चोरतः किं भीतयः (स्युः), तस्य सम्मुखे युद्धे योद्धा न भवेत् । (तस्य) महिष्यादिकं (सुखं) मातुलानां (च) विनाशः (स्यात्) ।

**व्याख्या-** **यस्य** - नरस्य **शत्रौ** - रिपुभवने **यदि** - यदा **इनस्य पुत्रः** - शनिः (भवेत्) तदा **अरेः** - शत्रोः **भूपतेः** - राज्ञः **चोरतः** - चौरकार्ये किं **भीतयः** भीतिः **तस्य** - जनस्य **सम्मुखे युद्धे** - सम्मुखे युद्धे **योद्धा** - प्रतिवादी **न भवेत्** -न तिष्ठेत् **महिष्यादिकं** - चतुष्पदानां किन्तु **मातुलानां** - मातृपक्षस्य जनानां (च) **विनाशः** - नाशः (स्यात्) ।

**भावार्थः-** यस्य षष्ठे मन्दः चेत् तस्य शत्रोः राज्ञः चोरतः किं भीतयः स्यात् । अर्थात् कदापि भीतिः न स्यात्। अपितु प्रतिवादिनां कृते अतीव भयंकरो भवति । महिष्यादिचतुष्पदानां सुखं मिलति । किन्तु मातुलानां पक्षतः स्वल्पसुखं स्यात् वा मातुलानां विनाशो भवति ।

**सुदारा न मित्रं चिरं चारु वित्तं शनौ द्यूनगे दम्पती रोगयुक्तौ ।**

**अनुत्साहसन्तप्तकृद्धीनचेताः कुतो वीर्यवान्विह्वलो लोलुपः स्यात् ॥ ७ ॥**

**अन्वयः-** द्यूनगे शनौ सुदाराः, चारु मित्रं चिरं वित्तं (च) न (स्यात्) दम्पती रोगयुक्तौ, अनुत्साह सन्तप्तकृत् हीनचेताः विह्वलः लोलुपश्च (स्यात्) वीर्यवान् कुतः (स्यात्) ।

**व्याख्या-** **द्यूनगे** - सप्तमस्थाने **शनौ** - मन्दः **सुदारा** - शोभना नारी **चारु मित्रं** - सुन्दरं सुहृदं **चिरं** - बहुकालं **वित्तं** - धनं (च) **न** - नहि (स्यात्) **दम्पती** - स्त्री-पुरुषौ **रोगयुक्तौ** - रोगपीडितः **अनुत्साह** - उत्साहहीनः **सन्तप्तकृत्** - संतापकारकः **हीनचेताः** -मतिहीनाः **विह्वलः** - अकिञ्चित्करः **लोलुपः** - अतितृष्णः **वीर्यवान्** - प्रभावशाली **कुतः** - कथं (स्यात्) ।

**भावार्थः-** यस्य सप्तमे मन्दः चेत् तस्य सुन्दरभार्या, हितेच्छुमित्रं च स्यात् । वित्तस्य सुखं बहुकालं न अर्थात् चिरकालिकं धनं न स्यात्, दम्पती सदैव रोगपीडितौ भवेताम् । अनुत्साहाभावात् सदैव दुःखितो भवति । तथा सः मतिहीनः, व्याकुलः, अतितृष्णः च भवति । सः जनः वीर्यवान् (प्रभावशाली) कथं भवेत् इति भावः।

**वियोगो जनानां त्वनौपाधिकानां विनाशो धनानां स को यस्य न स्यात् ।**

**शनौ रन्ध्रगे व्याधितः क्षुद्रदर्शी तदग्रे जनः कैतवं किं करोतु ॥ ८ ॥**

**अन्वयः-** रन्ध्रगे शनौ (सति) सः कः यस्य तु अनौपधिकानां जनानां वियोगः न स्यात्, धनानां विनाशः (न स्यात्) सः व्याधितः क्षुद्रदर्शी स्यात्, तदग्रे जनः किं कैतवं करोतु ।

**व्याख्या-** **रन्ध्रगे** - अष्टमस्थे, **शनौ** - मन्दः **सः कः** - को जनः, **यस्य तु** - यस्य हि **अनौपधिकानां** - उपाधिरहितानां **जनानां** - मनुष्याणां, **वियोगः न** - विरहः नहि **स्यात्** - भवेत् **धनानां** - वित्तानां **विनाशः न** - हानयः न (स्यात्) **सः** - नरः **व्याधितः** - रोगतः **क्षुद्रदर्शी** - परदोषान्वेषी (स्यात्) **तदग्रे** - तस्य पुरत **जनः** - नरः, **किं कैतवं** - कीदृशं (कपटं) **करोतु** - कर्तुं समर्थः ।

**भावार्थः-** अष्टमस्थे शनौ चेत् उपाधि रहितानां जनानां वियोगः स्यात् । अर्थात् भ्रातृमित्रादिकानां विनाशः स्यात्। शनिप्रभावात् जातकस्य वित्तानां नाशोऽपि भवति । जातकः रोगेन पीडितः परदोषान्वेषी च स्यात् । अर्थात् अन्येषां दोषदर्शनं करोति । एषः जातकः स्वयमेव वञ्चकचूडामणिः भवति । अतः तस्य सम्मुखे कोऽप्यन्यजनो कैतवं कर्तुं समर्थो न भवति ।

**मतिस्तस्य तिक्ता न तिक्तं तु शीलं रविर्योगशास्त्रे गुणो राजसः स्यात् ।**

**सुहृद्वर्गतो दुःखितो दीनबुद्ध्या शनिर्धर्मगः कर्मकृत् संन्यसेद्वा ॥ ९ ॥**

**अन्वयः-** (यस्य) धर्मगः शनिः तस्य मतिः तिक्ता, किन्तु शीलं तु तिक्तं न (भवेत्), तस्य योगशास्त्रे रतिः, (तथा) राजसः गुणः स्यात् । दीनबुद्ध्या सुहृद्वर्गतः दुःखितः (स्यात्) सः कर्मकृत् वा संन्यसेत् ।

**व्याख्या-** **धर्मगः** - नवमस्थाने **शनिः** - मन्दः **तस्य** - नरस्य **मतिः** - बुद्धिः **तिक्ता** - तीक्ष्णा स्यात् **किन्तु शीलं तु** - चारित्र्यं, **तिक्तं** - तीक्ष्णं **न** - न (भवेत्), **तस्य** - जनस्य, **योगशास्त्रे** - योगाभ्यासे **रतिः**- प्रीतिः तथा **राजसः गुणः** - रजोगुणः **स्यात्** - भवेत् **दीनबुद्ध्या** - निम्नमत्या (स्यात्) **सुहृद्वर्गतः** - मित्रवर्गतः **दुःखितः** - खिन्नमनाः (स्यात्) **सः** - जनः **कर्मकृत्** - कर्मशीलः **वा** - अथवा, **संन्यसेत्**- संन्यासी भूत्वा विचरेत् ।

**भावार्थः-** यस्य जन्मलग्नात् नवमस्थाने शनिःस्थितः चेत् तस्य बुद्धिः तीक्ष्णा स्यात् । किन्तु चारित्र्यं तिक्तं न भवेत्। तस्य योगशास्त्रे रतिः तथा राजसी गुणवान् च भवेत् । दीनमत्या बन्धुवर्गतः दुःखितः स्यात् सः कर्मशीलः वा संन्यासी भूत्वा विचरेत् ।

**अजा तस्य माता पिता बाहुरेव वृथा सर्वतो दृष्टकर्माधिपत्यात् ।**

**शनैरेधते कर्मगः शर्म मन्दो जयो विग्रहे जीविकानां तु यस्य ।। १० ॥**

**अन्वयः-** (यस्य) कर्मगः मंदः (तस्य) माता अजा (स्यात्) (तस्य) बाहुः एव पिता (स्यात्) जीविकानां शर्म शनैः एधते, (तस्य) विग्रहे जयः, सर्वतः आधिपत्यात् वृथा दुष्टकर्म (आचरेत्) ।

**व्याख्या-** **कर्मगः** - दशमस्थाने **मन्दः** - शनिः (चेत्) **माता अजा** - जननी छागः **बाहुः एव** - बाहुबलमेव **पिता** - जनकः (स्यात्) **जीविकानां** - आजीविकानां **शर्म** - सुखं **शनैः** - मन्दं **एधते** - प्राप्यते **विग्रहे** - विवादे **जयः** - विजयः **सर्वतः** - विश्वतः **आधिपत्यात्** - अधिकारत्वात् **वृथा** - निष्कारणम् **दुष्टकर्म** - दंडनादिकर्म आचरेत् ।

**भावार्थः-** यस्य दशमस्थाने शनिः चेत् तस्य माता छागः भवेत् अर्थात् मृत्युकारणेन तस्या एव दुग्धपानं करोति । दशमे मन्दे चेत् आजीविकानां सुखं तु मन्दं-मन्दं मिलति अर्थात् शीघ्रं प्रगतिः न भवत्येव । वादे विवादे ताडनादि क्षेत्रोः वा विजयः स्यात् ।

**स्थिरं वित्तमायुः स्थिरं मानसं च स्थिरा नैव रोगादयो न स्थिराणि ।**

**अपत्यानि शूरः शतादेक एव प्रपञ्चाधिको लाभगे भानुपुत्रे ॥ ११ ॥**

**अन्वयः-** लाभगे भानुपुत्रे (तस्य) वित्तं स्थिरम्, आयुः स्थिरं, मानसं च (स्यात्) रोगादयः स्थिरा न, (तस्य) अपत्यानि स्थिराणि न, प्रपंचाधिकः शतात् एक एव शूरः (स्यात्) ।

**व्याख्या-** **लाभगे** - एकादशभावे, **भानुपुत्रे** - शनौ, **वित्तं** - धनं, **स्थिरम्** - निश्चलं **आयुः स्थिरं** - स्थिरायुवान्, **मानसं** - मतिः (च स्थिरः स्यात्) **रोगादयः** - गदादयः **स्थिरा न** -दीर्घकालयुक्ताः नैव भवन्ति **अपत्यानि** - सन्तानानि **स्थिराणि न** - दीर्घकालिकानि नैव भवन्ति **प्रपंचाधिकः** - रागद्वेषोधिकः **शतात्** - शतसंख्यकात् (जनात्) **एकः** मुख्यः **एव शूरः** - निपुणः स्यात् ।

**भावार्थः-** यस्य जन्मलग्नात् एकादशभावे मन्दः चेत् सः स्थिरायुवान् स्थिरद्रव्यवान् च भवति । तथा स्थिरमतिवान् च स्यात् । तस्य शरीरे रोगादयः स्थिरा : नैव भवन्ति । अर्थात् शीघ्रमेव निरोगित्वमवाप्नोति । सन्ततेः नाशः भवति अर्थात् संतानशोकः स्यात् । किन्तु प्रपञ्चकार्ये सः शताधिकमनुष्येभ्योऽपि शूरो भवति ।

**व्ययस्थे यदा सूर्यसूनौ नरःस्यादशूरोऽथवा निस्त्रपो मन्दनेत्रः ।**

**प्रसन्नो बहिर्नो गृहे लग्नपश्च व्ययस्थो रिपुध्वंसकृद्यज्ञभोक्ता ॥ १२ ॥**

**अन्वयः-** व्ययस्थे सूर्यसूनौ (तदा) नरः अशूरः निस्त्रपः, अथवा मन्दनेत्रः स्यात् । (सः) बहिः प्रसन्नः, गृहे (प्रसन्नः) न स्यात् । लग्नपः (सन्) व्ययस्थः (चेत्) (तदा) रिपुध्वंसकृत्, यज्ञभोक्ता (च) स्यात् ।

**व्याख्या-** **व्ययस्थे** - द्वादशगे, **सूर्यसूनौ** - शनौ तदा, **नरः** - जनः **अशूरः** - कातरः **निस्त्रपः**- निर्लज्जः, **अथवा** - वा **मंदनेत्रः** - मन्दद्रष्टियुक्तः स्यात् **बहिः** - परदेशे, **प्रसन्नः** - सुखी, **गृहे** - स्वगृहे न- (प्रसन्नः)

नहि, **लग्नपः** – लग्ननाथ **सन् व्ययस्थः** – द्वादशस्थानगतः चेत् **रिपुध्वंसकृत्**–शुत्रनाशकरः **यज्ञभोक्ता** – यज्ञद्रव्येन वैभवयुक्तः च स्यात् ।

**भावार्थः**- यस्य जन्मलग्नात् द्वादशस्थानगतः शनिः चेत् सः नरः कातरः, निर्लज्जः, वा मन्दद्रष्टियुक्तः च स्यात् । सः परदेशे एव प्रसन्नः अर्थात् सौख्यं लभते । गृहे सन् प्रसन्नो नैव स्यात् । यदा (मन्दः) लग्नेशः सन् व्ययभावगतः तदा नरः शत्रुनाशकर्ता यज्ञद्रव्यैश्च सम्पत्तिवान् च भवति ।

## 2. राहोः लग्नादिद्वादशभावफलम्

**स्ववाक्येऽसमर्थः परेषां प्रतापात् प्रभावात्समाच्छादयेत्स्वान्परार्थान् ।**

**तमो यस्य लग्ने स भग्नारिवीर्यः कलत्रेऽधृतिं भूरिदारोऽपि यायात् ॥ १ ॥**

**अन्वयः**- यस्य लग्ने तमः सः भग्नारिवीर्यः, परेषां प्रतापात् स्ववाक्ये असमर्थः (च स्यात्) (तथा) प्रभावात् स्वान् परार्थान् (च) समाच्छादयेत् । भूरिदारः अपि कलत्रे अधृतिं यायात् ।

**व्याख्या**- **यस्य** – जातकस्य **लग्ने** – लग्नस्थाने **तमः** – राहुः **सः** – नरः **भग्नारिवीर्यः** – शत्रुजेता **परेषां** – अन्येषां **प्रतापात्** – प्रभावात् **स्ववाक्ये** – स्ववाक्यपालने **असमर्थः** – निष्फलः (च स्यात्) तथा **प्रभावात्** – प्रभाववशात् **स्वान्** – स्वजातीयान् **परार्थान्** – अन्यार्थान् (परजातीयान्) **समाच्छादयेत्** – समाच्छादनं कुर्यात् **भूरिदारः** – बहुस्त्रीयुक्तः **अपि** – च **कलत्रे** – स्त्रीविषये **अधृतिं** – असन्तोषं **यायात्** – प्राप्नोति।

**भावार्थः**- यस्य जन्मलग्ने राहुः भवेत् सः नरः अन्येषां प्रतापात् स्ववाक्यपालने असमर्थो भवति । सः शत्रु विजयी तथा अन्येषां प्रभावात् स्वजातीनां तथा परजातीनां सर्वाणि साधयति । तथा बहुस्त्रीयुक्तोऽपि अयं नरः सन्तोषं न प्राप्नोति ।

**कुटुम्बे तमो नष्टभूतं कुटुम्बं मृषाभाषिता निर्भयो वित्तपालः ।**

**स्ववर्गप्रणाशो भयं शस्त्रतश्चेदवश्यं खलेभ्यो लभेत्पारवश्यम् ॥ २ ॥**

**अन्वयः**- (यस्य) कुटुम्बे तमः तस्य कुटुम्बं नष्टभूतं (स्यात्) मृषाभाषिता, निर्भयः वित्तपालः (च) (स्यात्) (तस्य) स्ववर्ग प्रणाशः, शस्त्रतः भयं (स्यात्) खलेभ्यः पारवश्यं अवश्यं लभेत् ।

**व्याख्या**- **कुटुम्बे तमः** – द्वितीयस्थः राहुः **कुटुम्बं** – स्वबन्धुजनः **नष्टभूतं** – नष्टं स्यात् **मृषा-भाषिता** – मिथ्या-भाषी **निर्भयः** – अभयः **वित्तपालः** – द्रव्यरक्षकः **(स्यात्) स्ववर्गं** – बन्धुवर्गं **प्रणाशः** – नाशकः **शस्त्रतः** – शस्त्रात् **भयं** – भीतिः **खलेभ्यः** – दुष्टेभ्यः **पारवश्यं** – पराधीनत्वं **अवश्यं** – निश्चयेन **लभेत्** संलभते ।

**भावार्थः**- यस्य जन्मलग्नात् द्वितीयभावे राहुः भवेत् तस्य कुटुम्बस्य नाशो भवति । सः नरः असत्यवक्ता, निर्भयः तथा कृपणो भवति । सः दुष्टजनेभ्यः पराधीनत्वं प्राप्नोति । शस्त्रेभ्यः बिभेति तथा तस्य बान्धवानां नाशो भवति ।

**न नागोऽथ सिंहो भुजो विक्रमेण प्रयातीह सिंही सुते तत्समत्वम् ।**

**तृतीये जगत्सोदरत्वं समेति प्रयातोऽपि भाग्यं कुतो यत्नहेतुः ॥ ३ ॥**

**अन्वयः**- इह तृतीये सिंहीसुते (सति जातकः) सिंहः नागः तत्समत्वं (इव) भुजा विक्रमेण जगत्सोदरत्वं यत्नहेतुः प्रयातोऽपि भाग्यं कुतः समेति ।

**व्याख्या**- **इह** – जन्मनि **तृतीये** – तृतीयस्थाने **सिंहीसुते** – राहुः (चेत्) **सिंहः** – सिंहः **नागः** – हस्ती **तत्समत्वं** – तत् सदृशं (तुल्यतां) **भुजा** – बाहुबलेन **विक्रमेण** –पराक्रमेण **जगत्सोदरत्वं** – संसारः भ्रातृभावत्वं **यत्नहेतुः** – उद्यमानः **प्रयातोऽपि** – प्राप्नोति किन्तु **भाग्यं** – सौभाग्यं **कुतः** – कस्मात् **समेति** – समानः भवति ।

**भावार्थः-** यस्य मनुष्यस्य तृतीय भावे राहुः भवेत्तदा सः मनुष्यः सिंहमगजाभ्याम् अधिकः पराक्रमी भवति । एवं च अखिलविश्वस्य भातृभावतया समानं व्यवहारं करोति । भाग्योदयेऽपि उद्यमात् द्रव्य प्राप्तकर्ता तथा प्रतापीः भवति ।

**चतुर्थे कथं मातृनैरुज्यदेहो हृदि ज्वालया शीतलं किं बहिः स्यात् ।**

**स चेदन्यथा मेषगो कर्कगो वा बुधर्क्षेऽसुरो भूपतेर्बन्धुरेव ॥ ४ ॥**

**अन्वयः-** चतुर्थे (स्थितः) असुरः चेत् (तस्य) मातृनैरुज्यदेहः कथं (स्यात्) हृदि ज्वालया बहिः शीतलं किं स्यात्। सः मेषगः कर्कगः बुधर्क्षे वा अन्यथा चेत्, (सः) भूपतेः बन्धुः एव (भवेत्)

**व्याख्या-** **चतुर्थे** - चतुर्थस्थाने **असुरः** - राहुः **चेत्** - तर्हि **तस्य** - नरस्य **मातृनैरुज्यदेहः** - मातुः देहारोग्यं **कथं** - कुतः(स्यात्) **हृदि** -हृदये **ज्वालया** - सन्तापेन **बहिः** - बाह्यभागे **शीतलं** - शैत्यं **किं** - कथं स्यात् **मेषगः** - मेषस्थः **कर्कगः** - कर्कस्थः **बुधर्क्षे** - कन्यामिथुनयोः वा अन्यथा **चेत्** - तदा नरः **भूपतेः** - नृपस्य **बन्धुः** मित्रम् एव भवेत् ।

**भावार्थः-** यदि चतुर्थस्थाने राहुः भवेत् तर्हि मनुष्यस्य माता रोगग्रस्ता भवति तथा सोऽपि व्याधियुक्तः पीडितो भवति। यदा मेषः वृषभः, कर्कः, कन्या तथा मिथुनः एतेषु राशिषु राहुः भवेत्तदा मातुः सुखं मिलति, एवं चित्तस्य स्थिरतां प्राप्नोति । सः पुरुषः राज्ञः बन्धुः स्यात् अर्थात् नृपस्य अतिप्रियो भवति ।

**सुते तत्सुतोत्पत्तिकृत्सिंहिकायाःसुतो भामिनीचिन्तया चित्ततापः ।**

**सति क्रोडरोगे किमाहारहेतुः प्रपञ्चेन किं प्रापकं दृष्टवर्ज्यम् ॥ ५ ॥**

**अन्वयः-** सुते सिंहिकायाः सुतः (स्थितः) तत् सुतोत्पत्तिकृत् (भवति) भामिनीचिन्तया चित्ततापः (करोति) क्रोडरोगे सति आहारहेतुः किं, (बहु) प्रपंचेन प्रापकं दृष्टवर्ज्यं किं (स्यात्) ।

**व्याख्या-** **सुते** - पञ्चमस्थाने **सिंहिकायाः सुतः** - राहुः (स्थितः) तस्य **सुतोत्पत्तिकृत्** - पुत्रोत्पत्तिकारको (भवति) **भामिनीचिन्तया** - भार्यायाः चिन्तया **चित्ततापः** - मनस्सन्तापं (करोति) **क्रोडरोगे** - कुक्षौगदे **आहारहेतुः** - भोजनस्य कारणं **किं** - किम् **प्रपंञ्चेन** - प्रयासेन **प्रापकं** - प्रापणीयं **दृष्टवर्ज्यं** - दृष्ट्या वर्जितं **किं** - अर्थात् अत्यधिक-प्रयासेनापि स्वल्पद्रव्याप्राप्तिर्भवति ।

**भावार्थः-** यदा पञ्चमभावे राहुः भवेत्तदा सः नरः पुत्रम् उत्पादयति । स्त्रीयाः क्रोधयुक्तस्वभावेन चिन्तया चित्तं तप्तं करोति । उदरे अग्निमान्द्यादि रोगाः उद्भवन्ति तथा बहुप्रयत्नेन स्वल्पं द्रव्यं प्राप्नोति ।

**बलं बुद्धिवीर्ये धनं तद्वशेन स्थितो वैरिभावेऽपि येषां जनानाम्**

**रिपूणामरण्यं दहेदेव राहुः स्थिरं मानसं तत्तुला नो पृथिव्याम् ॥ ६ ॥**

**अन्वयः-** येषां जनानां वैरिभावे स्थितः राहुः (सः) रिपूणां अरण्यं अपि दहेत् एव, बलं बुद्धिवीर्ये धनं तद्वशेन (याति) मानसं च स्थिरं (स्यात्) पृथिव्यां तत् तुला (कोऽपि)नो (अस्ति) ।

**व्याख्या-** **येषां जनानां** - मनुष्याणां **वैरिभावे स्थितः** - षष्ठेस्थितः **राहुः** -तमः **रिपूणां** - शत्रूणां **अरण्यं** - वनं **अपि** - च **दहेत् एव** - दहत्येव **बलं** - पराक्रमं **बुद्धिवीर्ये** - बुद्धिचातुर्ये **धनं** - द्रव्यं **तद्वशेन** - तस्य वशेन **मानसं** - चित्तं **स्थिरं** - स्थिरं **पृथिव्यां** - भूमौ **तत्तुला** - तत्तुल्यं (कोऽपि) **नो** - नहि स्यात् ।

**भावार्थः-** यस्य जन्म काले षष्ठमे स्थाने राहुः भवेत्तदा सः नरः शत्रूणां अरण्यं दहति (अर्थात् शत्रूसमूहान् नाशयति)। सः नरः बलं, बुद्धिं तथा पराक्रमवशाद् धनसञ्चयं करोति । स्थिरचितं भवति तथा पृथिव्यां तत्तुल्यो कोऽपि न भवति ।

**विनाशं लभेयुर्द्युने तद् युवत्यो रुजो धातुपाकादिना चन्द्रमर्दी ।**

**कटाहे यथा लोडयेज्जातवेदा वियोगापवादाः शमं न प्रयान्ति ॥ ७ ॥**

**अन्वयः-** (यस्य) द्युने चन्द्रमर्दी (सति) (तदा) तद् युवत्यः कटाहे धातुपाकादिनां रुजा जातवेदाः (पतन्) विनाशं लभेयुः सः (बन्धु) वियोगापवादाः लोडयेत् शमं न प्रयान्ति ।

**व्याख्या-** **द्युने** - सप्तमस्थाने **चन्द्रमर्दी** - राहुः (चेत्) **तद् युवत्यः** - तस्य भार्याः **कटाहे** - कटायां (स्थिते) **धातुपाकादिना** - धातुपकवानेन **रुजा** - रोगेन **जातवेदाः** - उत्पन्नाग्नौ **विनाशं** - नाशं **लभेयुः** - प्राप्नुयुः **तथा** - तदा **तस्य** - नरस्य **वियोगापवादाः** - बन्धुविश्लेषदुःखानि (लोकनिन्दां) **यथा लोडयेत्** - संतापयेत् **शमं** - शान्तिं **न** - नो **प्रयान्ति** - प्राप्नोति ।

**भावार्थः-** यदा सप्तमस्थाने राहुः भवेत्तदा तस्य मनुष्यस्य स्त्रियः लोह पात्रे तैलमिव धातुपाकादि रोगात् दुःखेन नश्यन्ति । एवं च सः बन्दुवियोगात् दुःखाप्तः तथा लोकनिन्दया शान्तिं न प्राप्नोति ।

**नृपैः पण्डितैर्वन्दितो निन्दितः स्वैः सकृद्भाग्यलाभोऽसकृद् भ्रंश एव ।**

**धनं जातकं तं जनाश्च त्यजन्ति श्रमग्रन्थिकृद् रन्ध्रगो ब्रध्नशत्रुः ॥ ८ ॥**

**अन्वयः-** रन्ध्रगः ब्रध्नशत्रुः श्रमग्रन्थिकृत् (रोगं करोति) तं जातकं जनाः घनं च त्यजन्ति, (सः) नृपैः पण्डितैः (च) वन्दितः स्वैः (च) निंदितः (स्यात्), भाग्यलाभः सकृत्, असकृत् भ्रंशः एव (स्यात्) ।

**व्याख्या-** **रन्ध्रगः** - अष्टमस्थः **ब्रध्नशत्रुः** - राहुः **श्रमग्रन्थिकृत्** - श्रमेणग्रन्थिं बहुप्रयासेन वातगोलकं (वायुरोगं करोति) **जातके** - नरे **तं घनं** - पैतृक द्रव्यं **जनाः** - पुरुषाः **त्यजन्ति** - तिरस्कारं (करोति) **नृपैः** - राजभिः **पण्डितैः** - विद्वद्भिः **वन्दितः** - पूजितः (स्यात्) **स्वैः** - स्वजनैः **निंदितः** - अपमानितः **भाग्यलाभः** - भाग्यस्य लाभः **सकृत्** - एकवारमेव **असकृत्** - मुहुः मुहुः **भ्रंशः** -नाशः भवति।

**भावार्थः-** यदा अष्टमभावे राहुः भवेत्तदा सः नरः उदरे वातगोलकं गदेन अर्थात् (वायुः रोगादिग्रसितो भवति) । तं नरं जनाः त्यजन्ति तथा पितृधनमपि त्यजति । सः नरः राजभिः पण्डितैः च पूजितः तथा स्वजनेभ्यः निन्दितो भवति । तस्य लाभः सकृत् एव भवति किन्तु कार्यहानिः वारंवार भवत्येव ।

**मनीषी कृतं न त्यजेद्बन्धुवर्गः सदापालयेत्पूजितः स्याद् गुणैः स्वैः ।**

**सभाद्योतको यस्य चेत् त्रिकोणे तमः कौतुकी देवतीर्थे दयालुः ॥ ९ ॥**

**अन्वयः-** यस्य त्रित्रिकोणे तमः चेत् (सः) मनीषी, स्वैः गुणैः पूजितः, सभाद्योतकः, देवतीर्थे कौतुकी दयालुः (च) स्यात्, (सः) कृतं न त्यजेत् । सदा बंधुवर्गः पालयेत् ।

**व्याख्या-** **यस्य** - जातकस्य **त्रित्रिकोणे** - नवमस्थाने **तमः** - राहुः **चेत्** - तदा **मनीषी** - बुद्धिमान् **स्वैःगुणैः** - स्वस्य गुणेन **पूजितः** - वन्दनीयः **सभाद्योतकः** - सभायां प्रकाशकः **कौतुकी** - कौतुकयुक्तः **देवतीर्थे** - ईश्वरक्षेत्रे **दयालुः** - दयावान् **स्यात्,** - भवेत् **कृतं न त्यजेत्** - उपकारं न त्यजति **सदा** - सर्वदा **बंधुवर्गः** - भ्रातृवर्गः **पालयेत्** - पालको भवति ।

**भावार्थः-** यस्य नवमस्थाने राहुः भवेत्तदा सः नरः बुद्धिमान्, स्वस्य गुणैः पूजितः, दयावान्, देवतीर्थेषु प्रसन्नभूतः, सभायां प्रकाशकः, कृतम् उपकारं न मन्यमानः सर्वदा बन्धुवर्गस्य पालको भवति (अर्थात् पालयति) ।

**सदा मलेच्छसंसर्गतोऽतीवगर्वं लभेन्मानिनीकामिनीभोगमुच्चैः ।**

**जनैर्व्याकुलोऽसौ सुखं नाधिशेते मदार्थव्ययी क्रूरकर्मा खगेऽगौ ॥ १० ॥**

**अन्वयः-** (यस्य) खगे (स्थिते) अगौ (चेत्) असौ मदार्थव्ययी क्रूरकर्मा (च भवति) उच्चैः जनैः व्याकुलः (सन्) सुखं न अधिशेते । सदा म्लेच्छ संसर्गतः अतीव गर्वं लभते, सः मानिनी कामिनीभोगं लभते ।

**व्याख्या-** **खगे** - दशमस्थे **अगौ** - राहुः चेत् **असौ** - जनः **मदार्थव्ययी** - मदे अनवधाने अर्थव्ययी **क्रूरकर्मा** - दुष्टकार्यकर्ता (स्यात्) **उच्चैः जनैः** - उत्तममनुष्यैः (क्लेशेन) **व्याकुलः** - चिन्तया **सुखं** - सुखेन **न अधिशेते** - शयनं न करोति **सदाम्लेच्छानां** - सर्वदा म्लेच्छानां **संसर्गतः** - संगतेन (संसर्गात्) **अतीव-गर्वं** - बहुगर्विष्ठं **लभते**- प्राप्नोति **मानिनी** - मानवती **कामिनीभोगं** - स्त्रीणां भोगरतः स्यात् ।

**भावार्थः-** यस्य दशमस्थाने राहुः भवेत्तदा सः नरः म्लेच्छजनानांसंसर्गात् (हीनजनात्) गर्व प्राप्नोति (अर्थात् विदेशीजनानां संबन्धात् गर्विष्ठः स्यात्) । सः मानवतीनां स्त्रीणां भोक्ता एवं उच्चमनुष्याणां क्लेशेन रात्रौ निद्रारहितः, तथा प्रमादात् द्रव्यनष्टकर्ता, एवं क्रूरकर्माणि करोति ।

**सदाम्लेच्छतोऽर्थं लभेत्साभिमानश्चरेत् किंकरेण व्रजेत् किं विदेशम् ।**

**परार्थाननर्थी हरेद्धूर्तबन्धुः सुतोत्पत्तिसौख्यं तमो लाभगश्चेत् ॥ ११ ॥**

**अन्वयः-** (यस्य) लाभगः तमः चेत् (तदा) सदा सुतोत्पत्तिसौख्यं म्लेच्छतः अर्थं (च) लभेत्, किंकरेण (सह) साभिमानः चरेत्, विदेशं किं व्रजेत्, सः धूर्तबन्धुः अनर्थी परार्थान् च हरेत् ।

**व्याख्या-** **लाभगः** - एकादशस्थाने **तमः** - राहुः **चेत्** - तदा **सदा** - सर्वदा **सुतोत्पत्तिसौख्यं** - पुत्रः उत्पन्नः सुखं **म्लेच्छतः** - हीनजनात् **अर्थं** -धनं **लभेत्** - प्राप्यते **किंकरेण** - सेवकेन (सह) **साभिमानः** - अभिमानपूर्वकः **चरेत्** - गच्छेत् किं - किमर्थं **विदेशं** - दूरदेशं **व्रजेत्** - गच्छेत् (गृहेस्थित एव सर्वम् लभेत्) **सः** - जनः **धूर्तबन्धुः** -धूर्तबभ्राता **अनर्थी** - पैशून्येन (सर्वानर्थकारी) **परार्थान्** - अन्येषां (धनं) **हरेत्** - गृह्णीयात् (तद्भिया सर्वे ददति इति) भवेत् ।

**भावार्थः-** यस्य मनुष्यस्य लाभभावे राहुः भवेत्तदा सः नरः पुत्रसुखं तथा म्लेच्छेभ्यः द्रव्यं प्राप्नोति । सः सेवकैः सह अभिमानपूर्वकं संचरेत्, तथा सः किमर्थं विदेशं गच्छेत् ? (अर्थात् सः गृहे एव सम्पूर्णसम्पत्तिं प्राप्नोति)। नरस्य धूर्तैः सह मित्रता भवति अतः तस्य भयात् एव सर्वे द्रव्यं ददति ।

**तमो द्वादशे दीनता पार्श्वशूलं प्रयत्ने कृतेऽनर्थतामातनोति ।**

**खलैर्मित्रता साधुलोके रिपुत्वं विरामे मनो वाञ्छितार्थस्य सिद्धिम् ॥ १२ ॥**

**अन्वयः-** द्वादशे (स्थितः) तमः दीनतां पार्श्वशूलं (च करोति) प्रयत्ने कृते (अपि) अनर्थतां (ददाति) खलैः मित्रतां, साधुलोके रिपुत्वं, विरामे मनोवांछितार्थस्य सिद्धिं (च) आतनोति ।

**व्याख्या-** **द्वादशे** - द्वादशस्थाने **तमः** - राहुः **दीनतां** - दीनत्वं **पार्श्वशूलं** - क्रोडे वातपीडां करोति **प्रयत्ने कृते** - यत्ने कृतेऽपि **अनर्थतां** - स्वेष्टकार्ये वैपरीत्यं **खलैः** - दुष्टैः **मित्रतां** - मित्रत्वं **साधुलोके** - सज्जने **रिपुत्वं** - शत्रुत्वं **विरामे** - अन्तेः **मनोवांछितार्थस्य** - मन-चिन्तितार्थस्य **सिद्धिं** - परिणामं **आतनोति** - प्राप्नोति ।

**भावार्थः-** यस्य द्वादशभावे राहुः भवेत्तदा सः नरः दीनः, पार्श्वशूलः (क्रोडे वातपीडां) भवति । सः दुर्जनेभ्यः मित्रताम् एति तथा सज्जनेभ्यः शत्रुतामाचरति । एवं च प्रयत्ने कृतेऽपि (उद्योगे) सफलतां न याति । अन्तेः नरः मनोवाञ्छितार्थस्य परिणामं प्राप्नोति ।

## स्वाध्यायः

**१. अधस्तनेषु प्रश्नेषु योग्यमुत्तरं चित्वा लिखत ।**

(१) शनिः प्रथमभावे किं ददाति?

(क) रूपम् (ख) सुखम् (ग) धनम् (घ) कुरूपम्

(२) शनिः द्वितीयभावे चेत् कीदृशीं वाणीं ददाति ?

(क) मृदुवाणीम् (ख) कटुवाणीम् (ग) मधुवाणीम् (घ) तिक्तवाणीम्

(३) चतुर्थे शनिः कं रोगं करोति ?

(क) वातरोगम् (ख) कफरोगम् (ग) पित्तरोगम् (घ) त्रिरोगम्

(४) मन्दः पञ्चमे किं फलं ददाति ?

(क) अपत्यम् (ख) कन्याम् (ग) पुत्रसुखम् (घ) पुत्रदुखम्

(५) लाभगे शनिः किं प्रयच्छति ?

(क) धनम् (ख) पुत्रम् (ग) शीलम् (घ) रोगम्

(६) लग्ने कः ग्रहः मानवं स्वार्थी करोति ?

(क) गुरुः (ख) शनिः (ग) राहुः (घ) शुक्रः

(७) तृतीये राहुः किं यच्छति ?

(क) भाग्यम् (ख) दौर्भागम् (ग) दुःखम् (घ) कष्टम्

(८) पञ्चमस्थाने राहुः कं रोगं जनयति ?

(क) नेत्ररोगम् (ख) उदररोगम् (ग) कण्ठरोगम् (घ) पादरोगम्

(९) राहुः षष्ठस्थाने कं नाशयति ?

(क) परिवारम् (ख) दुःखम् (ग) गृहम् (घ) शत्रुम्

(१०) राहुः कर्मस्थाने तदा नरः कीदृशं मार्गमवलम्बते ?

(क) क्रूरमार्गम् (ख) सत्यमार्गम् (ग) राजमार्गम् (घ) भक्तिमार्गम्

**२. एकैक-वाक्येनोत्तराणि लिखत ।**

(१) जनः वित्तेन परिपूर्णः कदा भवति ?

(२) मनुष्यः क्लेशभागी कदा भवति ?

(३) नरः बहुस्त्रीयुक्तो कदा स्यात् ?

(४) लाभगे भानुपुत्रे विद्यमाने सति किं स्थिरा न भवन्ति ?

(५) राहुः द्वितीये चेत् कस्य नाशो भवति ?

(६) म्लेच्छजनानां संसर्गात् नरः किं प्राप्नोति ?

(७) क्रोडे वातपीडा कदा भवति ?

**३. श्लोकपूर्तिं कृत्वा भावार्थो लेख्यः ।**

(१) चतुर्थे शनौ ................ वातरोगी ।

(२) सुदारा न ................. लोलुपः स्यात् ।

(३) सुते ....................... प्रापकं दुष्टवर्ज्यम् ।

(४) तमोद्द्वादशे .......................... सिद्धिम् ।

४. **अ-विभागेन सह ब-विभागेन सह सुयोजयतु ।**

| अ | ब |
|---|---|
| (१) सुन्दरभार्या | (१) तनुस्थे अर्कजे |
| (२) कुटुम्बस्य नाशः | (२) पञ्चमे शनौ |
| (३) दीन्त्वम् | (३) द्युनगे शनौ |
| (४) धनेनातिपूर्णः | (४) कुटुम्बे तमः |
| (५) प्रजाहेतु दुःखी | (५) वैरिभावे राहुः |
| (६) शत्रुहन्तारः | (६) द्वादशेतमः |

५. **टिप्पणी लेख्या ।**

(१) पञ्चमस्थाने शनिः

(२) कर्मस्थाने शनिः

(३) आयस्थाने राहुः

(४) चतुर्थस्थाने राहुः

६. **विस्तरेणोत्तराणि लिखत ।**

(१) तनुभावस्थितः शनेः फलं लिखत ।

(२) अष्टमस्थाने शनिः किं करोति ।

(३) भाग्यस्थः शनेः वर्णनं कुरुत ।

(४) प्रथमभावस्थितः राहोः ग्रन्थोक्तदिशया वर्णनं कुरुत ।

(५) सप्तमभावे स्थितराहोः वर्णनं कुरुत ।

**अध्यापकानां कृते**

- शनिराह्वोः विषये चर्चा तथा अन्योदाहारणपूर्वकचर्चा विधेया ।

**छात्राणां प्रवृत्तिः**

- होरागमज्ञैः प्रदत्त शनिराह्वो विशेषफलानि संशोध्य लेखनीयानि ।

●

# १० तन्वादिद्वादशभावस्थ-केतुग्रहफलानि

## प्रास्ताविकम्

वयम् अन्तरिक्षे दृश्यमानपदार्थानां विषये पूर्वे ज्ञातवन्तः । रात्रौ गगने विविधप्रकारस्य तारकाणाम् आस्तरणं आस्तरितमिव दृश्यते । सम्पूर्णव्योममण्डलं तारकाच्छादितं दृश्यते । व्योम्नि दृश्यमाण-पृथ्विकेन्द्रित - अनन्तशक्तियुक्तम् एनं काल्पनिकगोलाकारं वयं गगनाच्छादित-आस्तरणत्वेन विद्मः । अस्मिन् प्रकरणे गगनस्थित सूर्यमण्डलस्य केतुग्रहविषये शुभाशुभाख्य-फलवर्णनं प्रति गच्छामः ।

## 1. केतुग्रहफलानि

**तनुस्थः शिखी बान्धवक्लेशकर्ता तथा दुर्जनेभ्यो भयो व्याकुलत्वम् ।**

**कलत्रादिचिन्ता सदोद्वेगता च शरीरे व्यथा नैकधा मारुती स्यात् ॥ १ ॥**

**अन्वयः-** तनुस्थः शिखी बांधवक्लेशकर्ता (स्यात्) तथा दुर्जनेभ्यः भयं व्याकुलत्वं च करोति । (तस्य) कलत्रादि-चिन्ता सदा उद्वेगता च, शरीरे नैकधा मारुती व्यथा स्यात् ।

**व्याख्या-** **शिखी** - केतुः, **तनुस्थः** - लग्नस्थः **बांधवक्लेशकर्ता** - भ्रातृभिः कलहकारकः **तथा** - एवं **दुर्जनेभ्यः** - दुष्टजनेभ्यः **भयं** - भीतिः स्यात् **व्याकुलत्वं** - मनोव्यग्रतां **च करोति** - भवति, **कलत्रादि** - स्त्रीपुत्रादि, **चिन्ता** - व्यग्रता, **सदा उद्वेगता** - नित्यं उद्वेगः (चित्तभ्रमः स्यात्), **शरीरे** - देहे, **नैकधा** - अनेकधा, **मारुती** - वातरोगः **व्यथा** - पीडा, **स्यात्** - भवति ।

**भावार्थः-** यस्य मनुष्यस्य जन्मकाले लग्नभावे केतुः भवेत् सः जातकः भ्रातृभिः सह कलहकर्ता तथा दुर्जनेभ्यः भीतो भवति । तस्य मनः व्याकुलतां प्राप्नोति तथा स्त्र्यादेः चिन्तया सदा उद्विग्नो भवति । तस्य शरीरे वातरोगेन अनेकधाः पीडाः भवन्ति ।

**धने केतुरव्यग्रता किं नरेशाद्धने धान्यनाशो मुखे रोगकृच्च ।**

**कुटुम्बाद्विरोधो वचः सत्कृतं वा भवेत्स्वे गृहे सौम्यगेहेऽतिसौख्यम् ॥ २ ॥**

**अन्वयः-** केतुः धने मुखे रोगकृत्, धने नरेशात् अव्यग्रता किं (स्यात्) धान्यनाशः कुटुम्बात् विरोधः (च) भवेत् (तस्य) वचः सत्कृतं वा किम् ? स्वेगृहे सौम्यगृहे (च) अतिसौख्यं (स्यात्) ।

**व्याख्या-** **केतुः** - शिखी **धने** - द्वितीयभावे **मुखे रोगकृत्** - मुखे रोगकरः **धने** - द्रव्यविषये **नरेशात्** - नृपात् (राज्ञः सकाशात्) **अव्यग्रता** - चिन्ता **किं धान्यनाशः** -धान्याश्रितस्थानः नाशः **कुटुम्बात्** - बन्धुजनात् **विरोधः** - कलहः **भवेत्** - स्यात् **वचः सत्कृतं** - वचनं सत्कारयुक्तं **वा** - उत **किम्** - अभावः **स्वे गृहे** - स्वगृहे **सौम्यगृहे** - शुभग्रहे **अतिसौख्यं** - अत्यन्तसुखम् इति ।

**भावार्थः-** यदि द्वितीयभावे केतुः भवेत् तर्हि धनविषये राज्ञोऽव्यग्रता, धान्यस्य तथा आश्रितस्थानस्य नाशः, मुखरोगः, कुटुम्ब-मित्रादिभिः साकं विरोधः, तथा मधुरवचनस्य सत्कारस्य चाभावं कारयति । यदायं केतुः सौम्यग्रहेण सह तथा स्वगृहे भवेत्तदाऽन्त्यन्तः सुखकारको भवति ।

**शिखी विक्रमे शत्रुनाशं विवादं धनं भोगमैश्वर्यतेजोऽधिकं च ।**

**सुहृद्वर्गनाशं सदा बाहुपीडां भयोद्वेगचिन्ताकुलत्वं विधत्ते ॥ ३ ॥**

**अन्वयः-** शिखी विक्रमे (स्थितः) शत्रुनाशः विवादं धनं भोगं ऐश्वर्यं तेजोऽधिकं सुहृद्वर्गनाशं सदा बाहुपीडां भयोद्वेगचिन्ताकुलत्वं च विधत्ते ।

**व्याख्या-** **शिखी** - केतुः **विक्रमे** - तृतीयस्थाने **शत्रुनाशः** - शत्रुहननकर्ता **विवादं** - विरोधं **धनं** - वित्तं **भोगं** - विषयसुखं **ऐश्वर्यं तेजोऽधिकं** - अधिकमैश्वर्यं तेजः (भाग्यवान्) **सुहृद्वर्गनाशं** - मित्रवर्गादिनाशं **सदा** - नित्यं **बाहुपीडां** - भुजायां पीडां **भयोद्वेगचिन्ताकुलत्वं** - भय- उद्वेग - चिन्ता - व्याकुलता **च** - एवं **विधत्ते** - भवति ।

**भावार्थः-** यस्य तृतीयभावे केतुः भवेत् सः नरः शत्रुहननकर्ता, विवादकर्ता, धनभोगैश्वर्यं, विषयसुखं, तेजः तथा मित्रवर्गादिनाशः कर्ता भुजायां पीडा, भयः, उद्वेगं, चिन्ताम्, व्याकुलताम् एतानि फ़लानि प्राप्नोति ।

**चतुर्थे च मातुः सुखं नो कदाचित्सुहृद्वर्गतः पैतृकं नाशमेति ।**

**शिखी बन्धुवर्गात्सुखं स्वोच्चगेहे चिरं नो वसेत्स्वे गृहे व्यग्रता चेत् ॥ ४ ॥**

**अन्वयः-** शिखी चतुर्थे (स्यात्) (तदा) मातुः सुहृद्वर्गतः (च) कदाचित् सुखं न (स्यात्) पैतृकं (धनं) नाशम् एति, स्वेगृहे चिरं न वसेत् चेत् व्यग्रता (स्यात्) स्वोच्चगेहे बन्धुवर्गात् सुखं (भवेत्) ।

**व्याख्या-** **शिखी** - केतुः **चतुर्थे** - चतुर्थभावे **मातुः** - जनन्याः (सुखं न) **सुहृद्वर्गतः** - भ्रातृवर्गात् **कदाचित्** - कदाचन **सुखं न** - सौख्यं न **पैतृकं** - पितृसंबन्धि (धनं) **नाशं** - नष्टं **एति** - प्राप्नोति **स्वे गृहे** - स्वगृहे **चिरं** - बहुकालं **न वसेत्** - न वसति **चेत् व्यग्रता** - चिन्ता स्यात् **स्वोच्चगेहे** - धनुषि वा स्वगृहे **बन्धुवर्गात्** - भ्रातृवर्गात् **सुखं** - सौख्यं प्राप्नोति ।

**भावार्थः-** यदि चतुर्थ-स्थाने केतुः भवेत् तदा मातुः सुखं न भवेत्, सुहृद्वर्गेभ्यः सुखं न मिलति तथा पितुः धनादि नश्यति । सः नरः स्वगृहे चिरकालं न वसति तथा मनसि व्याकुलताम् अनुभवति । यदा अयं केतुः उच्चः वा स्वगृही भवेत् तदा बन्धुवर्गात् सुखं प्राप्नोति ।

**यदा पञ्चमे राहुपुच्छं प्रयाति तदा सोदरे घातवातादिकष्टम् ।**

**स्वबुद्धिव्यथा सन्ततं स्वल्पपुत्रः स दासो भवेद्वीर्ययुक्तो नरोऽपि ॥ ५ ॥**

**अन्वयः-** यदा राहुपुच्छं पञ्चमे प्रयाति तदा सोदरे घातवातादिकष्टं, संततं बुद्धिव्यथा, स्वल्पपुत्रः (च) (स्यात्) वीर्ययुक्तः अपि स नरः दासः भवेत् ।

**व्याख्या-** **यदा** -जन्मकाले **राहुपुच्छं** - केतु **पञ्चमे** - पञ्चमस्थाने **प्रयाति** - भवति **तदा** - चेत् **सोदरे** - सहोदरभ्रात्रे **घातवातादिकष्टं** - शस्त्र - वातादिरोगेण क्लेशः **सन्ततं** - संतापं **बुद्धिव्यथा** - मतिपीडा **स्वल्पपुत्रः** - अल्पसुतसुखं (स्यात्) **वीर्ययुक्तः** - पराक्रमयुक्तः **अपि** - च **स नरः** - जातकः **दासः** - सेवकः **भवेत्** - स्यात् ।

**भावार्थः-** यस्य जन्मकाले पञ्चमभावे केतुः भवेत् तर्हि सहोदरभ्रातुः घातकमेवं वातादि कष्टं करोति । अर्थात् शस्त्रघातेन एवं वातादिरोगेन क्लेशितो भवति । एवं स्वधियः कारणात् दु:खं प्राप्नोति । स्वल्पं संतानसुखं प्राप्नोति तथा सः नरः पराक्रमयुक्तोऽपि सेवको भवति ।

**तमः षष्ठभागे गते षष्ठभावे भवेन्मातुलान्मानभङ्गो रिपूणाम् ।**

**विनाशश्चतुष्पात्सुखं तुच्छचित्तं शरीरे सदाऽनामयं व्याधिनाशः ॥ ६ ॥**

**अन्वयः-** तमः षष्ठभागे षष्ठभावे गते (सति) मातुलान् मानभंगः, रिपूणां विनाशः, चतुष्पात् सुखं, तुच्छवित्तं, शरीरे सदा अनामयं, व्याधि-नाशः (च) भवेत् ।

**व्याख्या-** **तमः** - केतुः **षष्ठभागे** - षष्ठांश कुण्डल्यां **पष्ठभावे गते** - षष्ठे भावे स्थितः **मातुलान्** - मातृभ्रातृन् **मानभंगः** - अपमानितः स्यात् **रिपूणां** - शत्रूणां **विनाशः** - नाशं करोति **चतुष्पात्** - गोमहिष्यादीनां **सुखं** - सौख्यं (स्यात्) **तुच्छवित्तं** - स्वल्पं धनं स्यात् **शरीरे** - देहे **सदा** - नित्यं **अनामयं** - आरोग्यं **व्याधिनाशः** - रोगहीनः **भवेत्** - स्यात् ।

**भावार्थः-** यदा षष्ठस्थाने केतुः भवेत् तदा सः नरः मातुलात् अपमानितो भवति तथा शत्रूणां नाशकः स्यात् । पशूनां सुखं मिलति, दीनचित्तयुक्तो तथा निरोगी भवति । तथा रोगः भवेत् तदा शीध्रं शान्तः भवति ।

**शिखी सप्तमे भूयसी मार्गचिन्तानिवृत्तः स्वनाशोऽथवा वारिभीतिः ।**

**भवेत्कीटगः सर्वदा लाभकारी कलत्रादिपीडा व्ययो व्यग्रता चेत् ॥ ७ ॥**

**अन्वयः-** सप्तमे शिखी भूयसी मार्गचिन्ता (भवेत्) (सः) निवृत्तः स्वनाशश्च स्यात् अथवा तस्य वारिभीतिः (भवेत्) कलत्रादिचिन्ता व्ययः व्यग्रता(च) (भवेत्) कीटगः सर्वदा लाभकारी (स्यात्) ।

**व्याख्या-** **सप्तमे** - सप्तमस्थाने **शिखी** - केतुः **भूयसी** - बह्वी **मार्गचिन्ता** - मार्ग-संबन्धि-चिन्तां करोति **निवृत्तः** - मार्गतः पुनः आयाति **स्वनाशश्च** - धननाशः भवति **अथवा** - वा **वारिभीतिः** - जलभयः **कलत्रादिचिन्ता** - स्त्रीपुत्रादिचिन्ता स्यात् **व्ययः** - अर्थव्ययः **व्यग्रता** - उद्वेगता स्यात् **कीटगः** - वृश्चिकराशिस्थः **सर्वदा** - सदैव **लाभकारी** - लाभदायी स्यात् ।

**भावार्थः-** यस्य सप्तमभावे केतुः भवेत्तदा सः नरः मार्गचिन्तायुक्तो एवं तस्य धननाशो भवति । तथा जलात् बिभेति एवं स्त्रीपुत्रादीनां पीडा तथा द्रव्यकारणात् मनोव्यग्रो भवति । यदा केतुः वृश्चिकराशौ तर्हि संपूर्णकाले लाभदायी भवति ।

**गुदं पीड्यतेऽर्शादिरोगैरवश्यं भयं वाहनादेः स्वद्रव्यस्य रोधः ।**

**भवेदष्टमे राहुपुच्छेऽर्थलाभः सदा कीटकन्याजगो युग्मगे तु ॥ ८ ॥**

**अन्वयः-** अष्टमे राहुपुच्छे (स्थिते) (तस्य) अर्शादिरोगैः गुदम् अवश्यं पीड्यते, वाहनादेः भयं, स्वद्रव्यस्य रोधः, (च) भवेत् । कीटकन्याजगः युग्मगे तु अर्थलाभः (स्यात्) ।

**व्याख्या-** **अष्टमे** - अष्टमस्थाने **राहुपुच्छे** - केतुः **अर्शादिरोगैः** - बवाशीरः (भगंदरादि पीडां) **गुदं** - गुदारोगेन **अवश्यं** - अनिवार्यं **पीड्यते** - पीडां प्राप्नोति **वाहनादेः** - यानादेः **भयं** - भीतिः **स्वद्रव्यस्य** - धनस्य **रोधः** - अवरोधः **भवेत्** - स्यात् **कीटकन्याजगः** - वृश्चिक - कन्या - मेषगः **युग्मगे** - मिथुनस्थः **तु** - (अवश्यं) **अर्थलाभः** - द्रव्यलाभः स्यात् ।

**भावार्थः-** यस्य अष्टमस्थाने केतुः भवेत् सः नरः बवाशीरः (भगंदरादि-पीडां) गुदारोगैः पीडितो भवति । यानादिभ्यः बिभेति तथा द्रव्यस्य अवरोधो भवति । एवं वृश्चिक - कन्या - मिथुन - मेष तथा वृषभः एतासु राशिषु केतुः भवेत्तदा संपूर्णकाले लाभदायकः भवति ।

**शिखी धर्मभावे यदा क्लेशनाशः सुतार्थी भवेन्म्लेच्छतो भाग्यवृद्धिः ।**

**सहोत्थव्यथां बाहुरोगं विधत्ते तपोदानतो हास्यवृद्धिं तदानीम् ॥ ९ ॥**

**अन्वयः-** यदा धर्मभावे शिखी तदानीं क्लेशनाशः, सुतार्थी (स्यात्) म्लेच्छतः भाग्यवृद्धिः, सहोत्थव्यथां, बाहुरोगं, तपोदानतो हास्यवृद्धिं (च) विधत्ते ।

**व्याख्या-** **यदा** - जन्मकाले **धर्मभावे** - नवमस्थाने **शिखी** - केतुः **तदानीं** - चेत् तर्हि **क्लेशनाशः** - कलहः तथा आत्मनः नाशः **सुतार्थी** - पुत्रवान् (स्यात्) **म्लेच्छतः** - क्षुद्रजनात् **भाग्यवृद्धिः**-भाग्यस्य उदयः **सहोत्थव्यथां** - भ्रातृणां पीडां **बाहुरोगं** - भुजाव्याधिः **तपोदानतो हास्यवृद्धिं** - तपसा दानेन उपहासयोग्यो **विधत्ते** - भवति ।

**भावार्थः-** यस्य नवमस्थाने केतुः भवेत् तस्य नरस्य क्लेशनाशः तथा सः पुत्रमिच्छति । म्लेच्छजातिभिः भाग्यवृद्धिं (धनलाभं) प्राप्नोति । भ्रातृभ्यः पीडा तथा बाहुरोगः भवति एवं च तपो-दानादिभिः कर्मभिः उपहासो भवति ।

**पितुर्नो सुखी कर्मगो यस्य केतुर्यदा दुर्भगं कष्टभाजं करोति ।**

**तदा वाहने पीडितं जातु जन्म वृषाजालिकन्यासु चेच्छत्रुनाशम् ॥ १० ॥**

**अन्वयः-** यदा यस्य कर्मगः केतुः तदा दुर्भगं कष्टभाजं (च) करोति, पितुः (सकाशात्) सुखी न (स्यात्) वाहने पीडितं वृषाजालिकन्यासु जातु जन्म चेत् तदा शत्रुनाशं करोति ।

**व्याख्याः-** **यदा** - जन्मकाले **यस्य** - नरस्य **कर्मगः** - दशमस्थः **केतुः** - शिखी **तदा** - चेत् **दुर्भगं** - भाग्यहीनः **कष्टभाजं** - व्यथापीडितः **करोति** -भवति **पितुः** - तातस्य **सुखी न** - सुखरहितः **वाहने** - याने **पीडितं** - दुःखितः भवति तथा **वृषाजालिकन्यासु** - वृष- मेष - वृश्चिक - कन्यासु **जातु** - उत्पन्नः **जन्म** - जन्मना केतुः चेत् **तदा शत्रुनाशं** - शत्रूणां नाशं **करोति** कुरुते ।

**भावार्थः-** यस्य जातकस्य दशमभावे केतुः भवेत् तदा सः नरः भाग्यरहितः, पितुः सुखरहितः, कष्टभोक्ता भवति। सः नरः कस्मिन्नपि काले यानात् (अश्वादितः) दुःखितो भवति । तथा यस्य केतुः मेषः - वृषभः - वृश्चिकः - कन्या एताषु राशिषु भवेत्तदा शत्रुनाशो भवति ।

**सुभाग्यः सुविद्याधिको दर्शनीयः सुगात्रः सुवस्त्रं सुतेजोऽपि तस्य ।**

**दरे पीड्यते सन्ततिर्दुर्भगो च शिखी लाभगः सर्वलाभं करोति ॥ ११ ॥**

**अन्वयः-** (यस्य) लाभगः शिखी सर्वलाभं करोति, (सः) सुभाग्यः, सुविद्याधिकः, दर्शनीयः, सुगात्रः, सुवस्त्रः, सुतेजः, (च) भवेत्, तस्य संततिः दुर्भगा, (सति) दरे पीड्यते ।

**व्याख्या-** **लाभगः** - एकादशस्थाने **शिखी** - केतुः **सर्वलाभं** - संपूर्णवस्तुनि प्राप्तकर्ता **करोति** - भवति **सुभाग्यं** - उत्तमः भाग्ययुक्तः **सुविद्याधिकः** -उत्तमविद्यायुक्तः **दर्शनीयः** - रमणीयः **सुगात्रः** - सुन्दराङ्गः **सुवस्त्रः**, - सुन्दरवस्त्रैः युक्तः **सुतेजः** - तेजस्वी **भवेत्** - जायेत **तस्य** - नरस्य **संततिः** - पुत्रः **दुर्भगा** - भाग्यहीनः स्यात् तथा **दरे** - उदरे **पीड्यते** - पीडां प्राप्नोति ।

**भावार्थः-** यस्य एकादशभावे केतुः भवेत्तदा सः नरः संपूर्ण वस्तूनां लाभप्राप्तकर्ता भवति । उत्तम भाग्यवान्, विद्वान्, दर्शनयोग्यः, सुन्दराङ्गयुक्तः (उत्तमशरीरवान्) सुन्दरवस्त्रैः युक्तः तथा तेजस्वी च भवति । सः सर्व प्रकारेण लाभं प्राप्नोति । तस्य पुत्रः उदरपीडायुक्तः तथा भाग्यहीनो भवति ।

**शिखी रिष्फगो बस्तिगुह्यांध्रिनेत्रे रुजा पीडनं मातुलान्नैव शर्म ।**

**सदा राजतुल्यं नरं सद्व्ययं तद्रिपूणां विनाशं रणेऽसौ करोति ॥ १२ ॥**

**अन्वयः-** असौ रिःफगः शिखी नरं राजतुल्यं (सुखं), सुद्ययं, रणे तद्रिपूणां विनाशं बस्तिगुह्यांध्रिनेत्रे रुजा पीडनं (च) । (तस्य) मातुलात् शर्म न करोति ।

**व्याख्या-** **असो** - अयं **रिःफगः** - द्वादशस्थाने **शिखी** - केतुः **नरं** - मनुष्यं **राजतुल्ये** - नृपवत् (सुखं करोति), **सुद्व्ययं** - धर्मादिकार्ये व्ययं **रणे** - संगरे **तद्रिपूणां** - तस्य शत्रूणां **विनाशं** - नाशं (करोति) **बस्तिगुह्यांध्रिनेत्रे** - बस्तिप्रदेशे एवं नेत्रे **रुजा पीडनं** - पीडां प्राप्नोति तथा **मातुलात्** - मातुः भ्रातृभिः **शर्म** - सुखं **न करोति** - न प्राप्नोति ।

**भावार्थः-** यस्य जातकस्य जन्मकाले द्वादशभावे केतुः भवेत् सः नरः नृपतुल्यं सुखं प्राप्नोति । सः रणे शत्रून् पराजयति, एवं धर्मकार्येषु द्रव्यस्य विनिमयं करोति । बस्तिप्रदेशे पीडां प्राप्नोति (अर्थात् नाभितः अधोभागे) लिङ्गे, पादयोः तथा नेत्रयोः पीडा भवति तथा मातुलस्य सुखं न प्राप्नोति ।

## स्वाध्यायः

१. **अधस्तनेषु प्रश्नेषु योग्यमुत्तरं चित्वा लिखत ।**

(१) धने केतुः किं करोति?

(क) द्रव्यहीनम् (ख) बलहीनम् (ग) ज्ञानहीनम् (घ) भक्तिहीनम्

(२) तृतीयस्थः केतुः किं करोति ?

(क) धनसुखम् (ख) भ्रातृसुखम् (ग) पराक्रमसुखम् (घ) भाग्यसुखम्

(३) चतुर्थे भावे केतुः कि फलं ददाति ?

(क) मातृसुखाभावम् (ख) मित्रसुखम् (ग) गृहसुखम् (घ) मातृभक्तम्

(४) सप्तमे केतुः कस्य भयं ददाति ?

(क) अग्नेः (ख) पृथिव्याः (ग) वायोः (घ) जलस्य

(५) एकादशः स्थाने केतुः स्यात् तदा किं फलं प्रददाति ?

(क) भाग्यसुखम् (ख) संपूर्णलाभम् (ग) द्रव्यहीनम् (घ) भाग्यहीनम्

२. **एकैकवाक्येनोत्तराणि लिखत ।**

(१) कदा शिखी बान्धवक्लेशकर्ता भवति ?

(२) कुटुंबात् विरोधः कदा भवति ?

(३) नरः कस्मिन् गृहे चिरकालं न वसति ?

(४) मनुष्य कदा गुदारोगैः पीडितो भवति ?

(५) लाभगः शिखी किं करोति ?

३. **श्लोकपूर्तिं कृत्वा भावार्थो लेख्यः ।**

(१) शिखी विक्रमे ........................... विधत्ते ।

(२) तमः षष्ठभागे ............................ व्याधिनाशः ।

(३) शिखी रिष्फगो ......................... करोति ।

४. **अ-विभागेन सह ब-विभागेन सह सुयोजयत ।**

| अ | ब |
|---|---|
| (१) स्वल्पपुत्रसुखम् | (१) धने केतुः |
| (२) पृषष्ठांशेरोगः | (२) पञ्चमे केतुः |
| (३) मुखरोगकरः | (३) सप्तमे शिखी |
| (४) पितृसुखरहितः | (४) धर्मभावे केतुः |
| (५) म्लेच्छतः भाग्यवृद्धिः | (५) कर्मगः केतुः |
| (६) अतीव मार्गचिन्ता | (६) अष्ठमे शिखी |

५. **टिप्पणी लेख्या ।**

(१) सप्तस्थः केतुः

(२) लग्नस्थः केतुः

(३) एकादशस्थः केतुः

६. **विस्तरेणोत्तराणि लिखत ।**

(१) पञ्चमस्थाने केतोः फलानि लिखत ।

(२) भाग्यभावे केतोः महत्वं प्रतिपादनीयम् ।

(३) द्वादशस्थ शिखि-फलं विवेचनीयम् ।

**अध्यापकानां कृते**

- केतोः विषये द्रष्ट्यादि-विषये च चर्चा करणीया ।

**छात्राणां प्रवृत्तिः**

- केतोः कस्मिन् भावे शुभफलम् स्यात् इति विचिन्तनीयम् ।

# ११ सूर्यादिग्रहाणां गोचरफलाध्यायः

## प्रास्ताविकम्

तेजोमयसूर्यपिण्डस्य केन्द्रीयभ्रमणेनाकाशे सञ्जनितायां वर्तुलात्मकसरण्यां तत्कक्षाभिधायां सर्वेषां सूर्यतेजसोद्भासितानां बिम्बात्मकानां चन्द्रादीनां ग्रहनक्षत्राणां च सत्ता दरीदृश्यते । सर्वेषां ग्रहाणां गोचररूपेणफलम् अस्मिन् पाठे पठामः ।

### अथ गोचरफलम्

**नृजन्मराशेः खचरप्रसारैः**

**यद् गोचरे संहितिकैः प्रणीतम् ।**

**स्थूलं फलं तत्किल संप्रवच्मि**

**बालावबोधप्रदमभ्रगानाम् ॥ १॥**

**अन्वयः-** नृजन्मराशेः यद् गोचरे खचरप्रसारैः संहितिकैः स्थूलं फलं प्रणीतं तत्किल अभ्रगानां बालावबोधप्रदं संप्रवच्मि।

**व्याख्या-** **नृजन्मराशेः** - मनुष्यजन्मराशेः **यद् गोचरे** - गोचरभावे **खचर-प्रसारैः** - ग्रहविस्तारैः **संहितिकैः** - संहिताकारैः **स्थूलफलम्** - बृहद् फलम् **प्रणीतम्** - उक्तम् **तत्** - सर्वफलम् **किल** - अवधारणे **अभ्रगानाम्** - ग्रहाणाम् **बालावबोधप्रदम्** - शिशुबोधप्रदम् **संप्रवच्मि**- सम्यक् वदामि ।

**भावार्थः-** मनुष्याणां जन्मकुण्डल्यां गोचरे नवग्रहाणां यत्फलं संहिताकारैरुक्तं तत्सर्वं फलं बालज्ञानार्थं कथयामि ।

### सूर्यस्य सुभफलम्

**सहजदशम षष्ठे लाभगे याति सूर्ये**

**धनयश नृपमान्यं सर्वकार्येषु सिद्धिः ।**

**शुभमतिमखिलार्थं बन्धुवर्गोपसौख्यं**

**सुतसुखधनलाभं पुण्यवृद्धिं करोति ॥ २ ॥**

**अन्वयः-** सहजः दशमः षष्ठे लाभगे सूर्ये याति तदा धनं यशः नृपमान्यं सर्वकार्येषु सिद्धिः, शुभमतिम् अखिलार्थं बन्धुवर्गोपसौख्यं सुतसुखधनलाभं पुण्यवृद्धिं करोति ।

**व्याख्या-** **सहजः** - सहोदरः, **दशमः** - कर्मभावः **षष्ठः** - शत्रुभावः **लाभगे** - आयभावे **सूर्ये** - भानौ **याति** - गच्छति **धनम्** - द्रव्यम् **यशः** - कीर्तिः **नृपमान्यम्** - राजमान्यम् **सर्वकार्येषु सिद्धिः** - सम्पूर्णकार्येषु सिद्धिः **शुभमतिम्** - श्रेष्ठबुद्धिम् **अखिलार्थम्** - सम्पूर्णधनयु-**क्तम् बन्धुवर्गोपसौख्यम्** - भ्रातृवर्गोपसुखम् **सुतसुखधनलाभम्** - पुत्रसुखार्थलाभम् **पुण्यवृद्धिं** - सत्कार्यवृद्धिम् **करोति** - कुरूते।

**भावार्थः-** तृतीयदशमषष्ठ्यैकादश-भावेषु गोचरे सूर्य आगच्छति । तदा सः धनयशो नृपमानादि-सर्वकार्येषुसिद्धिः श्रेष्ठमतियुक्तः अखिलार्थः मित्रवर्गस्य सुखं पुत्रसुखं धनलाभं पुण्यवृद्धिं च करोति ।

## सूर्यस्य अशुभ फलम्

**जन्मान्त्य सप्ताश्वि चतुर्थसंस्थे पञ्चाष्टके वै नवमेऽपि भानुः ।**

**रोगं च शोकं भयमग्निपीडां व्याधिप्रवासौ कुरूतेऽर्थ हानिम् ॥ ३ ॥**

**अन्वयः-** भानुः जन्मः अश्वि चतुर्थ पञ्चम सप्त अष्टके नवमे अपि अन्त्य संस्थः (तदा) रोगं शोकं भयम् अग्निपीडां व्याधिं प्रवासं अर्थहानिं वै कुरूते ।

**व्याख्या-** **जन्मनि (यदि) भानुः** - सूर्यः, **जन्मे** - प्रथमे, **अश्वि** - द्वितीये, **चतेुर्थ** - सुखे, **पञ्चे** - पञ्चमेः, सप्ते - सप्तमे, **अष्टके** - अष्टमस्थाने, **नवमे** - नवमस्थाने, **अन्त्ये** - द्वादशे अपि संस्थः स्थितः (तदा) रोगं - गदः, **शोकं** - दुःखं, **भयं** - भीतिः, **अग्निपीडां** - वह्या दुःखं, **व्याधिं** - कष्टं, **प्रवासः** - यात्रा, **अर्थहानिं** - धननाशं वै **कुरूते** - करोति ।

**भावार्थः-** यदा जन्मसमये वा गोचर-समये सूर्यः प्रथमः द्वितीयः चतुर्थः पञ्चमः सप्तमः अष्टमः नवमः द्वादशः एतेषु भावेषु स्थितः चेत् तदा जातकस्य शरीरे व्याधिः शोकः भीतिः अग्निपीडा प्रवासयोगः धननाशं च करोति।

## चन्द्रस्य शुभफलम्

**जन्म त्रि सप्ताश्वि दशाय संस्थः षष्ठो विधुश्चापि करोति लाभम् ।**

**द्रव्यागमं मित्रसमागमं च सद्बुद्धिवृद्धिं द्विजदेवभक्तिम् ॥ ४ ॥**

**अन्वयः-** विधुः जन्म अश्वि त्रि षष्ठः सप्तः दश आयः संस्थः (तदा) द्रव्यागमं मित्रसामागमं सद्बुद्धिवृद्धिम् द्विजदेव भक्तिञ्च करोति ।

**व्याख्या-** **जन्म** - प्रथमभावः **त्रि** - तृतीयभावः **सप्तः** - सप्तमभावः **अश्वि** - द्वितीयभावः **दशः** - दशमभावः **आयः** - एकादशभावः **षष्ठः** - षष्ठभावः **विधुः** - चन्द्रमाः **लाभम्** - प्राप्तिम् **द्रव्यागमं** - धनागमं **मित्रसमागमं** -मित्रमिलनम् **सद्बुद्धिवृद्धि** - सद्मतिवृद्धिः **द्विजदेवभक्तिम्** - ब्राह्मणसुरभक्तिः **करोति** - कुरुते ।

**भावार्थः-** निशापतिर्यदा गोचरे प्रथम - द्वि-त्रय-षष्ठ-सप्त-दशम-एकादश भावेषु स्थितः तदा लाभ धनलाभः मित्रलाभः सन्मति वृद्धिः द्विजदेवभक्ति-युक्तो जातको भवति ।

## चन्द्रस्य अशुभफलम्

**धर्माब्धिगश्च सुतरंध्रगतो व्ययस्थो द्रव्यार्थहानिमखिलां कुरुतेऽपि चन्द्रः ।**

**चौराग्निभीतिवधबंधयुतं करोति हानिर्वियोगभयदुःखयुतं करोति ॥ ५ ॥**

**अन्वयः-** चन्द्रः अब्धिः सुतः रन्ध्रः धर्मः व्ययस्थः गतः चन्द्रोऽपि अखिलां द्रव्यार्थहानिं कुरुते । चौराग्निभीतिः वधबंधनयुतं करोति । हानिर्वियोगभयदुःखयुतं करोति ।

**व्याख्या-** **धर्मः** - नवमभावः **अब्धिः** - चतुर्थभावः **सुतः** - पुत्रभावः **रंध्रः** - अष्टमभावः **व्ययस्थः** - द्वादशस्थः **गतः** - गते **चन्द्रोऽपि** - चन्द्रमा अपि **अखिलां** - सर्वाम् **द्रव्यार्थहानिः** - धननाशः **कुरुते** - करोति। **चौरः** - तस्करः **अग्नि** - हुताशनः **भीतिः** - भयः **वधम्** - मृत्युः **बंधनयुतं** - कारागारयुक्तम् **करोति**-कुरुते । **हानिः** - क्षयः **वियोगभयः** - प्रियजनमिलनबाधाम् **दुःखयुतं** - कष्टयुक्तम् **करोति** -कुरूते।

**भावार्थः-** चन्द्रमा यदि जातकस्य चतुर्थभावे पञ्चमभावे अष्टमभावे नवमभावे एवं द्वादशभावे स्यात् तर्हि जातकस्य धनहानिं चौराग्निभीतिं वधबंधयुतं वियोगभयं दुःखं हानियुतं च भवति ॥

## भौमस्य शुभफलम्

**त्रिषष्ठलाभे धरणीसुतः स्याद् गोभूहिरणम्बरलाभकारी ।**

**शत्रुक्षयं राजकृपां विधत्ते ह्यारोग्यसौख्यं विविधं करोति ॥ ६ ॥**

**अन्वयः-** धरणीसुतः त्रि षष्ठ लाभे स्यात् तर्हि गोभूहिरण्यम् अम्बर लाभकारी राजकृपां विधत्ते । शत्रुक्षयं ह्यारोग्यसौख्यं विविधं करोति ।

**व्याख्या-** **धरणीसुतः** - भौमग्रहः **त्रि** - तृतीयः **षष्ठः** - शत्रुभावः **लाभे** - एकादशे **स्यात्** - भवेत् तर्हि **गो** - धेनुः **भू** - भूमिः **हिरण्यः** - स्वर्णम् **अम्बरलाभकारी** - वस्त्रलाभकारी **राजकृपां** - नृपतिप्रीतिं **विधत्ते** - प्राप्यते **शत्रुक्षयं** - अरिनाशं **ह्यारोग्यसौख्यं** - शरीरसुखं **विविधं** - नानाविधं **करोति** - कुरुते ।

**भावार्थः-** भौमः तृतीय-षट्-एकादशभावेषु स्यात् तदा सः गवां भूमेः हिरण्यस्य वस्त्राणां च दायको भवति । शत्रूणां विनाशं नृपप्रीतिं शरीरे आरोग्यसुखं तथा नानाविधं कार्यं करोति ॥

## भौमस्य अशुभफलम्

**जन्मनि चतुर्थपञ्चम-द्वादश-सप्ताष्ट- नव-द्वि-दशमेषु ।**

**व्याधिं विदेशगमनं मित्रविरोधं कुजः कुरुते ॥ ७ ॥**

**अन्वयः-** कुजः जन्मनि द्वि-चतुर्थ-पञ्चम-सप्ताष्ट-नव-द्वि-दशम-द्वादशेषु । व्याधिं विदेशगमनं मित्रविरोधं कुजः कुरुते ।

**व्याख्या-** **जन्मनि** - प्रथमे **चतुर्थे** - तुर्ये **पञ्चमे** - पुत्रे **द्वादशे** - व्यये **सप्ते**- कलत्रे **अष्टसु** - मृत्यौः **नव** - **धर्मः** **द्वि** -धनम् **दशमेषु**- कर्मसु **व्याधिः** - कष्टः **विदेशगमनं** - परदेशगमनं **मित्रविरोधं** - बन्धुविरोधं **कुजः** - भौमः **कुरुते** - करोति

**भावार्थः-** भौमः प्रथम-द्वितीय-चतुर्थ-पञ्चम-सप्तम-अष्टम-नवम-दशम- द्वादशभावेषु स्यात् तर्हि जातकस्य शरीरे व्याधिं विदेशगमनं मित्रविरोधं च करोति ।

## बुधस्य शुभफलम्

**लाभे द्वि षष्ठे दशमे चतुर्थे रंध्रे बुधश्चापि करोति लाभम् ।**

**सौभाग्यसौख्यं मनसोऽपि हर्षं चार्थागमं वर्धनमाशु सम्पदाम् ॥ ८ ॥**

**अन्वयः-** बुधः द्वि चतुर्थे षष्ठे रन्ध्रे दशमे अपि लाभे सौभाग्यसौख्यं मनसः अपि हर्षम् अर्थागमं च सम्पदां आशुवर्धनं करोति ।

**व्याख्या-** **बुधः** - सौम्यः **लाभे** - एकादशे **द्वि** - द्वितीयभावे धनभावे **षष्ठे** - शुत्रभावे **दशमे** - कर्मभावे **चतुर्थ**-पातालभावे अपि **रन्ध्रे** - अष्टमभावे **सौभाग्यसौख्यं** - दीर्घायुष्यम् **मनसः** -चित्तस्य अपि **हर्षम्** - आनन्दम् **अर्थागमम्** - द्रव्यलाभम् **सम्पदाम्** - समृद्धीनाम् **आशु** - शीध्रम् **वर्धनम्** - वृद्धिं **करोति** - कुरुते।

**भावार्थः-** सौम्यग्रहः द्वितीयचतुर्थषडाष्टदशैकादशेषु भावेषु स्थितश्चेत् श्रेष्ठः फलदायी भवति । लाभं भाग्योदयं मनस आनन्दप्राप्तिं धनलाभम् उत्तमसुखं प्रापयति तथा शीघ्रं संपत्तिवर्धनं करोति ।

## बुधस्य अशुभफलम्

**जन्मद्वादश-पञ्चमेऽपि नवमे द्यूने तृतीयेऽपि वा**

**सौख्यस्यापि विनाशनं प्रकुरुते द्रव्यार्थहानिं बुधः ।**

**भ्रातुश्चापि विरोधशोककुभयं चाङ्गेऽपि कष्टं महत्**

**नानाशत्रुभयं सदैवमसुखं व्याधिं वियोगं तथा ॥ ९ ॥**

**अन्वयः-** बुधःजन्मनि पञ्चमेः अपि नवमे द्यूने वा तृतीये द्वादशे अपि सौख्यस्यापि विनाशनं द्रव्यार्थहानिं भ्रातुश्चापि विरोधं शोकं कुभयम् अङ्गो अपि महत् कष्टं नानशत्रुभयं सदैवम् असुखं व्याधिं तथा वियोगं प्रकुरुते।

**व्याख्या-** **जन्मनि** - प्रथमभावे **द्वादशे** - व्ययभावे **पञ्चमे अपि** - विद्याभावे अपि **नवमे** - धर्मभावे वा **तृतीये** - सहोदरभावे अपि **बुधः** - सौम्यग्रहः **सौख्यस्यापि विनाशनम्** - सुखस्य विनाशम् **द्रव्यार्थहानिम्** - धननाशम् **भ्रातुश्चापि** - बान्धवानाम् अपि **विरोधम्** - द्वेषम् **शोकम्** - व्याकुलम् **कुभयम्** - दुर्भयम् **अङ्गोऽपि महत् क्टम्** - शरीरे अथीव अस्वस्थता **नानाशत्रुभयम्** - विविधशत्रुभ्यः कष्टम् **सदैवम्** - नित्यम् **असुखम्** - दुःखम् **व्याधिम्** - कष्टम् एवं **वियोगं** - असमागमं **प्रकुरुते** - प्रकरोति ।

**भावार्थः-** सौम्यग्रहः प्रथमभावे तृतीयभावे पञ्चमभावे सप्तमभावे नवमभावे द्वादशभावे च स्थितश्चेत् सुखविनाशं धननाशं भ्रातृभिः सह विरोधं शोकयुक्तं शरीरे महापीडां शत्रुभयं नित्यदुःखापत्तिं व्याधिं तथा वियोगं च प्रकरोति ।

## गुरोः शुभफलम्

**द्विधर्मे च लाभे सुते सप्तमे स्याद् गुरुर्लाभकारी क्रये विक्रयेऽपि ।**

**प्रतिष्ठाविवृद्धं तथा बुद्धिवृद्धिं करोत्यर्थलाभं सुखं संपदश्च ॥ १० ॥**

**अन्वयः-** गुरुः द्विधर्मे लाभे सुते सप्तमे च स्याद् क्रये विक्रये लाभकारी प्रतिष्ठाविवृद्धं बुद्धिवृद्धिं तथा अर्थलाभं सुखं संपदश्चापि करोति ।

**व्याख्या-** **गुरुः** - बृहस्पतिः **द्विधर्मे** - धनभावे **लाभे** - एकादशभावे **सुते** - पञ्चमभावे **सप्तमे** - कलत्रभावे **च स्यात्** - भवेत् **क्रये विक्रये** - वाणिज्यक्षेत्रे **लाभकारी** - लाभकारी **प्रतिष्ठाविवृद्धम्** - कीर्तिवर्द्धकम् **बुद्धिवृद्धिं** - ज्ञानवर्धकम् **अर्थलाभम्** - द्रव्यप्राप्तिं **सुखम्** - सौख्यम् **संपदः**- समृद्धिं **करोति** - प्रापयति।

**भावार्थः-** बृहस्पतिः द्वितीयनवमैकादशपञ्चमसप्तमभावेषु स्थिते सति वाणिज्यक्षेत्रे लाभदायी भवति कीर्तिवर्द्धकं ज्ञानवर्धकं द्रव्यप्रापकं सौख्यं समृद्धिवर्धनं च करोति ।

## गुरोः अशुभफलम्

**द्वादश-दशम-चतुर्थो जन्मनि षष्ठाष्टमे तृतीये च ।**

**व्याधिं विदेशगमनं मित्रविरोधं सुरगुरूः कुरुते ॥ ११ ॥**

**अन्वयः-** सुरगुरुः द्वादशदशमचतुर्थे जन्मनि षष्ठाष्टमे च तृतीये व्याधिं विदेशगमनं मित्रविरोधं कुरुते ।

**व्याख्या-** **सुरगुरुः** - बृहस्पतिः **द्वादशे** - व्ययभावे **दशमे** - कर्मभावे **चतुर्थे** - मित्रभावे **जन्मनि** - प्रथमभावे **षष्ठ** -शत्रुभावे **अष्टमे** - मृत्युभावे च **तृतीये** - सहोदरभावे सति **व्याधिम्** - कष्टम् **विदेशगमनं** - परदेशयोगम् **मित्रविरोधम्** - बन्धुभिः सह क्लेशम् **कुरुते** - करोति ।

**भावार्थः-** गुरुः यदा जन्मकाले द्वादशदशमचतुर्थेषु एवं षष्ठाष्टमभावयोः स्यात् तदा । तस्य जातकस्य कष्टं विदेशयोगं मित्रेण सह क्लेशं च करोति ।

## शुक्रस्य शुभफलम्

**द्विधर्मलाभाष्टमगे सुते स्यादयाख्य-वह्नि-प्रथमेऽपि शुक्रः ।**

**चतुर्थगश्चापि समागमं च सत्पुत्रवर्गादिसुखं करोति ॥ १२ ॥**

**अन्वयः-** शुक्रः द्विधर्मलाभाष्टमगे सुते अयाख्यवह्विप्रथमे चतुर्थगश्च अपि स्यात् तदा समागमं सत्पुत्रवर्गादिसुखं करोति।

**व्याख्या-** **शुक्रः** - भार्गवः **द्वि** - धनभावे **धर्म** - नवमभावे **लाभ** - एकादशे भावे **अष्टमगे** - मृत्युभावे **सुते**

– पञ्चमभावे **अयाख्य** – द्वादशभावे **वह्नि** – तृतीयभावे **प्रथमे** – तनुर्भावे **चतुर्थगे** – मित्रभावे **स्यात्** – भवेत् तदा **समागमं** – सज्जनैः सह मेलनम् **सत्पुत्रवर्गादिसुखं** – कुलदीपक-सुबन्धुवर्गादिसुखं **करोति** – कुरुते ।

**भावार्थः-** भार्गवः धनभावे नवमभावे एकादशभावे मृत्युभावे पञ्चमभावे व्ययभावे वह्निभावे तनुर्भावे स्थितो भवेत् तदा सः सन्मनुष्याणां सह मेलनं कुलदीपकपुत्रं श्रेष्ठबन्धुसुखं कुरुते ।

## शुक्रस्य अशुभफलम्

**कर्मसप्तरिपुगोऽशुभः स्मृतो रोगशोकमपि दत्तवान्भृगुः ।**

**कार्यनाशनमथो महापदं स्त्रीविरोधमपि कष्टदः सदा ॥ १३ ॥**

**अन्वयः-** भृगुः कर्मसप्तरिपुगः अशुभः स्मृतः रोगशोकम् अपि दत्तवान् । अथ कार्यनाशनं महापदं स्त्रीविरोधं अपि सदा कष्टदः (भवति) ।

**व्याख्या-** **भृगुः** – शुक्रः **कर्म** – दशमभावे **सप्त** – जायाभावे **रिपौ-** षष्ठभावे गतः **अशुभः** – अकल्याणकारी **स्मृतः** – कथितः **रोगशोकम्** – रोगस्य भयम् **दत्तवान्** – अदात् **कार्यनाशनम्** – कर्मविफलताम् **महापदं** – महाविपत्तिम् **स्त्रीविरोधम्** – नारीक्लेशम् **सदा** – नित्य **कष्टदः** – दुःखदः (भवति) ।

**भावार्थः-** भार्गवः दशमभावे जायाभावे रिपुभावे स्थितश्चेत् अकल्याणकारी स्मृतः रोगभयं कर्मनाशनं महाविपत्तिं स्त्रीभिः सह क्लेशम् इत्यादि-दुःखानि प्रापयति अतः नित्यं दुःखदः वर्तते ।

## ॥ मन्दस्य शुभफलम् ॥

**त्रिषष्ठे च लाभे शनिश्चापि सौख्यं ततो लाभकारी हिरण्याम्बराणि ।**

**नृपान्मित्रपक्षाज्जयं चार्थलाभं करोत्यर्थलाभं सुखं सम्पदं च ॥ १४ ॥**

**अन्वयः-** शनिः त्रिषष्ठे लाभे च सौख्यं ततो लाभकारी हिरण्यांबराणि नृपान्मित्रपक्षाज्जयं च अर्थलाभं सुखं सम्पदं च करोति ॥

**व्याख्या-** **शनिः** – मन्दः **त्रि** – तृतीयभावे **षष्ठे** – शत्रुभावे **लाभे** – एकादशभावे च **सौख्यं** – सुखम् **ततो लाभकारी** – ततो लाभदायी **हिरण्याम्बराणि** – सुवर्णलाभम् **नृपात्** – राज्ञः **मित्रपक्षाज्जयं** – मित्रपक्षतः विजयञ्च **अर्थलाभं** – धनलाभं **सुखं** – सौख्यं **सम्पदञ्च** – सम्पत्ति-ञ्च **करोति** – कुरूते ॥

**भावार्थः-** शनैश्चरः सहोदरभावे शत्रुभावे एकादशभावे भवेत् तदा सुखप्राप्तिं सुखदायी सुवर्णलाभं राज्ञा सह स्नेहवृद्धिं तथा मित्रपक्षतः विजयं द्रव्यसुखं सौख्यं संपत्तिञ्च करोति ।

## मन्दस्य अशुभफलम्

**जन्मनि चतुर्थपञ्चम-द्वादश-सप्ताष्टनव-द्विदशमेषु ।**

**स्वजनेनापि च कलहं द्रव्यार्थहानिमर्कजः कुरुते ॥ १५ ॥**

**अन्वयः-** अर्कजः जन्मनि चतुर्थपञ्चम-द्वादशसप्ताष्टनवद्विदशमेषु स्थितेषु सत्सु, स्वजनेनापि कलहं द्रव्यार्थहानिं च कुरुते ।

**व्याख्या-** **अर्कजः** – भानुजः **जन्मनि** – प्रथमभावे **चतुर्थे** – मित्रभावे **पञ्चमे** – पुत्रभावे **द्वादशे** – व्ययभावे **सप्तमे** – कलत्रभावे **अष्टमे** – मृत्युभावे **नवमे** – धर्मभावे **द्वि** – धनभावे **दशमे** – कर्मभावे स्थितेषु सत्सु-निवसितेषुसत्सु भक्तिदः सः **स्वजनेन** – अपि कुटुम्बिभिः सह अपि **कलहं** – क्लेशं **द्रव्यार्थहानिं** – अर्थनाशं च **कुरुते** – करोति ।

**भावार्थः-** सूर्यपुत्रः शनैश्चरः प्रथमधनमित्रपुत्रकलत्रकर्मधर्मव्ययभावेषु तदा स्नेहिजनैः सह क्लेशं द्रव्यार्थहानिम् अर्थनाशं च कुरुते ।

## राहोः शुभाशुभफलम्

**उपचये प्रथमे नवमे तमो दिशति पुत्रकलत्रधनागमम् ।**

**द्वितीय-पञ्चम-रंध्र-मुनि-स्थितो हिबुक-रिष्फ-गतो मरणं ध्रुवम् ॥ १६ ॥**

**अन्वयः-** तमः उपचये प्रथमे नवमे स्थिते पुत्रकलत्रधनागमं दिशति । द्वितीयपञ्चमरंध्र-मुनि-हिबुक-रिष्फ-स्थितः तदा मरणं ध्रुवम् ।

**व्याख्या-** **तमः** - राहुः **उपचये** - तृतीयषड्दशमैकादशभावेषु **प्रथमे** - जन्मनि **नवमे** - धर्मभावे **स्थितः** - उपस्थितः **पुत्रः** - सूनुः **कलत्रं** - जाया **धन** - **आगमं** - द्रव्य प्राप्तिं **दिशति** - करोति । **द्वितीये** - धनभावे **पञ्चमे** - पुत्रभावे **रन्ध्रे** - अष्टमभावे **मुनि** - सप्तमभावे **हिबुके** - चतुर्थभावे **रिष्फे** - व्ययभावे भवेत् तदा **मरणं** - मृत्युः **ध्रुवं** - निश्चितम् ।

**भावार्थः-** राहुः उपचयेषु प्रथमे नवमे भावे उपस्थिते सति सुतजायाद्रव्यागमं करोति । धनभावे पुत्रभावेऽष्टमभावे सप्तमभावे चतुर्थभावे व्ययभावे सति मरणं निश्चितम् ।

## शुभाशुभगोचरग्रहफलम् ।

| **सूर्यादि-ग्रहाणां गोचरे शुभफलम्** | | **सूर्यादि-ग्रहाणां गोचरे अशुभफलम्** | |
|---|---|---|---|
| सूर्यः | ३-६-१०-११ | सूर्यः | १-२-४-५-७-८-९-१२ |
| चन्द्रः | १-२-३-६-७-१०-११ | चन्द्रः | ४-५-८-९-१२ |
| मङ्गलः | ३-६-१२ | मङ्गलः | १-२-४-५-७-८-९-१०-१२ |
| बुधः | २-४-६-८-१०-११ | बुधः | १-३-५-७-९-१२ |
| गुरुः | २-५-७-९-११ | गुरुः | १-३-४-६-८-१०-१२ |
| शुक्रः | १-२-३-४-५-८-९-११-१२ | शुक्रः | ६-७-१० |
| शनिः | ३-६-११ | शनिः | १-२-४-५-७-८-९-१०-१२ |
| राहुः | १-३-६-९-१०-११ | राहुः | २-४-५-७-८-१२ |

## स्वाध्यायः

**१. अधस्तनेषु प्रश्नेषु योग्यमुत्तरं चित्वा लिखत ।**

(१) नृजन्मराशिः अर्थात् किम् ?

(क) मानवजन्मराशिः (ख) देवजन्मराशिः (ग) पशुजन्मराशिः (घ) दानवजन्मराशिः

(२) सहजः कस्य भावस्य संज्ञा ?

(क) प्रथमस्य (ख) द्वितीयस्य (ग) तृतीयस्य (घ) चतुर्थस्य

(३) एकादश-भावस्यापरं नाम किम् ?

(क) लाभः (ख) तनुः (ग) धनम् (घ) व्ययः

(४) निशापतिः अर्थात् कः ?

(क) सूर्यः (ख) शनिः (ग) चन्द्रः (घ) गुरुः

(५) भौम-ग्रहस्यापरं नाम किम् ?

(क) आरः (ख) अग्निः (ग) हेमः (घ) क्षयकरः

(६) रन्ध्रः कस्य भावस्य संज्ञा ?

(क) अष्टमस्य (ख) नवमस्य (ग) दशमस्य (घ) एकादशस्य

(७) भाग्यम् अर्थात् किम् ?

(क) एकम् (ख) पञ्चमः (ग) नवमः (घ) एकादशः

(८) देवपुरोहितः अर्थात् किम् ?

(क) बृहस्पतिः (ख) उशना (ग) इन्द्रः (घ) अर्कजः

(९) अन्त्यः अर्थात किम् ?

(क) प्रथमभावः (ख) अष्टमभावः (ग) द्वादशभावः (घ) रिपुभावः

(१०) रिष्फः अर्थात् किम् ?

(क) प्रथमभावः (ख) दशमभावः (ग) तृतीयभावः (घ) द्वादशभावः

**२. एकैक-वाक्येनोत्तराणि लिखन्तु ।**

(१) पुण्यवृद्धिः कदा जायते ?

(२) सूर्यस्य अशुभफलं लिखत ?

(३) चतुष्टयम् अर्थात् किम् ?

(४) द्विजदेवभक्तिः कदा भवति ?

(५) अब्धिः अर्थात् किम् ?

(६) नानाशत्रुभयं कदा भवति ?

(७) प्रतिष्ठावृद्धिः कदा जायते ?

(८) सम्पदः अर्थात् किम् ?

(९) सत्पुत्रादिसुखं केन ग्रहेण भवति ?

(१०) महापदं अर्थात् किम् ?

**३. अ-विभागेन सह ब-विभागं सुयोजयत ।**

| **अ** | **ब** |
|---|---|
| (१) विद्याभावः | (१) प्रथमभावः |
| (२) कलत्रभावः | (२) द्वादशभावः |
| (३) कर्म-भावः | (३) सप्तमभावः |
| (४) व्ययभावः | (४) पञ्चमभावः |
| (५) उदयभावः | (५) दशमभावः |
| | (६) नवमभावः |

**४. श्लोकपूर्तिं कृत्वा भावार्थो लेख्यः ।**

(१) उपचये प्रथमे .......................... मरणं ध्रुवम् ॥

(२) त्रिषष्ठलाभे ............................ विविधं करोति ॥

(३) धर्माब्धिगश्च ............................ वियोगभयदुःखयुतं करोति ॥

**५. टिप्पणी लेख्या ।**

(१) शनिग्रहस्य शुभाशुभत्वम्

(२) भौमग्रहस्य शुभाशुभत्वम्

(३) सूर्यग्रहस्य शुभाशुभत्वम्

(४) गोचरफलम्

**६. विस्तरेणोत्तराणि लिखत ।**

(१) गोचरे राहुग्रहस्य द्वादशभावफलम् ।

(२) शुक्रग्रहस्य द्वादशभावफलम् ।

(३) चन्द्रग्रहस्य द्वादशभावफलम् ।

●

# १२ लघुपाराशरीयः ०१

## प्रास्ताविकम्

प्रस्तुतोऽयं पाठः लघुपाराशरी ग्रन्थादुद्धृतोऽस्ति । पराशरमुनिद्वारा प्रणितोऽयं शास्त्रीयग्रन्थः । नाम्ना लघुपाराशरी परन्तु ज्ञानस्य तु सागरः वर्तते । अस्मिन् ग्रन्थे संज्ञाध्यायः, योगाध्यायः, आयुर्विचाराध्यायः, दशाध्यायः, मिश्रकाध्यायः इति पञ्चाऽध्यायाः सन्ति । 'जलबिन्दु-निपातेन क्रमशः पूर्यते घटः' नियमानुसारेण बहुभिः विद्वज्जनैरस्य ग्रन्थस्य महत्तां दृष्ट्वा स्वकीयमपि योगदानार्थमस्मिन् ग्रन्थे श्लोकाः स्थापिताः, तेन शनैः शनैः वर्धमानैः श्लोकैर्द्वितीयो ग्रन्थः मध्यपाराशरी स्वरूपेणात्र प्राप्तः भवति । तावदत्र केचन श्लोकाः पठ्यते ।

### संज्ञाविचारः

**बुधैर्भावादयः सर्वे ज्ञेयाः सामान्यशास्त्रतः ।**

**एतच्छास्त्रानुसारेण संज्ञां ब्रूमो विशेषतः ॥ १ ॥**

**अन्वयः-** बुधैः सर्वे भावादयः सामान्यशास्त्रतः ज्ञेयाः, एतच्छास्त्रानुसारेण विशेषतः संज्ञां ब्रूमः । (अनुष्टुप् छन्दः)

**व्याख्या-** **बुधैः** - पण्डितैः, **सर्वे भावादयः** - जन्माङ्गचक्रस्य भावाः, **सामान्यशास्त्रतः** - अन्यशास्त्रतः, **ज्ञेयाः** - पठितव्याः, **एतच्छास्त्रानुसारेण** - लघुपाराशरीय ग्रन्थानुसारेण, **विशेषतः संज्ञां** - विशिष्टां संज्ञाम् **ब्रूमः** - कथयामः ।

**भावार्थः-** विद्वज्जनैः जन्माङ्गचकस्य द्वादशभावादीनां संज्ञा स्वामिनः राशयः राशिस्वामिनः षड्वर्गश्चान्यैः शास्त्रैः ज्ञात्वा पश्चादनेन शास्त्रेण ज्ञेयं सर्वं विशिष्टं ज्ञातव्यमिति ।

**विशेषार्थः-** अस्मिन् लघुपाराशरीय शास्त्रे जन्माङ्गचक्रस्य द्वादशभावानां विशिष्टाः संज्ञाः तथा च विविधाः योगाः बहुभिः प्रकारैः निरूप्यन्ते ।

**अत्र प्रकरणानुरूपाः श्लोकाः**

**कल्पोदयाद्यातनुजन्मविलग्नहोरा वागर्थभुक्तिनयनस्वकुटुम्बभानि ।**

**दुश्चिक्यविक्रमसहोदरवीर्यधैर्य-कर्णस्तृतीयभवनस्य भवन्ति संज्ञाः ॥**

**पातालवृद्धिहिबुकक्षितिमातृविद्या यानाम्बुगेह-सुखबन्धुचतुष्टयानि ।**

**धीदेवराजपितृनन्दन पञ्चमानि रोगाङ्गशस्त्रभयषष्ठरिपुक्षतानि ॥**

**जामित्रकामगमनानि कलत्रसम्पद्द्युनास्तसप्तमगृहाणि वदन्ति चार्याः ।**

**रन्ध्रायुरष्टरणमृत्युविनाशनानि धर्मोगुरुः शुभतपो नवभाग्यभानि ॥**

**व्यापारमेषुरणमध्यमानं ज्ञानञ्च राज्यास्पदकर्म संज्ञा ।**

**एकादशोपान्त्यभवायलाभा रिष्फव्यय द्वादश कान्त्यभानि ॥**

**तथाऽन्येऽपि संज्ञा वाचकाः श्लोकाः ।**

**आत्मा रविः शीतकरस्तु चेतः सत्त्वं धराजः शशिजोऽथ वाणी ।**
**ज्ञानं सुखं चेन्द्रगुरुर्मदश्च शुक्रः शनिः कालनरस्य दुःखम् ॥**
**राजा रविः शशधरश्च बुधः कुमारः सेनापतिः क्षितिसुतः सचिवौ सितेज्यौ ।**
**भृत्यस्तथा तरणिजः सबला ग्रहाश्च कुर्वन्ति जन्मसमये निजमेव रूपम् ॥**

**अत्र प्रकरणानुरूपं राशिसंज्ञाः लिख्यन्ते ।**

**पुंस्त्री क्रूराऽक्रूरौ चरस्थिरद्विस्वभावसंज्ञाश्च ।**
**अजवृषमिथुनकुलीराः पञ्चमनवमैः सहेन्द्राद्याः ॥**
**मीनालिकर्कटमृगाः सलिलाभिधानाः तोयाश्रयावटवधूयुगगोपसंज्ञा ।**
**निस्तोयभूतलचराः क्रियचापतौलिकण्ठीरवाश्च बहवः प्रवदन्ति सन्तः ॥**

**प्रकरणानुरूपं ग्रहाणां स्थिरत्वादिलिख्यते ।**

**रविः स्थिरः शीतकरश्चरः स्यादुग्रः कुलश्चन्द्रसुतस्तु मिश्रः ।**
**मृदुः सुरेज्यो भृगुजो लघुश्च शनिः सुतीक्ष्णः कथितो मुनीन्द्रैः ॥**

## विविधयोगाः

### शुभाशुभफलप्रदयोगाः

**सर्वे त्रिकोणनेतारो ग्रहाः शुभफलप्रदाः ।**
**पतयस्त्रिषडायानां यदि पापफलप्रदाः ॥२॥**

**अन्वयः-** त्रिकोणनेतारः सर्वे ग्रहाः शुभफलप्रदाः, यदि त्रिषडायानां पतयः पापफलप्रदाः । (अनुष्टुप् छन्दः)

**व्याख्या-** **त्रिकोणनेतारः** - त्रिकोणाधिपतयः, **सर्वे ग्रहाः** - सर्वे खेटाः, **शुभफलप्रदाः** - शुभफलप्रदातारः, **यदि**- चेत्, **त्रिषडायानां** - तृतीयषष्ठैकादशानां **पतयः** - स्वामिनः **पापफलप्रदाः** - अशुभफलदातारः।

**भावार्थः-** पञ्चमनवमस्थानस्वामिनः शुभफलदातारः तथा तृतीयषष्ठैकादशस्थानस्वामिनस्तु अशुभफलदातारो भवन्ति ।

### अशुभफलप्रदयोगाः

**न दिशन्ति शुभं नृणां सौम्याः केन्द्राधिपा यदि ।**
**क्रूराश्चेदशुभं ह्येते प्रबलाश्चोत्तरोत्तरम् ॥ ३ ॥**

**अन्वयः-** सौम्याः यदि केन्द्राधिपाः नृणां शुभं न दिशन्ति, चेत् क्रूराः (केन्द्राधिपाः तर्हि) अशुभं (न दिशन्ति) एते हि उत्तरोत्तरं प्रबलाः । (अनुष्टुप् छन्दः)

**व्याख्या-** **सौम्याः** - शुभग्रहाः, **यदि** - चेत्, **केन्द्राधिपाः** - केन्द्रस्य स्वामिनः, **नृणां** - नराणां, **शुभं** - इष्टं, **न** - दिशन्ति - न यच्छन्ति, **चेत्** - यदि, **क्रूराः** - दुष्टाः, (**केन्द्राधिपाः** - केन्द्रेशाः, **तर्हि** - तेन,) **अशुभं** - नेष्टं (**न दिशन्ति** - न यच्छन्ति) **हि** - निश्चयेन **एते** - ग्रहाः, **उत्तरोत्तरम्** - एकस्मादेकस्मात् **प्रबलाः** - बलवन्तः।

**भावार्थः-** सौम्याः ग्रहाः यदि कण्टकाधिपतयः भवन्ति तदा ते शुभं फलं न प्रयच्छन्ति । एवं च यद्यशुभग्रहाः कण्टकाधिपतयः भवन्ति तदा तेऽशुभं फलं न प्रयच्छति । एते ग्रहाः उत्तरोत्तरं बलवन्तः भवन्ति ।

## समानफलदायकयोगा:

**लग्नाद् व्ययद्वितीयेशौ परेषां साहचर्य्यतः ।**

**स्थानान्तरानुगुण्येन भवतः फलदायकौ ॥ ४ ॥**

**अन्वयः-** लग्नाद् व्ययद्वितीयेशौ परेषां साहचर्य्यतः स्थानान्तरानुगुण्येन फलदायकौ भवतः । (अनुष्टुप् छन्दः)

**व्याख्या-** **लग्नाद्** - जन्मलग्नात्, **व्ययद्वितीयेशौ** - द्वादशद्वितीयस्थानाधिपौ, **परेषाम्** - अन्येषां, **साहचर्य्यतः** - सहवासतः, **स्थानान्तरानुगुण्येन** - भवनान्तरगुणानुरूपेण, **फलदायकौ** - निष्पत्तिदायकौ, **भवतः** - जायेते।

**भावार्थः-** लग्नस्य पार्श्वस्थौ द्वितीयद्वादशेशौ ग्रहौ परेषां साहचर्य्यानुसारेण स्थानानुरूपेण फलं ददतः ।

## रन्ध्रेशयोगविचारः

**भाग्यव्ययाधिपत्येन रन्ध्रेशो न शुभप्रदः ।**

**स एव शुभसन्धाता लग्नाधीशोऽपि चेत्स्वयम् ॥ ५ ॥**

**अन्वयः-** भाग्यव्यायाधिपत्येन रन्ध्रेशो न शुभप्रदः, स एव स्वयं लगधीशोऽपि चेत् शुभसन्धाता । (अनुष्टुप् छन्दः)

**व्याख्या-** **भाग्यव्यायाधिपत्येन** - भाग्यस्य व्ययस्थानम् अष्टमं तस्येशन, **रन्ध्रेशः** - अष्टमेशः, **न शुभप्रदः** - न शुभफलदाता, **स एव स्वयं** - लग्नेशः, **लगधीशोऽपि** - लग्नेशः **चेत् शुभसन्धाता** - शुभफलदाता।

**भावार्थः-** रन्ध्रेशः सदाऽशुभफलदाताऽस्ति परन्तु यदि रन्ध्रेश एव लग्नेशः तदा तूत्तमफलदाता जायते ।

**विशिष्टार्थः-** मेषलग्ने ह्ययं योगः ।

## केन्द्राधिपतियोगः

**केन्द्राधिपत्यदोषस्तु बलवान् गुरुशुक्रयोः ।**

**मारकत्वेऽपि च तयोर्मारकस्थान संस्थितिः ॥ ६ ॥**

**अन्वयः-** गुरुशुक्रयोः केन्द्राधिपत्यदोषस्तु बलवान्, अपि च तयोः मारकत्वे मारकस्थानसंस्थितिः (बलवती) । (अनुष्टुप् छन्दः)

**व्याख्या-** **गुरुशुक्रयोः** - सुरासुरमन्त्रिणोः, **केन्द्राधिपत्यदोषस्तु** - केन्द्रपतिदोषः, **बलवान्** - प्रबलः, **अपि च तयोः** - तथा च तयोः, **मारकत्वे** - मारकेशः संजाते, **मारकस्थान संस्थितिः** - मारकेशस्थानोपस्थितिः (बलवती)।

**भावार्थः-** जीवभार्गवयोः केन्द्रपतिदोषः प्रबलो भवति, एवञ्च यदीमौ द्वौ मारकौ भूत्वा मारकस्थाने चेत् स्थितौ तदाऽधिकबलवन्तौ भवतः ।

## रन्ध्रेशदोषनिवृत्तिः

**बुधस्तदनु चन्द्रोऽपि भवेत्तदनु तद्विधः ।**

**न रन्ध्रेशत्वदोषस्तु सूर्य्याचन्द्रमसो-र्भवेत् ॥ ७ ॥**

**अन्वयः-** तदनु बुधः तद्विधः, तदनु चन्द्रः अपि भवेत्, रन्ध्रेशत्वदोषस्तु सूर्य्याचन्द्रमसोः न भवेत् । (अनुष्टुप् छन्दः)

**व्याख्या-** **तदनु** - तत्पश्चात्, **बुधः** - ज्ञः, **तद्विधः** -तादृशः, **तदनु** - तत्पश्चात्, **चन्द्रः** - शशी, **अपि भवेत्** - तथा भवेत्, **रन्ध्रेशत्वदोषस्तु** - मृत्युस्थानाधिपतिः दोषस्तु, **सूर्य्याचन्द्रमसोः** - अर्कविभ्वोः, **न भवेत्** - न जायेत ।

**भावार्थः-** तदनन्तरं रन्ध्रेशः बुधः तादृशः, तदनन्तरं निशाकरोऽपि भवेत्, परन्तु रन्ध्रेशत्वदोषस्तु अर्कविभ्वोः न भवेत् ।

## राहुकेत्वोः शुभाशुभम्

**यद्यद् भावगतौ वापि यद्यद्-भावेशसंयुतौ ।**

**तत्तत्फलानि प्रबलौ प्रदिशेतां तमोग्रहौ ॥ ८ ॥**

**अन्वयः-** प्रबलौ तमोग्रहौ यद्यद् भावगतौ वापि यद्यद्-भावेशसंयुतौ, तत्तत्फलानि प्रदिशेताम् । (अनुष्टुप् छन्दः)

**व्याख्या-** **प्रबलौ** - प्रकृष्टौ, **तमोग्रहौ** - राहुकेतू, **यद्यद् भावगतौ** - यस्मिन् भावे स्थितौ, **वापि** - तथा च, **यद्यद्** - येन्, **भावेशसंयुतौ** - भावेशेन संयुक्तौ, **तत्तत्फलानि** - तादृशानि फलानि, **प्रदिशेताम्** - कुर्वताम्।

**भावार्थः-** प्रबलवन्तौ तमोग्रहौ राहुकेतू यद्यद् स्थानगतौ तथा यद्यद्-भावेशेन सह संस्थितौ तादृशमेव फलं प्रदिशेताम् ।

### मिश्रयोगाः

## केन्द्रत्रिकोणयोगाः

**केन्द्रत्रिकोणपतयः सम्बन्धेन परस्परम् ।**

**इतरैरप्रसक्ताश्चेत् विशेषफलदायकाः ॥ ९ ॥**

**अन्वयः-** केन्द्रत्रिकोणपतयः चेत् इतरैः अप्रसक्ताः ते हि परस्परं सम्बन्धेन विशेष-फलदायकाः । (अनुष्टुप् छन्दः)

**व्याख्या-** **केन्द्रत्रिकोणपतयः** - केन्द्रत्रिकोणाधिपतयः, (केन्द्राणि १, ४, ७, १० - त्रिकोणे ५, ९) **चेत् इतरैः** - कदाचिदन्यैः (ग्रन्थमतानुसारेण त्रिषडायाः ग्राह्याः) **अप्रसक्ताः** - सम्बन्धरहिताः, **ते हि परस्परं** - केन्द्रत्रिकोणाधिपतयः, **सम्बन्धेन** - योगेन, **विशेष** - सविशेष, **फलदायकाः** - फलकारकाः।

**भावार्थः-** केन्द्रत्रिकोणाधिपतयः यदि त्रिषडायाधिपतिभिः सह सम्बन्धरहिताः तथा परस्परं सम्बन्धं कुर्वन्ति तदा विशेष-फलदायकाः भवन्ति ।

## धर्मकर्मयोगौ

**निवसेतां व्यत्ययेन तावुभौ धर्मकर्मणोः ।**

**एकत्रान्यतरो वाऽपि वसेच्चेद्योगकारकौ ॥ १० ॥**

**अन्वयः-** उभौ तौ व्यत्ययेन धर्मकर्मणोः निवसेताम् एकत्र वा अन्यतरः अपि चेत् तदा योगकारकौ (भवेताम्) ।

**व्याख्या-** **उभौ तौ** - धर्मकर्मणोः स्वामिनौ, **व्यत्ययेन** - वैपरित्येन, **धर्मकर्मणोः** - नवमदशमेशयोः, **निवसेताम्** - स्थितिः स्याताम्, **एकत्र** - एकस्मिन् स्थाने, **वा अन्यतर** - अन्यत्र, **अपि चेत् तदा** - तेन कारणेन, **योगकारकौ** - योगसाधकौ (भवेताम्) ।

**भावार्थः-** धर्मकर्मणोः स्वामिनः वैपरित्येन परस्परस्थानस्थितौ अथवा अन्यत्र कुत्रापि तौ द्वौ साकमेव स्थितौ तदा प्रबलयोगकारकौ भवेताम् ।

## राजयोगभङ्गम्

**धर्मकर्माधिनेतारौ रन्ध्रलाभाधिपौ यदि ।**

**तयोः सम्बन्धमात्रेण न योगं लभते नरः ॥ ११ ॥**

**अन्वयः-** धर्मकर्माधिनेतारौ यदि रन्ध्रालाभाधिपौ (भवेतां तदा) तयोः सम्बन्धमात्रेण नरः योगं न लभते ।

**व्याख्या-** **धर्मकर्माधिनेतारौ** - नवमदशमेशौ, **यदि रन्ध्रालाभाधिपौ** - चेत् अष्टमैकादशाधिपौ, (भवेतां तदा) **तयोः** - एतयोः, **सम्बन्धमात्रेण** - योगमात्रेण, **नरः** - जातकः, **योगं** - योगजं फलं **न लभते** - न प्राप्नोति।

**भावार्थः-** भाग्यव्यापाराधिपत्योः सम्बन्धः यदि अष्टमैकादशाधिपत्योः सह सम्बन्धः केनापि प्रकारेण भवति, तदा श्रेष्ठयोगस्य फलं न भवति ।

## मारकयोगाः

### मारकस्थानम्

**अष्टमं ह्यायुषः स्थानमष्टमादष्टमं च यत् ।**

**तयोरपि व्ययस्थानं मारकस्थानमुच्यते ॥१२॥**

**अन्वयः-** अष्टमं हि आयुषः स्थानम्, अष्टमादष्टमं च अपि आयुषः स्थानमुच्यते, तयोरपि व्ययस्थानं मारकस्थानमुच्यते । (अनुष्टुप् छन्दः)

**व्याख्या-** **अष्टमं** - जन्मलग्नात् अष्टमं, **हि आयुषः** - निश्चयेनायुषः, **अष्टमादष्टमं च** - अष्मस्थानात् अष्टमं स्थानम् **अपि आयुषः** - तथैवायुषः, **स्थानमुच्यते** - भावं कथ्यते, **तयोरपि** - अष्टमतृतीयस्थानयोः, **व्ययस्थानं** - द्वादशस्थानं, **मारकस्थानमुच्यते** (२, ७) - मारकनामकस्थानं कथ्यते।

**भावार्थः-** जन्मलग्नादष्टमं स्थानमायुः स्थानम्, अष्मादष्टमपि च यत् स्थानं यत्, तयो अष्टमतृतीययोः व्ययस्थानं (२, ७) मारकस्थानं कथ्यते ।

### द्वितीयस्य बलमाधिक्यम्

**तत्राप्याद्याव्ययस्थानाद् द्वितीयं बलवत्तरम् ॥ १३ ॥**

**अन्वयः-** तत्र अपि आद्यव्ययस्थानात् द्वितीयं बलवत्तरम् ।

**व्याख्या-** **तत्र** - तस्मिन्, **आद्यव्यस्थानात्** - आद्यमारकस्थानात्, **द्वितीयं** - धनस्थानं, **बलवत्तरम्** - बलाधिक्यं पूर्णं भवति ।

**भावार्थः-** अनयोः मारकस्थानयोः मध्ये द्वितीय-स्थानम् अधिकं बलपूर्णमस्ति ।

### मारकविशेषम्

**चन्द्रभानू विना सर्वे मारका मारकाधिपाः ।**

**षष्ठाष्टमव्ययेशास्तु राहुकेतू तथैव च ॥ १४ ॥**

**अन्वयः-** सर्वे मारकाधिपाः मारकाः विना चन्द्रभानू, षष्ठाष्टमव्ययेशाः तु तथैव च राहुकेतू । (अनुष्टुप् छन्दः)

**व्याख्या-** **सर्वे** - सर्वे ग्रहाः, **मारकाधिपाः** - मारकास्थानाधिपाः, **मारकाः** - मारकधर्मवन्ताः (भवन्ति), **विना चन्द्रभानू** - विहाय सूर्य्यचन्द्रौ, **षष्ठाष्टमव्ययेशाः तु** - अरिमृत्युरिष्फेशाः, **तथैव च** - तेनैव प्रकारेण, **राहुकेतू** - तमोग्रहौ (मारकौ) भवतः ।

**भावार्थः-** चन्द्रभानू विना मारकस्थानाधिपाः मारकाः भवन्ति, तत्रान्येषां मतेन षष्ठाष्टमव्ययेशाः तथा राहुकेतू चापि मारकौ भवतः ।

### पुनः मारकविशेषम्

**विपत्ताराप्रत्यरीशौ वधभेशस्तथैव च ।**

**मारका जातके प्रोक्ताः कालविद्भिर्मनीषिभिः ॥ १५ ॥**

**अन्वयः-** कालविद्भिः मनीषिभिः जातके विपत्ताराप्रत्यरीशौ तथैव च वधभेशः मारकाः प्रोक्ताः । (अनुष्टुप् छन्दः)

**व्याख्या-** **कालविद्भिः** - ज्योतिषिभिः, **मनीषिभिः** - बुद्धिमद्भिः, **जातके** - जातकस्य विषये, **विपत्ताराप्रत्यरीशौ**

- तन्नाम ताराधीशौ (भौमजीवेशौ), **तथैव च** - तथैव च, **वधमेशः बुद्धिमन्तैः** - वधकारकनक्षत्रं, **मारकाः** - मारकधर्मवन्ताः, **प्रोक्ताः** - कथिताः ।

**भावार्थः-** कालज्ञैः देवज्ञैः विपत्तारास्वामी प्रत्यरितारास्वामी तथा च वधतारास्वामी अपि मारकाः कथिताः सन्ति ।

## स्वाध्यायः

**१. अधस्तनेषु प्रश्नेषु योग्यमुत्तरं चित्वा लिखत ।**

(१) बुधैः इति शब्देन कोऽर्थः गृह्यते ?

(क) पण्डितैः (ख) सामान्यैः (ग) नागरिकैः (घ) नरैः

(२) त्रिकोणेन कयोः स्थानयोः बोधः ?

(क) २.४ (ख) ५.९ (ग) ६.७ (घ) ८.९

(३) सौम्याः ग्रहाः केन्द्राधिपतयः तदा किदृशं फलं दिशन्ति ?

(क) अशुभम् (ख) शुभाशुभम् (ग) शुभम् (घ) सुन्दरम्

(४) रन्ध्रःकस्य स्थानस्य नाम ?

(क) षष्ठ (ख) सप्तम (ग) अष्टम (घ) नवम

(५) रन्ध्रेशोऽपि शुभसन्धाता केन सह भवति ?

(क) दशमेशेन (ख) एकादशेशेन (ग) द्वादशेशेन (घ) लग्नेशेन

(६) सूर्य्यचन्द्रमसोः कः दोषः न भवति ?

(क) सुखेशः (ख) विद्येशः (ग) सप्तमेशः (घ) रन्ध्रेशः

(७) तमोग्रहौ शब्देन कयोः ग्रहणम् ?

(क) राहुकेतू (ख) शनिशुकौ (ग) बुधगूरू (घ) सूर्यचन्द्रौ

(८) भावेन तथा भावेशेनानुसारेण कौ ग्रहौ फलं ददतः ?

(क) बुधगुरू (ख) सूर्यचन्द्रौ (ग) राहुकेतू (घ) शनिशुक्रौ

(९) केन्द्रत्रिकोणपतयः सम्बन्धेन जातकः किदृशं फलं लभते ?

(क) सामान्यम् (ख) विशेषम् (ग) पूर्णम् (घ) रिक्तम्

(१०) धर्मकर्मणोः योगेन किदृशौ फलदायकौ भवतः ?

(क) मुक्तिकारकः (ख) भक्तिकारकः (ग) भुक्तिकारकः (घ) योगकारकः

**२. अ-विभागेन सह ब-विभागं संयोजयतु ।**

| **अ** | **ब** |
|---|---|
| (अ) रन्ध्रस्थानम् | (अ) ५ - ९, |
| (ब) मारकस्थाने | (ब) ३-६-११, |
| (क) कर्मस्थाम् | (क) ४-५-६, |
| (ड) त्रिषडायानि | (ड) २-७, |
| (इ) त्रिकोणे | (इ) १०, |
| | (उ) ८, |

**३. एकैक-वाक्येनोत्तराणि लिखन्तु ।**

(१) मारकेशस्य स्थानं किम् ?

(२) त्रिषडायानां परिचयं लिखत ।

(३) धर्मकर्मेशयोः योगफलं किम् ?

(४) रन्ध्रेशत्वदोषः कयोः ग्रहयोः न भवति ?

(५) तमोग्रहयोः परिचयं ददत ।

**४. श्लोकपूर्तिं कृत्वा भावार्थो लेख्यः ।**

(१) लग्नाद् व्यय .................. ।

(२) भाग्यव्यया .................. ।

(३) यद्यद् भाव .................. ।

**५. सविस्तरमुत्तरं लिखत ।**

(१) धर्मकर्मेशयोः योगः

(२) मारकस्थानानि

(३) केन्द्रत्रिकोणयोगः

(४) केन्द्राधिपतिदोषः

**६. टिप्पणी लेख्या ।**

(१) मारकनक्षत्राणि

(२) केन्द्राधिपतिदोषः

(३) धर्मकर्मेशयोः योगः

**अध्यापकानां कृते**

- लघुपाराशरी ग्रन्थमवलोकयतु ।

**छात्राणां प्रवृत्तिः**

- धर्मकर्मविषयेऽन्यान् योगान् विचारयत ।

●

# १३ लघुपाराशरीयः ०२

## प्रास्ताविकम्

यथा पृथिव्यामापद्माना: दैवीयापद: ग्रहपिण्डै: नियन्त्रिता: सन्ति तथैव मानवजीवनस्य विकास: विलास: विनाशश्च ग्रहैरेव नियन्त्रित: । मानवस्य जन्मकाले विद्यमाना: ग्रहस्थितय: तस्य जीवने चिरस्थायी सुखि प्रभावान् जनयन्ति । इमा: स्थितय: मानवस्य जन्मकुण्डल्यामपि विविधयोगान् कारयन्ति, तेन केचन जना: जन्मत: सुखिजीवनं, केचन दु:खि-जीवनं, केचनाभावपूर्णं जीवनं जीवन्ति । कश्चनाल्पायु: कश्चनदीर्घायु: कश्चनाधिकायु: प्रभवन्ति । केचनश्रमिका: केचनवैभवपूर्णा: केचननगरपतय: तथा च केचन राजान: भवन्ति । अस्माभि: गतस्वाध्याये विविधयोगविषयकं ज्ञानं लब्धम्। अधुना वयं लघुपाराशरी ग्रन्थपक्षत: राजयोगविषयं पठाम: ।

### राजयोग :

## ग्रहदशायां राजयोग:

**न दिशेयुर्ग्रहा: सर्वे स्वदशासु स्वभुक्तिषु ।**

**शुभाशुभफलं नृणामात्मभावानुरूपत: ॥ १ ॥**

**आत्मसम्बधिनो ये च ये वा निजसधर्मिण: ।**

**तेषामन्तर्दशास्वेव दिशन्ति स्वदशाफलम् ॥ २ ॥**

**अन्वय:-** सर्वे ग्रहा: स्वदशासु स्वभुक्तिषु आत्मभावानुरूपत: शुभाशुभफलं न दिशेयु: । १ ।

**अन्वय:-** आत्मसम्बन्धिन: ये वा निजसधर्मिण: (ग्रहा:) ये च तेषाम् अन्तर्दशासु एव स्वदशाफलं दिशन्ति । २।

**व्याख्या-** **सर्वे ग्रहा:** - नवग्रहा:, **स्वदशासु** - स्वदशावस्थायां, **स्वभुक्तिषु** -स्वभोग्यकाले, **आत्मभावानुरूपत:** - आत्मगुणानुरूपत:, **शुभाशुभफलं** - लाभालाभं, **न दिशेयु:** - न दद्यु: । १।

**व्याख्या-** **आत्मसम्बन्धिन:** - नैसर्गिके वा कुण्डल्यां सम्बन्धिन:, **ये** - ग्रहा:, **वा निजसधर्मिण:** - अथवा निजधर्मानुरूपा:, **ये च** - ग्रहा:, **तेषाम् अन्तर्दशासु** - तादृशानां ग्रहाणाम् अन्तर्दशासु, **एव** - निश्चयेन, **स्वदशाफलं** - निजदशापरिपाकफलं, **दिशन्ति** - ददति । २ ।

**भावार्थ:-** सर्वे ग्रहा: स्वान्तर्दशासु स्वभुक्तिकाले स्वस्वभावानुरूपं शुभाशुभं वा फलं सर्वेभ्य: मानवेभ्य: विशेषरूपेण न यच्छन्ति, परञ्च सामान्यरूपेण शुभाशुभं फलं ददति ।

## सधर्मिणामभावे फलकल्पना

**इतरेषां दशानाथविरुद्ध-फलदायिनाम् ।**

**तत्तत् फलानुगुण्येन फलान्यूह्यानि सूरिभि: ॥ ३ ॥**

**अन्वय:-** सूरिभि: दशानाथविरुद्धफलदायिनाम् इतरेषां तत्तत् फलानुगुण्येन फलानि ऊह्यानि ।

**व्याख्या-** **सूरिभि:** - विद्वद्भि:, **दशानाथविरुद्धफलदायिनाम्** - पाकस्य स्वामी स्वभावेतरे फलकारिणाम् **इतरेषां**

– प्रतिपक्षस्थितानां, **तत्तत्** – तानि तानि, **फलानुगुण्येन** – फलानि गुणानुरूपाणि, **फलानि** – परिपक्वभोग्यानि, **ऊह्यानि** – तर्क्यानि ।

**भावार्थः**– पण्डितैः दशास्वामी सम्बन्धात् रहितानां विरुद्धधर्माणां ग्रहाणाम् अन्तर्दशानुसारेणोभयोः दशास्वामिनोः स्वभावं सम्मिल्य दशाफलं कल्प्यम् ।

## वैशिष्ट्यम्

**स्वदशायां त्रिकोणेशभुक्तौ केन्द्रपतिः शुभम् ।**
**दिशेत्सोऽपि तथा नो चेदसम्बन्धेन पापकृत् ॥ ४ ॥**

**अन्वयः**– (सति सम्बन्धे) केन्द्रपतिः स्वदशायां त्रिकोणेशभुक्तौ शुभं दिशेत् सोऽपि तथा, नो चेदसम्बन्धेन पापकृत् (भवति) ।

**व्याख्या**– **(सति सम्बन्धे) केन्द्रपतिः** – केन्द्रेशः **स्वदशायां** – स्वदशापाककाले, **त्रिकोणेशभुक्तौ** – त्रिकोणाधिपतेः भुक्तिकाले, **शुभं** – श्रेष्ठं, **दिशेत्** – फलं दद्यात् **सोऽपि तथा** – त्रिकोणेशोऽपि, **नो चेत्** – अन्यथा, **असम्बन्धेन** – सम्बन्धाभावे, **पापकृत्** – पापकर्ता (भवति) ।

**भावार्थः**– त्रिकोणेशस्य भुक्तिकाले केन्द्रपतयः शुभं फलं प्रयच्छन्ति यदि ते ग्रहाः पापग्रहैः सह सम्बन्धं न कुर्वन्ति तदा ।

## राजयोगारम्भः

**आरम्भो राजयोगस्य भवेन्मारकभुक्तिषु ।**
**प्रथयन्ति तमारभ्य क्रमशः पापभुक्तयः ॥ ५ ॥**

**अन्वयः**– मारकभुक्तिषु राजयोगस्य आरम्भो भवेत् पापभुक्तयः तमारभ्य क्रमशः प्रथयन्ति ।

**व्याख्या**– **मारकभुक्तिषु** – मारकग्रहान्तर्दशापाककाले, **राजयोगस्य** – राजयोगस्य, **आरम्भो** – प्रारम्भः, (भवेत्), **पापभुक्तयः** – पापभोग्यकालः **तमारभ्य** – तं प्रारभ्य, **क्रमशः** क्रमेण, **प्रथयन्ति** – प्रयच्छन्ति ।

**भावार्थः**– योगकारी ग्रहस्य दशायां तत्तत्–सम्बन्धी मारकग्रहस्य अन्तर्दशायां राजयोगस्य प्रारम्भः यदि पापमारकग्रहस्य अन्तर्दशायां राजयोगं प्रारभ्य शनैः शनैः वर्धते ।

## राजयोगः

**तत्सम्बन्धिशुभानां च तथा पुनरसंयुजाम् ।**
**शुभानां तु समत्वेन संयोगो योगकारिणाम् ॥ ६ ॥**

**अन्वयः**– तथा च तत्सम्बन्धिशुभानां पुनरसंयुजां योगकारिणां शुभानां तु संयोगः समत्वेन (स्यात्) ।

**व्याख्या**– **तथा च** – तेनेव प्रकारेण, **तत्सम्बन्धिशुभानां** – दशासम्बन्धिमित्रग्रहाणां, **पुनरसंयुजां** – तथा चासम्बन्धिग्रहाणां, **योगकारिणां** – संयोगकारिणां, **शुभानां तु** – श्रेष्ठानां तु, **संयोगः** – सहयोगः, **समत्वेन** –समानभावेन (स्यात्) ।

**भावार्थः**– योगकारिणां ग्रहाणां दशायां तत्सम्बन्धि ग्रहाणामन्तर्दशायाम् एवं च योगकारिणां ग्रहाणां दशायां तदसम्बन्धि ग्रहाणामन्तर्दशायां फलं सामान्यं लभते (नोच्चं न नीचम्) ।

## विशेषम्

**शुभस्यास्य प्रसक्तस्य दशायां योगकारकाः ।**
**स्वभुक्तिषु प्रयच्छन्ति कुत्रचित् योगजं फलम् ॥ ७ ॥**

**अन्वयः-** अस्य प्रसक्तस्य शुभस्य दशायां योगकारकाः, (ग्रहाः) स्वभुक्तिषु कुत्रचित् योगजं फलं प्रयच्छन्ति ।

**व्याख्या-** **अस्य प्रसक्तस्य** - सम्बन्धिग्रहस्य, **शुभस्य** - शुभकरस्य, **दशायां** - परिपक्वकाले, **योगकारकाः** - संयोगदा (ग्रहाः) **स्वभुक्तिषु** - स्वभोग्यकाले, **कुत्रचित्** - कदाचित् **योगजं फलं** - संयोगजं पाकं, **प्रयच्छन्ति** - प्रकर्षेण ददन्ति ।

**भावार्थः-** योगकारकग्रहः स्वसम्बन्धि शुभग्रहस्य महादशायां स्वान्तर्दशायां क्वचित् योगजं करोति ।

## राहुकेत्वोः वैशिष्ट्यम्

**तमौग्रहौ शुभारूढावसम्बन्धेन केनचित् ।**

**अन्तर्दशानुसारेण भवेतां योगकारकौ ॥८॥**

**अन्वयेः-** तमोग्रहो शुभारूढौ केनचित् असम्बन्धेन अन्तर्दशानुसारेण योगकारकौ भवेताम् ।

**व्याख्या-** **तमोग्रहो** - राहुकेतू, **शुभारूढौ** - शुभस्थानस्थितौ, (स्याताम्) **केनचित्** - योगकारकग्रहेण, **असम्बन्धेन** - सम्बन्धिराहित्येनाऽपि, **अन्तर्दशानुसारेण** - निजान्तर्गतदशानुसारेण, **योगकारकौ** - श्रेष्ठफलदायकौ, **भवेताम्** - स्याताम् ।

**भावार्थः-** राहुकेतू यदि शुभस्थानस्थितौ स्यातां तदा ते स्वदशानुसारेण शुभं फलं कुरूतः यदि ते पापग्रहैः सह सम्बन्धं न कुर्वन्ति तदा ।

## विख्यातविजयी योगः

## विख्यातिकारकयोगाः

**कर्मलग्नाधिनेतारावन्योन्याश्रयसंस्थितौ ।**

**राजयोगाविति प्रोक्तं विख्यातो विजयी भवेत् ॥ ९ ॥**

**अन्वयः-** कर्मलग्नाधिनेतारौ अन्योन्याश्रयसंस्थितौ (यदि) राजयोगौ इति प्रोक्तं, (तेन जातकः) विख्यातो विजयी भवेत् ।

**व्याख्या-** **कर्मलग्नाधिनेतारौ** - लग्नदशमाधीशौ, **अन्योन्यं** - परस्परं **आश्रयसंस्थितौ** - आधारितौ, (यदि- तदा) **राजयोगौ** - राज्यसुखदायकयोगौ, **इति प्रोक्तं** - कथितं, (तेन जातकः) **विख्यातः** - प्रख्यातः, **विजयी** - विजेता, **भवेत्** - स्यात् ।

**भावार्थः-** कर्मेशः तथा लग्नेशः परस्परस्थानगतौ चेत् तदा जातकः राजयोगस्य फलं लभते, जातकोऽयं विख्यातः विजयी भवति ।

## प्रकारन्तरेणायं योगः

**धर्मलग्नाधिनेतारावन्योन्याश्रयसंस्थितौ ।**

**राजयोगाविति प्रोक्तं विख्यातो विजयी भवेत् ॥ १० ॥**

**अन्वयः-** धर्मलग्नाधिनेतारौ अन्योन्याश्रयसंस्थितौ (यदि) राजयोगौ इति प्रोक्तं, (तेन जातकः) विख्यातो विजयी भवेत् ।

**व्याख्या-** **धर्मलग्नाधिनेतारौ** - लग्नदशमाधीशौ, **अन्योन्यं** - परस्परं **आश्रयसंस्थितौ** - आधारितौ, (यदि-तदा) **राजयोगौ** - राज्यसुखदायकौ योगौ, **इति प्रोक्तं** -कथितं, (तेन जातकः) **विख्यातः** - प्रख्यातः, **विजयी** - विजेता, **भवेत्** - स्यात् ।

**भावार्थः-** धर्मेशः तथा लग्नेशः परस्परस्थानगतौ चेत् तदा जातकः राजयोगस्य फलं लभते, जातकोऽयं विख्यातः विजयी भवति ।

## श्रीलक्ष्मीस्थानं विष्णुस्थानम्

**लक्ष्मीस्थानं त्रिकोणं स्यात् विष्णुस्थानं तु केन्द्रकम् ।**

**तेषां संयोगमात्रेण चक्रवर्ती नरो भवेत् ॥ ११ ॥**

**अन्वयेः-** लक्ष्मीस्थानं त्रिकोणं, (तथा) विष्णुस्थानं तु केन्द्रकं स्यात्, तेषां संयोगमात्रेण नरः चक्रवर्ती भवेत् ।

**व्याख्या-** **लक्ष्मीस्थानं** - श्रीस्थानं, **त्रिकोणं** - नवपञ्चमं, (तथा) **विष्णुस्थानम्** - ईशस्थानं, **तु केन्द्रकं** - प्रथमचतुर्थसप्तमदशमम्, **स्यात्** - भवेत्, **तेषाम्** - एतेषां, **संयोगमात्रेण** - सम्मेलनेन, **नरः** - जातकः, **चक्रवर्ती** - राजा, **भवेत्** - जायेत ।

**भावार्थः-** जन्मकुण्डल्यां यदि केन्द्रत्रिकोणेशानां कुत्राऽपि संयोगः भवति तदा जातकः चक्रवर्ती भवति ।

## अन्यराजयोगम्

**तपः स्थानाधिपो मन्त्रे मन्त्रनाथेऽथवा गुरौ ।**

**उभावन्योन्य-संदृष्टौ जातश्चेद् बहुराज्यभाक् ॥ १२ ॥**

**अन्वयः-** तपः स्थानाधिपः मन्त्रे मन्त्रनाथे अथवा गुरौ, चेद् उभौ अन्योन्य संदृष्टौ (तदा) जातः बहुराज्यभाक् (भवति) ।

**व्याख्या-** **तपः स्थानाधिपः** - नवमस्थानाधीशः, **मन्त्रे** - पञ्चमे **मन्त्रनाथे** - पञ्चमेशे, **अथवा गुरौ** - बृहस्पतौ, **चेद् उभौ** -कदाचित् तौ उभौ, **अन्योन्य** - परस्परं, **संदृष्टौ** - अवलोकितौ, (तदा) **जातः** - नरः **बहुराज्यभाक्** - बहुराज्यसुखभोक्ता (भवति) ।

**भावार्थः-** नवमेशः पञ्चमेशः वा यदि अन्योन्यं पश्यतः, अथवा गुरुरिमावुभौ पश्यतः, तदा जातः नरः राज्यसुखभोक्ता भवति ।

## पुनः तदेव

**यत्र कुत्राऽपि संयुक्तौ तौ चापि समसप्तमौ ।**

**राजवंशोद्भवो बालो राजा भवति निश्चितम् ॥ १३ ॥**

**अन्वयः-** यत्र कुत्राऽपि संयुक्तौ तौ चापि समसप्तमौ, बालः राजवंशोद्भवः निश्चितं राजा भवति ।

**व्याख्या-** यत्र कुत्राऽपि - यस्मिन् कस्मिन् अपि, संयुक्तौ-मिलितौ, तौ-पञ्चमनवमेशौ, चापि-तथा च, समसप्तमौ-सप्तमस्थाने पतितौ, (तदा) बालः - बालकः, राजवंशोद्भवः-राजकुलोत्पन्नः, निश्चितं - निश्चयेन, राजा भवति- भूपतिः जायते ।

**भावार्थः-** यस्मिन् कस्मिन्नपि स्थाने पञ्चमनवमेशौ संयुक्तौऽथवा गुरुणा सह सप्तमे स्थाने स्थितौ तदा राजकुलोत्पन्नस्य बालकस्य भूपतित्वं निश्चितमस्ति ।

## राजयोगान्तरम्

**वाहनेशे तथा माने मानेशे वाहने गते ।**

**बुद्धिधर्माधिपाभ्यान्तु द्रष्टौ चेद् बहुराज्यभाक् ॥ १४ ॥**

**अन्वयः-** वाहनेशे तथा माने मानेशे वाहने गते, बुद्धिधर्माधिपाभ्यां चेद् द्रष्टौ (तदा) तु बहुराज्यभाक् ।

**व्याख्या-** **वाहनेशे** - सुखेशे **तथा माने** - तथा च भाग्येशे, **मानेशे** - भाग्येशे **वाहने** - सुखे, **गते** - याते, **बुद्धिधर्माधिपाभ्यां** - पञ्चमनवमाभ्यां, **चेद्** - यदि, **द्रष्टौ** - विलोकितौ, **(तदा) तु बहुराज्यभाक्** - बहुराज्यभोक्ता भवतीति शेषः ।

**भावार्थः-** वाहनेशः भाग्ये गतः, भाग्येशः वाहने गतः, पञ्चमेशेन तथा नवमेशेन तौ द्वौ विलोकितौ तदा जातकः बहुराज्यभोगंभोक्ता भवति।

## पुनः राजयोगः

**सुखकर्माधिपौ चैव मन्त्रनाथेन संयुतौ ।**
**धर्मनाथेन संदृष्टौ जातश्चेद् बहुराज्यभाक् ॥ १५ ॥**

**अन्वयः-** सुखकर्माधिपौ चैव मन्त्रनाथेन संयुतौ चेद् धर्मनाथेन संदृष्टौ जातः बहुराज्यभाक् (भवति) ।

**व्याख्या-** **सुखकर्माधिपौ** - चतुर्थदशमेशौ, **चैव** - तथा, **मन्त्रनाथेन** - पञ्चमेन, **संयुतौ** - संयुक्तौ, **चेद्** - अथवा, **धर्मनाथेन** - नवमेन, **संदृष्टौ** - विलोकितौ, **जातः** - उत्पन्नः, **बहुराज्यभाक्** - अनेकराज्यभोक्ता (भवति)।

**भावार्थः-** चतुर्थदशमेशौ पञ्चमेशेन सहितौ नवमेशेनावलोकितौ तदा उत्पन्नः जातकः बहुराज्योपभोक्ता भवति ।

## पुनः राजयोगः

**सुतेश्वरो धर्मपसंयुतश्चेल्लग्नेश्वरेणापि युतो विलग्ने ।**
**सुखेऽथवा मानगृहेऽथवा स्याद्राज्याभिषिक्तो यदि राजवंश्यः ॥ १६ ॥**

**अन्वयः-** सुतेश्वरो धर्मपसंयुतः चेत् लग्नेश्वरेणापि युतो विलग्ने, सुखेऽथवा यदि मानगृहे स्याद् , राजवंश्यः राज्याभिषिक्तः (भवति) ।

**व्याख्या-** **सुतेश्वरः** - सुतस्थानाधिपतिः, **धर्मपसंयुतः** - नवमेशेन संयुक्तः, **चेत् लग्नेश्वरेणापि** - लग्नेशेनापि, **युतः** - संयुतः, **विलग्ने** - प्रथमे, **सुखे** - चतुर्थे, अथवा वा यदि **मानगृहे** - नवमगृहे स्यात्, **राजवंश्यः** - राजकुलोत्पन्नः, **राज्याभिषिक्तः** - राजयोगेनाभिषिञ्चितः ।

**भावार्थः-** पञ्चमेशः नवमेशेन संयुतः तथा च लग्नेश्वरेणापि युक्तः चतुर्थेऽवा नवमे यदि भवेत् जातकस्य राजयोगः निश्चितः ।

## स्वाध्यायः

**१. अधस्तनेषु विकल्पेषु योग्यमुत्तरं चित्वा लिखत ।**

(१) ग्रहाः किदृक्-दशासु फलं न दिशन्ति ?
(क) देवदशासु (ख) हीनदशासु (ग) स्वदशासु (घ) घोरदशासु

(२) सूरिभिरनुगुण्येन किमूह्यम् ?
(क) नक्तम् (ख) धनम् (ग) जीवनम् (घ) फलम्

(३) त्रिकोणेश अर्थात् कः ग्रहः ?
(क) नवमेशः (ख) दशमेशः (ग) एकादशेशः (घ) द्वादशेशः

(४) त्रिकोणेश भुक्तौ पापकृदसम्बन्धेन नरः किदृशं फलं लभेत् ?
(क) मिश्रम् (ख) शुभम् (ग) भिन्नम् (घ) शान्तम्

(५) पापभुक्तयः कमारभ्य फलं प्रथयन्ति ?
(क) भक्तियोगम् (ख) कर्मयोगम् (ग) ज्ञानयोगम् (घ) राजयोगम्

(६) शुभानां तु समत्वेन संयोगः किदृक् ?
(क) योगकारी (ख) ज्ञानदायी (ग) दुःखदायी (घ) सुखकारी

(७) योगकारका: स्वभुक्तिषु कुत्रचित् योगजं किं प्रयच्छन्ति ?

(क) धनम् (ख) वनम् (ग) ज्ञानम् (घ) फलम्

(८) तमोग्रहौऽन्तर्दशानुसारेण कदा योगकारकौ भवेताम् ?

(क) सुखारूढौ (ख) गरुडारूढौ (ग) शुभारूढौ (घ) वाहनारूढौ

(९) जातक: विख्यातो विजयी भवेत् ?

(क) विभूतियोगे (ख) ध्यानयोगे (ग) मानयोगे (घ) राजयोगे

(१०) धर्मकर्मणो: संयोगेन क: योग: भवति ?

(क) कर्मयोग: (ख) धर्मयोग: (ग) धर्मकर्मयोग: (घ) राजयोग:

**२ एकैक-वाक्येनोत्तराणि लिखन्तु ।**

(१) सर्वे ग्रहा: स्वभुक्तिकाले किदृशं फलं ददति ?

(२) दशेश: कदा बलवान् भवति ?

(३) धर्मकर्माधिपयो: मेलने किं फलम् ?

(४) धर्मलग्नाधिपयो: मेलने किं फलम् ?

(५) अन्तर्दशानुसारेण तमोग्रहौ कदा बलवन्तौ भवत: ?

**३ श्लोकपूर्तिं कृत्वा भावार्थो लेख्य: ।**

१. तमोग्रहौ ..................... ।

२. शुभस्या ..................... ।

३ सुखधर्मा ..................... ।

**४ अ-विभागेन सह ब विभागेन सह सुयोजयतु ।**

| **अ** | **ब** |
|---|---|
| (१) सुखस्थानम् | (१) ९ |
| (२) धर्मस्थानम् | (२) ४ |
| (३) जायास्थानम् | (३) १२ |
| (४) रिष्फस्थानम् | (४) ७ |
| (५) पितृस्थानम् | (५) ६ |
| | (६) ५ |

**५ टिप्पणी लेख्या ।**

(१) राजयोगदशा

(२) राजवंशोद्भव:

(३) तमोग्रहौ

**६ विस्तरेणोत्तराणि लिखत ।**

(१) राजयोग:

(२) समसप्तक:

(३) बहुराज्यभाक्

(४) राजवंशोद्भव:

**अध्यापकानां कृते**

- मध्यपाराशरी ग्रन्थमवलोकयतु ।

**छात्राणां प्रवृत्ति:**

- राजयोगविषयेऽन्यान् योगान् विचारयत ।

# १४ विविधयोगाध्यायः ०१

## प्रास्ताविकम्

''ज्यौतिषं प्रत्यक्षं शास्त्रं चन्द्रर्कौ यस्य साक्षिणौ'' । इति न्यायेनास्य शास्त्रस्याद्भूतं महत्त्वं समाजे दरीदृश्यते । सूर्यलोकात् वा चन्द्रलोकात् कश्चित्जनः पृथिव्यां नागच्छति तथैव पृथ्वीलोकतः कश्चित् न तत्र सूर्यलोकं वा चन्द्रलोकं गच्छति तथाऽपि सूर्यग्रहणस्य वा चन्द्रग्रहणस्य विषये दैवज्ञाः यथा समयं निर्दिशन्ति तथा सूर्यस्य वा चन्द्रस्य ग्रहणं भवति । अस्यां ग्रहणस्य भ्रमणायां ग्रहगणितमेव ग्रहयोगो हि कारणं, तथैव मानवजीवनस्य सुखदुःखाप्तिकालस्य बोधकं तु ग्रहगणितमेव । जीवनस्य श्रेष्ठं वा हीनं फलं तु योगस्य कारणेन प्राप्यते तत्रापि कारणं जन्माङ्गचक्रे स्थितग्रहाणां योगाः ।

कुण्डल्यां केन योगेन जातकः कामी, क्रोधी, लोभी, सुखी, दुःखी,यतिः, दण्डी वा राजा भवति तदत्र विस्तारेण पठामः ।

## क्रोधयोगः

**क्रोधयुक् स नरः पापी तदीशे गुलिकान्विते ।**

**पापयोगबहुत्वेऽस्मिन् नीचशत्रु-वशं गतः ॥ १ ॥**

**अन्वयः-** तदीशे गुलिकान्विते, अस्मिन् पापयोगबहुत्वे, (ईशः) नीचशत्रु वशं गतः स नरः पापी क्रोधयुक्त भवति ।

**व्याख्या-** **तदीशे** – द्वितीयेशे, **गुलिकान्विते** – मान्दीसहिते, **अस्मिन्** – धनस्थाने, **पापयोगबहुत्वे** – बहुपापीखेचरयुक्ते, (तदीशे) **नीचशत्रुवशं गतः** – निम्न वा शत्रुराश्यां गते, **स नरः** – स जातकः, **पापी** – पापाचारी, **क्रोधयुक्** – क्रोधकर्ता (भवति) ।

**भावार्थः-** धनेशे मान्दीयुक्ते द्वितीयेऽधिकक्रूरखेचरे तथा च द्वितीयेशे नीचशत्रुराश्यां गते, (सति) जातकः पापी तथा च क्रोधी भवति ।

## जारजादियोगः

**षण्मातृपौ पितृस्थाने पितुश्च व्यभिचारदौ ।**

**मातृतातारिदेहेशैरेकस्थैः परजातकः ।। २ ॥**

**अन्वयः-** षण्मातृपौ पितृस्थाने पितुश्च व्यभिचारदौ मातृतातारिदेहेशैरेकस्थैः परजातकः ।

**व्याख्या-** **षण्मातृपौ** – चतुर्थषष्ठेशौ, **पितृस्थाने** – पञ्चमस्थाने, **पितुश्च** – जनकस्य, **व्यभिचारदौ** – परजायासङ्गमः, **मातृतातारिदेहेशैरेकस्थैः** – सुखकर्मशत्रुलग्नेशाः सहस्थिताः (तदा) **परजातकः** – जातकः परेणोत्पन्नः भवति।

**भावार्थः-** यदि जातकस्य जन्माङ्गचक्रे सुखारी नवमे तदा नरस्य पिता व्यभिचारी, ह्यथवा मातृपितृशत्रुलग्नाधीशा एकत्रीभूताः तदा जातकोऽप्यन्यस्मात् जातः भवति ।

## कुष्ठादिचर्मयोग:

**निशाकरे कार्मुकमध्यभागे मृगांशकर्कीवृषभागयुक्ते ।**

**मन्दारयुक्ते तदवेक्षणे वा कुष्ठी भवेत्सौम्यदृशा विहीने ॥ ३ ॥**

**अन्वय:-** निशाकरे कार्मुकमध्यभागे, मृगांशकर्कीवृषभागयुक्ते मन्दारयुक्ते तदवेक्षणे वा सौम्यदृशा विहीने (जातक:) कुष्ठी भवेत् ।

**व्याख्या-** **निशाकरे** - चन्द्रे, **कार्मुकमध्यभागे** - धनुमध्यभागे, (नवांशे - सिंहांशे) **मृगांशकर्कीवृषभागयुक्ते** - वृषभकर्कमकराणां नवांशे **मन्दारयुक्ते** - शनिमङ्गलसहिते, **तदवेक्षणे** - तेन दृष्टे, **वा** -अथवा, **सौम्यदृशा** - शुभग्रहदृष्ट्या, **विहीने** - रहिते, **(जातक:) कुष्ठी** - कुष्ठरोगधारी भवेत् ।

**भावार्थ:-** यदि चन्द्रमा: धनराशिनवांशे (सिहांशे) अथवा गोकर्कनक्रांशे रविभूमिपुत्राभ्यां सहिते दृष्टे वा जातकाय कुष्ठरोग: वा चर्मरोगा: भवन्ति ।

## विकलाङ्गपतितयोग:

**माने शशाङ्के सबुधे कलत्रे**

**शनौ द्वितीये विकलाङ्गमेति ।**

**जातिच्युतिर्नीचसपत्नभाग -**

**समन्वितास्तेऽपि विनिश्चितार्थ: ॥ ४ ॥**

**अन्वय:-** माने शशाङ्के सबुधे कलत्रे, शनौ द्वितीये विकलाङ्गमेति, जातिच्युतिर्नीचसपत्नभागसमन्वितास्तेऽपि विनिश्चितार्थ:।

**व्याख्या-** **माने** - दशमे, **शशाङ्के** - चन्द्रे, **सबुधे** - बुधे, **कलत्र** - सप्तमे, **शनौ** - मन्दे, **द्वितीये** - धनभुवने, **विकलाङ्गमेति** - ख़ञ्जतामेति, **जातिच्युति:** - ज्ञातिपात:, **नीचसपत्नभागसमन्विता** - नीच वा शुत्रराशिस्थिता:, **तेऽपि** - एते ग्रहा:, **विनिश्चितार्थ:** - सुनिश्चितार्थ: ।

**भावार्थ:-** यदा दशमे भावे शशी, सप्तमे बुध:, तथा च द्वितीये शनि भवति तदा जातक: विकलाङ्ग: भवति । यदीमे ग्रहा: नीचा: अथवा शत्रुराशिस्थिता: तदा जातकस्य जातिभ्रंशता तथा जातिबहिष्कृति: भवति ।

## बुद्धिहीनादियोगा:

**स्वांशे भास्वति कामगे मृदुरतिक्रीडाविनोदी पति-**

**श्चन्द्रे सौख्यमुपैति भूमितनये जारो वधूतत्पर: ।**

**विद्वान् चन्द्रसूते जितेन्द्रियवरो जीवे मदस्थानगे**

**शुक्रे कान्तवपु: सुखी च रविजे वृद्धोऽतिमूर्खो भवेत् ॥ ५ ॥**

**अन्वय:-** भास्वति कामगे स्वांशे मृदुरतिक्रीडाविनोदी पति:, चन्द्रे सौख्यमुपैति, भूमितनये जारो वधूतत्पर:, चन्द्रसूते विद्वान्, जीवे जितेन्न्द्रियवरो मदस्थानगे शुक्रे कान्तवपु: च रविजे सुखी वृद्धोऽतिमूर्खो भवेत् ।

**व्याख्या-** **भास्वति** - सूर्ये, **कामगे** - सप्तमे, **स्वांशे** - स्वनवांशे, **मृदुरतिक्रीडाविनोदी** - एतादृश: क्रीडावान् **पति:**- स्वामी **चन्द्रे सौख्यमुपैति** -शशिनि सौख्यमाप्नोति, **भूमितनये** - क्ष्मासुते, **जार:** - व्यभिचारी, **वधूतत्पर:**-पत्नीरत:, **चन्द्रसुते** - ज्ञे, **विद्वान्** - शास्त्रज्ञ:, **जीवे** - गुरौ, **जितेन्द्रियवर:** - इन्द्रियजित्, **मदस्थानगे** - सप्तमे, **शुक्रे** - अभ्रे, **कान्तवपु:** - दीप्तिमान् (शरीरधारी), **च रविजे** -शनौ, **सुखी** - सुखपूर्ण:, **वृद्धोऽतिमूर्खो** - वृद्ध: तथा मूर्ख: भवेत् ।

**भावार्थ:-** सूर्ये यदि जामित्रे तदा मृदुरतिक्रीडाविनोदी पतिः प्राप्यते, सोमे जामित्रे स्वनवांशे सुखमाप्नोति, भौमे जामित्रे स्वनवांशे पतिः जारो वधूतत्परः, बुधे जामित्रे स्वनवांशे शास्त्रज्ञः, गुरौ सप्तमस्थानगे स्वनवांशे जितेन्द्रियवरः, दानवगुरौ सप्तमस्थानगे स्वनवांशे सुन्दरवपुः, तथा शनौ सप्तमस्थाने स्वनवांशे जातकः सुखी वृद्धोऽतिमूर्खश्च भवेत् ।

## हृच्छूलयोग:

**चन्द्रे तु गोकर्कटराशियुक्ते पापान्विते तद्विपरीतयुक्ते ।**
**उन्मण्डलस्थौ शशिभौमसंज्ञौ पापान्विते सौम्यदृशा विहीनौ ॥ ६ ॥**

**अन्वय:-** चन्द्रे तु गोकर्कटराशियुक्ते पापान्विते तद्विपरीतयुक्ते, उन्मण्लस्थौ शशिभौमसंज्ञौ पापान्वितौ सौम्यदृशा विहीनौ, हृच्छूलभाग् जातनरस्तु नित्यम् ।

**व्याख्या-** **चन्द्रे** - सोमे, **तु** - निरर्थके पादपूरणे, **गोकर्कटराशियुक्ते** - वृषकर्कराशिसहिते, **पापान्विते** - पापग्रहसमन्विते, **तद्विपरीतयुक्ते** - तद्विपरितरूपे, **उन्मणलस्थौ** - दिनरात्र्योःक्षयवृद्धिकारीस्थितौ (मण्डलभेदे) **शशिभौमसंज्ञौ** - सोमभौमसंज्ञो, **पापान्वितौ** - सपापौ, **सौम्यदृशा** - शुभदृष्ट्या, **विहीनौ** - रहितौ, **हृच्छूलभाग्** - हृदयरोगी, **जातनरस्तु** - जातकः तु, **नित्यम्** - सदैव ।

**भावार्थ:-** चन्द्रमा यदि वृषकर्कराशिस्थः तथा पापग्रहसहितः वा पापग्रहदृष्टः तदा जातकः हृद्रोगी भवति । एवञ्च यदि सोमभौमौ पापग्रहयुक्तौ वा दृष्टौ तथोन्मण्डलस्थावपि हृद्रोगकारकौ भवतः ।

## स्वाध्याय:

**१. अधस्तनेषु प्रश्नेषु योग्यमुत्तरं चित्वा लिखत ।**

(१) ईशे गुलिकान्विते नरः किदृशः जायते ?

(क) बहुभुक् पापी (ख) क्रोधयुक् पापी (ग) धनभुक् पापी (घ) श्राद्धभुक् पापी

(२) मातृतातारिदेहेशैरेकस्थैः नरः किदृशः जायते ?

(क) स्वयं जातकः (ख) कुलजातकः (ग) मिश्रजातकः (घ) परजातकः

(३) शनौ द्वितीये सति नरः किमाप्नोति ?

(क) विकलाङ्गताम् (ख) विद्याम् (ग) मौनम् (घ) जाड्यत्वम्

(४) जातकस्य कुण्डल्यां मन्दारयुक्ते तदवेक्षणे सौम्यदृशा विहीने ग्रहाः किं कुर्वन्ति ?

(क) सृष्टी (ख) तुष्टी (ग) मुष्टी (घ) कुष्ठी

(५) माने शशाङ्के सबुधे कलत्रे शनौ द्वितीये किमेति ?

(क) विकलाङ्गमेति (ख) धनमेति (ग) ज्ञानमेति (घ) मानमेति

(६) भास्वति कामगे स्वांशे मृदुरतिक्रीडाविनोदी कः भवति ?

(क) गतिः (ख) नतिः (ग) यतिः (घ) पतिः

(७) सोमे गोकर्कराशियुक्ते सपापे नरः किदृशः जायते ?

(क) पादशूली (ख) उदरशूली (ग) कर्णशूली (घ) हृच्छूली

(८) कामगे स्वांशे जीवे स्थिते जातकः किदृशो भवति ?

(क) अर्थपरः (ख) श्रेष्ठिवरः (ग) इन्द्रियपरः (घ) जितेन्द्रिवरः

(९) उन्मण्डलस्थौ शशिभौमसंज्ञौ पापान्वितौ किं कुरूतः ?

(क) हृद्रोगी (ख) कर्मयोगी (ग) धर्मयोगी (घ) मर्मयोगी

(१०) स्वांशे नवांशे शुक्रे स्थिते जातकस्य किं भवति ?

(क) कान्तवपुः (ख) श्रान्तवपुः (ग) स्थूलवपुः (घ) वपुः

**२. एकैक-वाक्येनोत्तराणि लिखन्तु ।**

(१) जातकः कथं क्रोधी भवति ?

(२) जातकः कथं कुष्ठी भवति ?

(३) जातकः कथं खञ्जः भवति ?

(४) जातकः कथं बुद्धिहीनः भवति ?

(५) जातकः कथं हृच्छूली भवति ?

**३. श्लोकपूर्तिं कृत्वा भावार्थो लेख्यः ।**

(१) माने शशाङ्के ......................... ।

(२) स्वांशे भास्वति ......................... ।

(३) चन्द्रे तु गोकर्कट ......................... ।

**४. अ-विभागेन सह ब-विभागेन सह सुयोजयतु ।**

| अ | ब |
|---|---|
| (१) सूर्य्यः | (१) कान्तवपुः |
| (२) शशी | (२) जितेन्द्रीयवरः |
| (३) क्ष्मासुतः | (३) विनोदी पतिः |
| (४) शशिसुतः | (४) विद्वान्पतिः |
| (५) सुरगुरूः | (५) जारपतिः |
| | (६) सौख्यम् |

**५. टिप्पणी लेख्या ।**

(१) क्रोधयोगः

(२) जारजयोगः

(३) हृद्रोगी योगः

**६. सविस्तरमुत्तरं लिखतु ।**

(१) स्वांशे नवांश विस्तारेण बोधयत ।

(२) नरः हृद्रोगी कथं भवति ।

(३) क्रोधकारक योगं चर्चयत ।

(४) जारजत्वं कथमागच्छति ।

**अध्यापकानां कृते**

- जातकपारिजातं ग्रन्थमवलोकयत ।

**छात्राणां प्रवृत्तिः**

- मानवजीवनस्य विषयेऽन्यान् योगान् विचारयत ।

# १५ विविधयोगाध्यायः ०२

## प्रास्ताविकम्

युजिर् योगे धातोः योगः शब्दः । यत्र ग्रहाणां मेलनं तद्योगः कथ्यते । योगशब्दः संस्कृतसाहित्ये महत्त्वपूर्णोऽस्ति। यथा श्रीमद्-भगवद्-गीतादि शास्त्रेषु 'योगः कर्मसु कौशलम्' 'योगश्चित्तवृतिनिरोधः' 'योगक्षेमं वहाम्यहम्' इत्यादि ध्रुववाक्यानि सन्ति । बहवः ग्रन्थाः केवलं योगस्योपरि व्याख्यानं कुर्वन्ति । अतः योगशब्दस्याधिकं महत्त्वं दरीदृश्यते। गतपाठेऽपि योगस्य विषये पठितमस्ति तथाऽपि पुनरन्येषां योगानां विषये पठाम : ।

## मनुष्यस्वभावयोगः

**नरश्चिरायुर्नृपपूजितः सुखी लग्ने भवेत्सौम्यगृहं यथा तथा ।**

**लग्नं यदा स्वामिनिरीक्षिते धनी कुशाग्रबुद्धिः कुलकीर्तिवर्द्धन ॥ १ ॥**

**अन्वयः-** लग्नं यथा सौम्यगृहं नरः तथा चिरायुः नृपपूजितः सुखी भवेत्, लग्ने यदा स्वामिनिरीक्षिते (तदा) धनी कुशाग्रबुद्धिः कुलकीर्तिवर्द्धनः ।

**व्याख्या-** **लग्नं** - होरा, **यथा सौम्यगृहं** - सौम्यतापूर्णं, **नरः** - जातकः **तथा चिरायुः** - दीर्घायुः, **नृपपूजितः** - राजपूजितः, **सुखी** - संपन्नः, **भवेत्** - जायते, **लग्ने** - उदये, **यदा स्वामिनिरीक्षिते** - ग्रहपतिना द्रष्टे, **(तदा) धनी** - वसुमान्, **कुशाग्रबुद्धिः** - तीक्ष्णबुद्धिः, **कुलकीर्तिवर्द्धनः** - कुलदीपकःभवति।

**भावार्थः-** जातकस्य जन्माङ्गचक्रस्य प्रथमं स्थानं यादृशं सौम्यं तथा सुखपूर्णं तस्य जातकस्य जीवनं भवति । यदि लग्नस्थानं लग्नेश्वरेण निरीक्षितं तदा जातकः कुशाग्रबुद्धिः स्वकुलकीर्तिवर्धकश्च भवति ।

## प्रव्रज्यायोगः

**चन्द्रे कर्कटकोदये च बलिभिः शुक्रज्ञजीवेन्दुभि -**

**र्नानाशास्त्रकलारसज्ञचतुरा विख्यात-तेजस्विनी ।**

**कामस्थैरथवा विलग्नभवनाद्धर्मस्थितैः खेचरैः**

**प्रव्रज्यामुपयाति जन्मसमये पाणिग्रहे चिन्तयेत् ।। २ ॥**

**अन्वयः-** जन्मसमये कर्कटकोदये चन्द्रे च बलिभिः शुक्रज्ञजीवेन्दुभिः नानाशास्त्रकलारसज्ञचतुरा विख्यात तेजस्विनी, विलग्नभवनात् कामस्थैरथवा धर्मस्थितैः खेचरैः पाणिग्रहे प्रव्रज्यामुपयाति चिन्तयेत् ॥

**व्याख्या-** **जन्मसमये** - जन्मकाले, **चन्द्रे** - शशिनि, **कर्कटकोदये** - कर्कलग्ने, **च बलिभिः** - बलपूर्णैः, **शुक्रज्ञजीवेन्दुभिः** - अभ्रबुधगुरुभिः **नानाशास्त्रकलारसज्ञचतुरा** - विविधशास्त्रकौशलपूर्णा, **विख्यात** - प्रख्यात, **तेजस्विनी** -तेजःपूर्णा, **विलग्नभवनात्** - लग्नस्थानात् **कामस्थैः** - सप्तमस्थैः, **अथवा धर्मस्थितैः** - भाग्यस्थितैः, **खेचरैः** - ग्रहैः, **प्रव्रज्यामुपयाति** - सन्यासीनी भवति, **पाणिग्रहे** - लग्नकाले, **चिन्तयेत्** - विचारयेत् ।

**भावार्थः-** यस्याः स्त्रियः जन्मकाले कर्कलग्नं तथा च बुधगुरुशुक्राः बलवन्ताः सा नानाशास्त्रकुशला तेजस्विनी तथा प्रख्याता भवति, यदि तस्याः जन्मकाले सप्तमे वा धर्मे खेचराः तदा सा लग्नकाले प्रव्रज्या भवति ।

**मानयोगः**

**मानेशे शुभसंयुक्ते शुभमध्यगतेऽपि वा ।**

**शुभग्रहांशके वाऽपि कीर्तिमानभिमानवान् ॥ ३ ॥**

**अन्वयः-** शुभसंयुक्ते मानेशे शुभमध्यगतेऽपि वा शुभग्रहांशके वाऽपि कीर्तिमानभिमानवान् (करोति) ।

**व्याख्या-** **शुभसंयुक्ते** - शुभग्रहयुक्ते, **मानेशे** - दशमेशे, **शुभमध्यगतेऽपि** - शुभग्रहमध्यस्थेऽपि **वा शुभग्रहांशके** - शुभग्रहनवमांशे, **वाऽपि** - तदाऽपि (जातकः) **कीर्तिमानभिमानवान्** - प्रख्यातिवानभिमानवान् (भवति) ।

**भावार्थः-** शुभग्रहयुक्ते दशमेशो वा शुभग्रहमध्यगते वा शुभग्रहनवांशके जातकः कीर्तिमान् प्रख्यातिपूर्णः भवति ।

**कीर्तिहीनयोगः**

**पापेक्षिते कर्मणि पापयुक्ते मानाधिपे हीनबलोपयाते ।**

**जातोऽपवादी विगताभिमानः स्वकर्मतेजो बलकीर्तिहीनः ॥ ४ ॥**

**अन्वयः-** कर्मणि पापेक्षिते पापयुक्ते, मानाधिपे हीनबलोपयाते, (जातकः) अपवादी विगताभिमानः स्वकर्मतेजो बलकीर्तिहीनः जातः (भवति) ।

**व्याख्या-** **कर्मणि** - मानेशे, **पापेक्षिते** - पापग्रहदृष्टे, **पापयुक्ते** - पापग्रहसंयुक्ते, **मानाधिपे** - दशमेशे, **हीनबलोपयाते** - बलहीनजाते, **अपवादी** - अपवादयुक्तः **विगताभिमानः** - निरभिमानः, **स्वकर्मतेजो** - स्वकर्मणा बलवान्, (परन्तु) **बलकीर्तिहीनः** - सामाजिकबलकीर्तिहीनः, **जातः** - भूतः ।

**भावार्थः-** दशमेशः पापग्रहदृष्टः पापग्रहयुक्तः, दशमेशः हीनबलः, तदा जातकोऽपवादी तथा सामाजिकबलकीर्तिहीनः।

## जारजयोगस्य सप्त सूत्राणि

(१) षष्ठाष्टमेशौ चन्द्रारयुतौ तुर्यगौ जारजः ।

(२) षष्ठाङ्केशौ पापयुतो जारजः ।

(३) जीवशुक्रान्तरयोगे ब्राह्मणजः ।

(४) केन्द्रसोत्थेशयोगे जारजः ।

(५) द्वित्रिपञ्चारीशा लग्नगा जारजः ।

(६) शून्येषु केन्द्रेषु जारजः ।

(७) चन्द्रमन्दयोगे जारजः ।

## बुद्धिहीनयोगस्य त्रीणि सूत्राणि

(१) लग्ने चन्द्रे मन्दारदृष्टे हीनधीः (२) सुतेशे क्रूरषष्ठ्यंशे हीनधीः । (३) मन्दारार्काश्चन्द्रं पश्यन्ति मूर्खकराः।

## आपकीर्तियोगस्य चत्वारि सूत्राणि

(१) खपे पापसम्बन्धेऽसत्कीर्तिः ।

(२) खपे पापवर्गेऽसत्कीर्तिः ।

(३) खे मन्दार्कौ असत्कीर्तिः ।

(४) पापन्तरे कमण्यसत्कीर्तिः ।

## विद्वान्योगस्य त्रीणि सूत्राणि

(१) बली सुतेशे केन्द्रकोणे च विद्वान् । (२) धने लाभेऽङ्गेशे पण्डितो धर्मवित् । (३) खे लाभे सुतेशे पण्डितः।

## स्वाध्यायः

१. **अधस्तनेषु प्रश्नेषु योग्यमुत्तरं चित्वा लिखत ।**

(१) लग्नं यदि स्वामिनिरीक्षितं तदा जातकः किं भवति ?

(क) धनी (ख) पुस्तकी (ग) दण्डी (घ) ज्ञानी

(२) चन्द्रे कर्कटकोदये जातिका किदृशी भवति ?

(क) मेदस्विनी (ख) तेजस्विनी (ग) हरिणी (घ) हंसिनी

(३) मानवः कदा कीर्तिमानभिमानवान् भवति ?

(क) मानेशे शत्रुसंयुक्ते (ख) मानेशे पापसंयुक्ते

(ग) मानेशे षष्ठसंयुक्ते (घ) मानेशे शुभसंयुक्ते

(४) मानवः कदा बलकीर्तिहीनः भवति ?

(क) कर्मणि पापयुक्ते (ख) कर्मणि पुण्ययुक्ते

(ग) कर्मणि धर्मयुक्ते (घ) कर्मण्यधर्मयुक्ते

(५) जीवशुक्रान्तरयोगे जारजः केनोत्पन्नः भवति ?

(क) शूद्रेण (ख) वैश्येन (ग) ब्राह्मणेन (घ) क्षत्रियेण

(६) षष्ठाङ्केशौ पापयुतौ तदा किं कुरुतः ?

(क) ध्वजः (ख) वज्रः (ग) रजः (घ) जारजः

(७) जातकस्य जन्माङ्गचक्रे शून्येषु केन्द्रेषु किं फलम् ?

(क) मातृजः (ख) जारजः (ग) सङ्गजः (घ) मलिनजः

(८) लग्ने चन्द्रे मन्दारदृष्टे जातकः किदृक् भवति ?

(क) वृद्धिः (ख) बुद्धिः (ग) हीनधीः (घ) प्रधीः

(९) सुतेशे क्रूरषष्ठ्यंशे किं करोति ?

(क) उदधिः (ख) जलधिः (ग) सन्धिः (घ) हीनधीः

(१०) नरस्य ग्रहाः खे लाभे सुतेशे किं नरं किं कुर्वन्ति ?

(क) गणितम् (ख) पण्डितः (ग) मण्डितः (घ) चलितः

२. **एकैक-वाक्येनोत्तराणि लिखन्तु ।**

(१) मानाधिपे हीनबलोपयाते पुरुषः किदृशो भवति ?

(२) शून्येषु केन्द्रेषु पुरुषः किदृशो भवति ?

(३) कीर्तिमानभिमानवान् पुरुषः केन भवति ?

(४) खपे पापसम्बन्धे कीर्तिः किदृशी भवति ?

(५) खे लाभे सुतेशे पुरुषः किदृशो भवति ?

**३. श्लोकपूर्तिं कृत्वा भावार्थो लेख्यः ।**

(१) नरश्चिरायुः ........................ ।

(२) चन्द्रे कर्कटोदये ........................ ।

(३) मानेशे शुभसंयुक्ते ........................ ।

**४. अ विभागेन सह ब विभागं संयोजयत ।**

| अ | ब |
|---|---|
| (अ) लग्नम् | (अ) सप्तमस्थैः |
| (ब) कुशाग्रबुद्धिः | (ब) होरा |
| (क) खेचरैः | (क) तीक्ष्णबुद्धिः |
| (ड) कामस्थैः | (ड) ग्रहैः |
| (इ) मानेशे | (इ) दशमेशे |

**५. टिप्पणी लेख्या ।**

(१) बलवान् दशमेशः

(२) निर्बलो दशमेशः

(३) कीर्तिहीनयोगः

**६. विस्तरेणोत्तराणि लिखत ।**

(१) जारजयोगः

(२) प्रव्रज्या योगाः

(३) बुद्धिहीनयोगः

(४) अपकीर्तियोगः

**अध्यापकानां कृते**

- नाभसयोगाध्यायस्य विषये विचारयत ।

**छात्राणां प्रवृत्तिः**

- अन्यान्योगान् बहुभिः ग्रन्थैरेकत्रीकृत्य पठत ।

●